॥श्रीगणेशाय नमः॥ ॥यत्राध्यस्तमिदं सर्वमियमाना च विभ्रया ॥ भाति नो भाति यस्याज्ञानात्त
दस्मि ब्रह्मणि सुखं ॥१॥ तदेवं सर्वोपनिषदर्थसारसंग्रहं ग्रंथं बंधन्नं बंधेन संक्षेपतो युक्त्योपदिश्य
पुनरप्यक्रमेणार्थजातं प्रबंधं बंधेनमोपस्कारं विस्तरेणोपदेष्टुकामो भगवान्भाष्यकारः प्रथ
यारंभे ग्रंथप्रतिपाद्यपरदेवतानमस्काररूपं मंगलं कृतं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति
चैतन्यमिति ॥ ॥चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयं । यत्सर्वविषयातीतं तस्मै सर्वविदे नमः ॥१॥ त
स्मै सामान्यतः प्रसिद्धात्मने नमः । प्रकीभावो नूयादित्यर्थः । तस्य विशेषजिज्ञासायां लक्षणमा १
ह । सर्वविदिति । सर्वं वेत्तीति सर्ववित्तस्मै । सर्वज्ञापेक्षतभूतभवद्भविष्यादि स्येतदात्मकं जगदुच्य
ते । तत्सर्वं सर्वावस्थं सर्वदा सविशेषं सविधिसन्नामात्रेण प्रकाशयतु सर्ववित् नहीदं जडं स्वसत्ता
स्फूर्त्योः स्वतंत्रं भवति । अतो यदधीनसत्तास्फूर्तिमिदं तदस्ति सर्वज्ञं सर्ववित् स नमस्य इति तद

दस्य स्वलक्षणं सिद्धं भवतीति भावः । एवं जगत्सृष्टिस्थितिसंहारनियामकत्वेन सन्मात्रतया तटस्थे
न लक्षितस्य स्वरूपलक्षणं वदन्सर्वविषयवेदनाश्रयतया सर्ववित्त्वमिति वैशेषिकादिमताशंकां वार
यति । चैतन्यमिति । यश्चैतन्यं चितिस्वभावं ज्ञानस्वरूपं तस्मै इति यत्तच्छब्दयोः संबंधः । विज्ञानमानंदं
ब्रह्म · सत्यं ज्ञानमानंदं ब्रह्मेत्यादिश्रुतिभ्यः । न खलु चित्स्वभावस्य चिद्धर्मकता युज्यते । न खल्वनुष्णस्व
भावकं जलमुष्णधर्मकं भवतीति भावः । चिदेकरसस्यापि सर्वसाक्षित्वं भावोपाधिकं व्यावहारिकमित्य
नवद्यं । ननु चैतन्यं नो अणुपरिमाणमित्येकदेशिनो मध्यमपरिमाणमिति दिगंबरा मन्यंते । अतस्तस्य
सर्वविषयसंसर्गाभावे कथं सर्वसाक्षित्वं प्रकाशो हि साक्षित्वादिः स्वसंसृष्ट एव प्रकाशव्यवहारहेतुना
संसृष्टे विषय इत्यत आह । सर्वगमिति । नित्यं विभुं च सर्वगतं । आकाशवत्सर्वगतश्च नित्यः । स पर्यगाच्छु
क्रमित्यादिश्रुतिविरोधादणुपरिमाणत्वादिकल्पनामनवकाश इति । उत्क्रांत्यादिलिंगोपाधिकत्वस्य

वरणात्तेनस्वाभाविकविशुद्धार्थकश्रुतिबाध इति चेत् । ननु सर्वगमित्युक्ते सर्वमन्यत्तद्गतं ब्र-
ह्मान्यदिति तस्य वस्तुपरिच्छेदप्रतिभासात्सांख्यादिवादिमतवत्सजातीयविजातीयभेदवत्त्वं प्राप्तमित्य
त आह । सर्वमिति । सर्वं खल्विदं ब्रह्म । इदं सर्वं यदयमात्मा । आत्मैवेदं सर्वमित्यादिश्रुतेरित्यर्थः । अनेन स-
र्वोपादानत्वमुक्तं । उपादानं हि स्वकार्यं सर्वं व्याप्नुवद्व्यापकं भवति नानुपादानं । तच्चैकदेशेन संसृज्यमा-
नमव्यापकमेव भवतीत्यतः सर्वोपादानत्वात्सर्वमित्यभिप्रायः । सर्वात्मकमपि ब्रह्म जीवाद्यद्वैतं
जीवस्य ब्रह्मणो भिन्नत्वात्तत्संसारित्वेन विरुद्धधर्मवत्तोरैक्यं संभवति देहेन्द्रियवदित्य २
त आह । सर्वभूतगुहाशयमिति । सर्वभूतानां स्थावरजंगमानां गुहासु बुद्धिषु शेत इति सर्वभूतगु-
हाशयं गूढा अस्यां ज्ञानज्ञेयज्ञातृपदार्था इति गुहा बुद्धिः गूहतेः संवरणार्थस्य धातोरिदं रूपं सर्व-
प्राणिबुद्धितः साक्षितया निर्विकारं वर्तत इत्यर्थः । तथा च श्रुतिः । यो वेद निहितं गुहायां परमे व्यो-

---

मन् । ऋषं तत्स्मेति । पुरुषः स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृद्ययमित्याद्याः । तथा च तत्सृष्ट्वा त-
देवानुप्राविशदित्यादिना सृष्टेरेव ब्रह्मणो जीवरूपेण प्रवेशश्रवणात् य आत्मा ब्रह्मेत्यादितादात्म्य-
५३ श्रुतेश्च न ब्रह्मणोऽन्यो जीव इत्यवधार्यते । विरुद्धधर्मसंसर्गप्रतिभासस्तूपाधिनिबंधनो न स्वरूप-
निबंधन इति भावः । एतेन जीवो नाम ब्रह्मणोंऽशो विकारो वा स्वतंत्र एव वेति भेदाभेदे भेदाभेदवादि-
पक्षा निराकृता वेदितव्याः । ननु सर्वभूतगुहाशयत्वे ब्रह्मणो मानसवेद्यत्वं स्यात्तथा सर्वात्मत्वे प्रपंचात्म-
त्वप्राप्तिरिति शंकायामाह । सर्वविषयातीतमिति । सर्वमविद्यातत्कार्यात्मकं विषयमतीत्य
व्यवस्थितमित्यर्थः । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्यादिश्रुतेः परमेश्वराश्रि-
तमायाविवर्तत्वात्प्रपंचमात्रस्य मायायाश्चानिर्वचनीयत्वात् परमार्थं किमपि ब्रह्मणो भिन्नं व-
स्त्विति तया सर्वातिक्रमणत्वं चास्माद्विषयाणां न मानसवेद्यत्वं संभाव्यते । न हि मिथ्या दृष्टिग्रहीते

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

न मरीचिकादिना नृम्णात्कटकादिना नृम्णात्कटकादि मत्परमार्थतो भवति न वा काष्ठेनाग्निः । न का-
तेरूपं तेन । अतो युक्तं सर्वविषयातीतत्वमिति भावः । तथा च श्रुतिः । नेह नानास्ति किंचन । यतो वा-
चो निवर्तन्ते अप्राप्य मनसा सह इत्याद्या । अत्र चैतन्यमित्यादिविशेषणत्रयं तत्त्वंपदार्थसाधारणं ग-
र्भीभूतगुहाशयमिति च बुद्ध्यादिसाक्षी त्वंपदार्थ उक्तः । सर्वविकल्परहितत्वेन तत्पदवाच्यं ब्रह्मोच्यते । सर्वविषया-
तन्मितिपु तीतं तत्पदलक्ष्यमुक्तं यत्र ब्रह्मपदयोः सामानाधिकरण्यादैकार्थ्यं इत्येवमिति तत्त्वंपदार्थयोरैक्यमखण्ड-
वाक्यार्थस्तात्पर्यवृत्त्या प्रतिपादितो भवति । तदेवं मंगलाचरणव्याजेन वेदान्तशास्त्रीयविषयाख्य ३
नुबन्धोप्यत्र प्रपंचितोस्य तत्प्रकरणद्योतनाय । तथाहि । उक्तवाक्यार्थविषयश्चैतन्यं सर्वविषया-
तीतमिति च चिदात्मनः सर्वानर्थसंस्पर्शित्वाभावोक्तेरशेषानर्थनिवृत्तिः प्राप्तिर्निरतिशयान-
न्दाविर्भावात्मकं ब्रह्मत्वं प्रयोजनमुक्तं । अयं तत्कामो ऽधिकारी सूचित एव भवति । उक्तविशेषणयोर्वे-

दान्तेष्वेव प्रसिद्धेः । शास्त्रब्रह्मणोः प्रतिपाद्यप्रतिपादकसंबंधो ध्वनितः ॥१॥ ॥ एवं देवतानमस्कारव्या-
जेन वेदान्तप्रतिपाद्यदेवतातत्त्वमुपक्षिप्तमिदानीं वेदान्तानां तत्स्वरूपं प्रतिपादयितुं कर्मकाण्डनिवृत्ति-
मर्थमनुवदते ज्ञानकाण्डरूपवेदान्तानां संगतिमभिदधत्तेषामगतार्थत्वमनन्यत्रोपक्षेपं च तावदाह ।
समाप्येति । समाप्य क्रियाः सर्वा दाराग्न्याधानपूर्विकाः । ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रमे ।
॥ वेद इदानीं ब्रह्मविद्यां वक्तुं प्रचक्रमे इत्यन्वयः । इदानीमिति जिज्ञासोरुपस्थितिसमय उक्तः । अ-
थेति जिज्ञासाप्रवृत्तिप्रयोजकहेतुसाधनचतुष्टयसंपत्त्यानंतर्यमुच्यते । तथा च विवेकवैराग्यशमा- ८
दिसाधनसंपन्नस्य मुमुक्षोर्मोक्षसाधनब्रह्मविद्यां साक्षात्प्रतिपादयितुं ज्ञानकाण्डात्मको वेदः प्र-
वृत्त इत्यर्थः । कुतोस्य साधनसंपत्तिरित्यपेक्षायां कर्मकाण्डोक्तकर्मानुष्ठानजनितबुद्धिशुद्धित इत्यभि-
प्रेत्याह । समाप्येत्यर्धेन । दाराग्न्याधानपूर्विका इति विहितक्रियामात्रोपलक्षणं नित्यनैमि-

त्रिकप्रायश्चित्तोपासनारूपाः सर्वाश्रमप्रयुक्ता विहिताः सर्वाः क्रियाः समाप्यास्मात्सिंनोपयपक
र्मकांडात्मना अनुष्टेयकर्माणि इति पाद्यस्थितो वेद इति संबंधः। अयंभावः। वेदो हि स्वतः प्रमाणभू
तः सर्वार्थप्रकाशको नित्यनिरतिशयपुरुषार्थमर्थयमानस्य तदुपायं मृगयतः सर्वेषां द्
प्रयतमानस्यापि तमलभमानस्य तादृक्पुरुषार्थसाधनं प्रत्यक्षादिभिरनवगम्यमानमुपदेष्टुं प्र
वर्तते। नित्यनिरतिशयपुरुषार्थश्च मोक्ष एव नान्य इति। मोक्षोपाय इति पादेन वेदतात्पर्यमवग
म्यते। श्रुतिस्मृती चात्र भवतः। सर्वे वेदा यत्पदमामनन्ति। सर्वे वेदा यत्रैकं भवंति। समानमीनः आ
त्माजनानामिति। वेदैश्च सर्वैरहमेव वेद्य इति च। मोक्षसाधनं च सम्यग्ज्ञानात्म तत्त्वज्ञानमेव। तमेव
विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति च श्रुतेस्तच्च नाशुद्धांतःकरणस्योपदेष्टुं युक्तं।
ह्र १ तस्य तत्त्वग्रहणासामर्थ्यान्नावादुश्रुतिश्च भवति। नाविरतो दुश्चरितान्नाशांतो नासमाहितः। न

संयोगः फलसंबंधः। रूपं द्रव्यदेवते। नोदनाविशेषाकारः समाख्या नाम २

शांतमानसो वापि प्रज्ञानेनैनमाप्नुयात्। अतस्तस्य ज्ञानोत्पत्ति प्रतिबंधदुरितक्षयाय नित्यानि
कर्माणि प्रथमे विधत्ते तानि च संयोगरूपनोदनासमाख्यानामविशेषेण सर्वशाखाप्रत्ययं साधं
नेतिकर्तव्यांगकलापपरिमाणाधिकारविशेषोक्तिपूर्वकमनुष्ठापयति। धर्मेण पापमप
नुदति। न कर्म लिप्यते नरे। अविद्यया मृत्युं तीर्त्वा। दृष्टश्च लेदुरित क्षय एव धर्मस्य श्रेय
स्परं प्रयोजनं। परंपरया पुरुषार्थोपयोगित्वात्तु कर्मणां पितृलोकस्त्वापाकः। पितृलोका
दि प्रयोजनं। तस्य स्वरूपादिहोषदुष्टतया हेयत्वात्। आनुषंगिकं हि तत्कर्मफलं भवति। भवदपि
नेदं चित्तशुद्धि प्रतिबंधकं। तदुक्तं सुरेश्वराचार्यैः। नित्येषु शुद्धिः प्राधान्याज्जोगोप्यानुसक्तिबंधकः।
भोगमंगुरमीत्यातेबुद्धिशुद्धिसुरोचत इति। काम्याभिचारादिकमविधानं तु पुरुषवशीकरणा
र्थानामा विकमत्र निर्वारणार्थमित्येषादिकृ। तथा च विश्रुते। प्रथमा पेक्षितत्वान्तूतद ४

DR. BHAU DAJI

र्थं कर्मविध्यनंतरमारभ्यं प्रवर्तते। पश्चात्तत्त्वज्ञानोपदेश इति कर्मज्ञानकांडयोरर्थद्वारा हेतुमद्भा
वेन पौर्वापर्यसंबंध उक्तो ज्ञानकांडस्य साक्षात्फलार्थविषयत्वात्कर्मनिरनपेक्षितत्वाच्च
गतार्थत्वमनन्यशेषत्वं च तस्य सिद्धमिति।।१।। ननु कर्माणि फलानि कर्तुः फलप्रदानि लोके दृ
ष्टानि यथा पित्रादिनिरूपदिष्टविषयाणि दृष्टफलानि तैर्निषिद्धविषयान्यनिष्टफलानि
तद्वच्छास्त्रविषयाणि दैवाधीनतयोभयार्थीनि तथा वेदविहितानि कर्माणीष्टफलानि निषि
द्धान्यनिष्टफलानि विहितप्रतिषिद्धव्यामिश्रकर्माणीष्टानिष्टव्यामिश्र फलानि चैवं शाल ५
याच शास्त्रं। अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलमिति। एवं च कर्मणां फलाव्यभिचारा
न्मोक्षस्य फलविशेषत्वात्कर्मविशेषसाध्यत्वोपपत्तेर्न विघ्यानुरूप्यमस्तीति न तदर्थानि ज्ञा
नकांडानि मुमुक्षुणा विचारणीयानि किंतु कर्माण्येव कानि चिद्वा उ मस्यादीन्यन्यतयफलार्थमि

वे।

नुष्ठेयानीति कर्मज्ञानांडस्य वस्थानमित्याशंक्याह। कर्माणीति द्वाभ्यां।। ।।कर्माणि देहयोगा
र्थं देहयोगे प्रियाप्रिये ध्रुवे स्यातां ततो रागो द्वेषश्चैव ततः क्रियाः।।३।। कर्मफलं हि जात्यायुर्भोगलक्षणं
तच्च देहसंबंधं विना नोपपद्यत इति कर्माणि देहयोगार्थमेवेत्यर्थः। देहयोगे च संसारो दुर्निवार इत्या
ह। देहयोग इति। देहसंबंधे सति प्रियाप्रिये सुखदुःखे ध्रुवे स्यातां न वैतामेवान ह वै सशरीरस्य स
तः प्रियाप्रिययोरपहतिरस्तीति श्रुतेः। ततः सुखदुःखयोस्तत्साधनयोश्च यथासंख्यं रागद्वे
षौ वासनारूपेण स्यातां। ततो रागद्वेषाख्यान्निमित्तात्क्रिया वाङ्मनःकायचेष्टाः स्फुरित्यर्थः।।३।। धर्माध
र्मौ नितो जस्य देहयोगस्तथा पुनः। एवं नित्यप्रवृत्तोऽयं संसारश्चक्रवद्भृशं।।४।। अस्य प्रत्यगात्मतत्त्वब्रह्माज्ञा
नतोऽहंकारपरिवृत्तस्य ततः क्रियाभ्यो विहितप्रतिषिद्धरूपाभ्यो धर्माधर्मौ पुनर्नवेतां पुनस्त
तो देहयोगस्ततः प्रियाप्रिये इत्येवं संसारो जन्ममरणकर्मकरणतत्फलभोगलक्षणः कुलालचक्र

लङ्घ्यामत्यर्थः। अविक्रियं यथा स्यात्तथा नित्यप्रवृत्तो नादिकालमारभ्य प्रवर्त्तते। अयं प्रत्यन्तस्य
र्थः। तस्मादैहिकार्थानां कर्मणां अनित्यफलत्वस्य लोके दृष्टत्वादामुष्मिकफलार्थानामपि कर्म
त्वादनित्यफलतोनुमानात् तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीय
त इति वस्तुबलावलम्बितेऽस्याक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतमित्याद्यर्थवादस्यावलंबनेन
कर्मफलस्य नित्यत्वाशा न कार्येति भावः॥४॥ नन्वेवमपि न मोक्षार्थिनो ज्ञानेन प्रयोजनमस्ति। कृत
कर्मणां संसारनिमित्तानां फलभोगानंतरं नाशे सति निमित्ताभावात् नैमित्तिका ६
भावप्रतिन्यायादयत्नसिद्धत्वान्मोक्षस्येत्याशंक्याज्ञानमूलत्वात्कर्मणस्तस्मिन्सति तदनुपरमा
त्सैवमित्याह। अज्ञानमिति। यद्वा अज्ञस्य कर्मप्रवृत्त्यविरमात्संसाराविरमः। कृतकर्मफलभोग
समयेपि कर्मप्रवृत्त्यवश्यंभावात्तु न भोगसं नानातिच्छेदश्चेत्कथं तर्हि कर्मनिवृत्त्या मोक्षसि

नि॰

द्धिरितिनीहाराख्यामाह। अज्ञानमिति॥ ॥अज्ञानं तस्य मूलं स्यादितिलक्षानमिष्यते। ब्रह्मविद्या
म् आरब्धा ततो निःश्रेयसं भवेत्॥५॥ अयमर्थः। नीहारेणाप्रावृता जल्प्या चासुतृप उक्थशासश्चरंति।
एकः शत्रुर्न द्वितीयोस्ति शत्रुरज्ञानतुल्यः पुरुषस्य राजन् येनावृतः कुरुते कार्यते न घोराणि क
र्माणि सुदारुणानीत्यादिश्रुतिस्मृतिभ्यो अज्ञानं तस्य पूर्वोक्तस्य कर्मतत्फललक्षणस्य संसार
स्य मूलं स्यादिति हेतोस्तस्याज्ञानस्य हानमात्यंतिको परमः इष्यते। एतेन संपादनीयतयाऽभिप्रे नि॰
यते मूलोन्मूलनमंतरेण प्ररोहाविच्छेदादित्यर्थः। तरति शोकमात्मवित् यदा चर्मवदाकाशं वेष्टयिष्य
ति मानवाः। तदा देवमविज्ञाय दुःखस्यांतो भविष्यति। ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः। ते
षामादित्यवज्ज्ञानं प्रकाशयति तत्परमित्यादिश्रुतिस्मृतिभ्यो यतो विद्यैवाज्ञानहानहेतुरवग
तातो ब्रह्मविद्यारब्धा। ततो ब्रह्मविद्यया निःश्रेयसं केवल्यं भवेत् उदयेनांतरीकतया ज्ञाननि

इत्यौकेवलात्मस्वरूपावस्थानस्वरूपो मोक्षो लब्ध इव भवतीत्यर्थः ॥५॥ ननु कर्मणां विचित्रशक्तित्वादि
रण्यपदाश्रम तद्वं भजंत इत्यादिश्रुतेश्च कर्मणैव हि संसिद्धिमास्थिता जनकादय इत्यादिस्मृ ते
श्च कर्मभिरेव मोक्षसिद्धेः कृतं ब्रह्मविद्ययेति शंकामपाकुर्वन्नंतरश्लोकमर्थमुपपादयति द्वाभ्यां
विद्येवेति ॥ ॥ विद्येवाज्ञानहानाय न कर्माप्रतिकूलतः ॥ नाज्ञानस्य प्रहाणे हि रागद्वेषक्षयो भवेत् ॥ ध्
संसारमूलाज्ञानहानाय विद्यैव समर्थेत्यध्याहारः ॥ एवकारार्थमाह ॥ न कर्मेति ॥ तत्र हेतुरप्रति ७
त ॥ कूलत्वादविरोधादित्यर्थः ॥ विद्यैव प्रकाशस्वरूपत्वात्प्रकाशस्वरूपमविद्यां तत्कार्यं च निवर्तयति
यथोरज्ज्वावरणाविद्यां तन्मसितकल्पितसर्पाद्याकारं च रज्जुतत्त्वज्ञानप्रदीपो निवर्तयतः स्वभाव
विरोधात्कर्म तु नाज्ञानतमोनिवर्तकं तदविरोधित्वात्प्रकाशात्मकत्वाभावान्नीहारस्तोमवदित्यनु
मानेनान्यः पंथा विद्यतेऽयनाय इत्यादिश्रुतिस्पष्टविरोधाद्धिरण्यपदाश्रमा दावपेक्षितकममृतं प

र्यवसितं कर्मणैव हीति स्मृतिः ॥ न कर्मणा न प्रजयेति श्रुतिविरोधेऽन्यपरेत्यतो न तद्बलात्कैमिस्ता
नहानशंकेत्यभिप्रायः ॥ विद्यां विनाज्ञानक्षयाभावश्चेदज्ञानक्षयार्थमेव विद्याऽन्विष्यतां ॥ तत्कार्यस्य
उपरमार्थं चापि विधियाना शानुपपत्तेः शोहं व्रतरमन्वेषणीयमित्यत आह नाज्ञानस्येति ॥ अ
ज्ञानस्याप्रहाणे रागादिक्षयो न स्यात् विवेकपूर्वकत्यस्य रागादावन्वयव्यतिरेकसिद्धत्वात् ज्ञान
स्य रागादयो न परमार्था इत्यज्ञाननिवृत्त्यैव निवर्त्तंत इति न तत्र द्वैतं तदान्वेषणीयमित्यर्थः ॥ ६ ॥ रागाद्य
निवृत्तौ का हानिरिति तत्राह ॥ रागद्वेषेति ॥ रागद्वेषक्षयाभावे कर्म दोषोद्भवं ध्रुवं ॥ तस्मान्निःश्रेयसा
र्थाय विद्यैवात्र विधीयते ॥७॥ दोषा रागद्वेषमोहास्तदुद्भवं तद्धेतुकं कर्म ध्रुवं पुनः स्यादेवेति पुनः
संसारो दुर्वार इत्यर्थः ॥ उपपादितमर्थमुपसंहरति ॥ तस्मादिति ॥ अत्र वेदांतोक्ति विधीयते प्रका
रणत इत्यर्थः ॥७॥ तदेवमज्ञानमूलत्वात्संसारस्याज्ञानमेव तन्निवर्तकं मोक्षहेतुः ॥ न कर्म इत्युक्तं ॥ त

त्वयादि कर्मणां स्वातंत्र्येण मोक्षहेतुता न संभवेत् किंतु ज्ञानेन समुच्चयेनेति तद्धेतुतास्यादिति समुच्च
यवादिमतमुत्थापयति। न तु कर्मेति॥ ॥न तु कर्म तथा नित्यं कर्त्तव्यं जीवने सति। विद्यायाः सह
कारित्वं मोक्षं प्रति हि लभ्यते॥८॥ न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्। कार्यते ह्यवशः क
र्म सर्वः प्रकृतिजैर्गुणैरिति स्मृतेः क्षणमात्रेणावश्यं नापि जीवता पुरुषेण कर्म कर्त्तव्यमेव। विद्या
यथा तथा नित्यं कर्मावश्यं कर्त्तव्यं यावज्जीवमग्निहोत्रादिकमिति विहितत्वादित्यर्थः। उपयोगा ८
भावान्मुमुक्षुणा नित्यं कर्म न कर्त्तव्यमित्यत आह। विद्याया इति। विद्याया मोक्षं प्रति कारणत्व
तायाः सहकारित्वमिति कर्त्तव्यभावे हि यस्मात् तत्कर्म तज्जेत्याह्वयात् तत्कार्यं मुमुक्षुणेत्यर्थः।
विद्ययामृतमश्नुत इति श्रुतौ पश्चाज्ज्ञानस्य मोक्षकारणत्वावगमात् करणस्य चेति। कर्त्तव्यसापे
क्षत्वात्स्य चेति कर्त्तव्यमात्राभावात् कर्मनिरेव तथा ज्ञानादिर्निर्हेशादीव फलोपकार्यंगे ज्ञानं

मुमुक्षीपत इति भावः॥८॥ कर्मणा बध्यते जंतुर्विद्यया च विमुच्यते। तस्मात्कर्म न कुर्वन्ति यतयः पा
रदर्शिनः। इत्यादिस्मृतेर्मुमुक्षुभिः कर्म न कर्त्तव्यमिति चेत्तत्राह। यथा विद्येति॥ ॥यथैव वि
द्या तथा कर्म नो हित्वा विशेषतः। प्रत्यवायस्मृतेश्चैव कार्यं कर्म मुमुक्षुभिः॥९॥ यथैव विद्या मुमु
क्षुभिः कार्या तथा कर्मापि कर्त्तव्यं कुतः विद्यां चाविद्यां च यस्तद्वेदोभयं सहेति समुच्चयविधि
नाविशेषेण चोदितत्वादित्यर्थः। किंच। अकुर्वन्विहितं कर्म निंदितं च समाचरन्। प्रसजंश्चेंद्रि
यार्थेषु नरः पतनमृच्छतीत्यत्र हित्वा ने प्रत्यवायस्मृतेश्च कर्म कार्यमित्यर्थः। तथा चोदाहृतश्रुतिस्मृ
विरोधे तस्मात्कर्म न कुर्वन्ति यतय इत्यादिस्मृतिर्ज्ञानिपरा समर्थनीयेति भावः॥१०॥ अत्र वा
सिद्धान्ती विद्यायाः सहकार्यपेक्षित्वमुक्तमाक्षिपति। न चेति॥ ॥न तु स्वफला विद्या नान्यत्किं
चिदपेक्षते। नाग्निहोमो यथैवान्यं स्वकार्येप्यपेक्षते॥११॥ न तु यथा स्वफला विद्या कर्मनिरपेक्ष

पेक्षते। इति केवलविद्यासहकारिनिरपेक्षा अक्षयफलत्वाद् दृष्टादिज्ञानवदित्यर्थः॥ पूर्ववादी व्य
भिचारेण परिहरति नेति। अवश्यंभाविफलोप्यग्निष्टोमो यथोक्ताङ्गसंस्कारितं तद्वत् ज्ञा
नसहकारि कर्मापेक्षते। तथा विद्यापीत्यर्थः॥ १०॥ पूर्वपक्षमुपसंहरति। इत्येवं केचिदिच्छंतीति
॥ इत्येवं केचिदिच्छंति न कर्मप्रतिकूलतः॥ ११॥ सिद्धांतं वक्तुमुपक्रमते। नेत्यादिना। विद्यास्वकार्ये
न कर्मापेक्षते तत्प्रतिकूलत्वात् अहिरोधिवदित्येतावता न हि स्वप्रतिकूलः स्वसहायो भवति मम मू
तिमिरं तेजसः सहायभूतमित्यर्थः॥ १२॥ कर्मणो विद्याप्रतिकूलत्वं साधयति। विद्याया इत्यर्धेन॥॥
विद्यायाः प्रतिकूलं हि कर्म स्यात्साभिमानतः॥ हिंस्राद्वेषः श्येनवद्योतकः साभिमानत इति ब्रा
ह्मणपाद्यभिमानसहितपुरुषनिर्वर्त्यत्वात्कर्मणो विद्यायाश्च कूटस्थात्माकारतया जात्याद्यभि
मानहीननिष्ठत्वात् सिद्धो विद्याकर्मणोर्विरोध इत्यर्थः॥ ॥ हिंस्राद्वेषो इतितां प्रसिद्धिमुपपा

दयति। निर्विकारेति॥ ॥ निर्विकारात्मबुद्धिश्च विद्येतीह प्रकीर्तिता ॥ अहं कर्ता ममेदं स्यादि
ति कर्म प्रवर्तते॥ ॥ नाहं कर्ता निष्क्रियः किं तु कूटस्थ ब्रह्मैवास्मीत्येवमात्माकारांतःकरणवृत्तिर्विद्येति
इह वेदांतेषु विद्वद्भिः प्रकर्षेणोक्तेत्यर्थः। कर्मत्वहं ब्राह्मणोस्य कर्मणः कर्ता ममेदं कर्मसा
ध्यं फलं भविष्यतीत्यभिमानपूर्वकं प्रवर्तत इति प्रत्यक्षमतः स्फुटो विरोध इत्यर्थः॥ १३॥ ज्ञानक
र्मणो रंतमुखत्वबहिर्मुखत्वाभ्यां प्रवृत्तितो विरोधमुक्त्वोत्पत्तितोपि विरोधमाह। वस्त्वधीनेति
॥ वस्त्वधीना भवेद्विद्या कर्त्रधीनो भवेद्विधिः॥ १४॥ प्रमाणवस्त्वधीना विद्या यथाप्रमाणं यथा
वस्तु प्रजायते न तत्र पुरुषस्वातंत्र्यं संभवतीत्यर्थः। विधिर्विधेयकर्म कर्त्रधीनं पुरुषेण कर्तुमन्यथा
वा कर्तुं शक्यमतः पुरुषस्वातंत्र्यात् स्वातंत्र्य रूप विरुद्धहेतुजन्यत्वात् कर्मज्ञानयोः समुच्चय इत्य
र्थः॥ १४॥ किंच विद्यामंगमस्याः कर्मणो निराश्रयतया स्वरूपालाभान्न ज्ञानसहकारित्वेति वि

ध्वांतरेण विरोधमाह । कारकाणीति ॥ ॥कारकाण्युपमृद्नाति विद्या बुद्धिमिवोषरे । इतितत्
सत्यमादाय कर्म कर्तुं व्यवस्यति ॥१४॥ उषरे देशे जातामुदकबुद्धिं यथोषरस्वभावावलंबिनी
विद्योपमृद्नाति । तथात्मन्यविद्याध्यस्तकारकबुद्धिमात्मस्वभावावलंबिनी विद्योपमृद्ना
तीत्यर्थः । इति तत्सत्यमित्यर्धश्लोकः पूर्वेणैवान्वेति । उपमृद्नातीत्यतो नस्तकारकजातं सत्य
मादाय कर्मकर्तुं ज्ञानी कथं व्यवस्यतीति कथंशब्दाध्याहारेणायं योजनीयः ॥१४॥ विरुद्धत्वं १०
कृतसमुच्चयासंभवं फलितमाह । विरुद्धत्वादिति ॥ ॥विरुद्धत्वादतः शक्यं कर्म कर्तुं न विद्यया
। सहैव विदुषा तस्मात्कर्म हेयं मुमुक्षुणा ॥१५॥ अतो विरुद्धत्वादिति सामानाधिकरण्येन विद्य
यासह कर्मकर्तुं विदुषा न शक्यमेवेत्यन्वयः । समुच्चयनिराकरणफलमाह । तस्मादिति
॥१५॥ ननु ज्ञा कर्मसमाचरेदित्यादिवचनात्स्वर्गकामादिविध्यन्यथानुपपत्तेश्च देहादिव्यति

रिक्तात्मज्ञानवतः कर्माधिकारानुष्ठानकर्मणो विरोधे च तद्योगादधिकार्यभावेन कर्मकांडस्य
प्रामाण्यप्रसंग इत्याशंक्य कर्मस्वरूपभेदांगविशेषपुंविशेषक्रमाधिकारादिविशेषज्ञानस्य देहा
द्व्यतिरेकात्मज्ञानस्य च कर्मविशेषाधिकारिण्यपेक्षितत्वेऽपि न परमात्मतत्त्वज्ञानं तत्रापेक्षितं तदु
पयोगादधिकारिविरोधाच्चेत्यभिप्रेत्य समाधत्ते । देहाद्यैरिति ॥ यद्वा यद्योप निषद्ज्ञानं कर्म
कारकभेदोपमर्दकं स्यात्तदा तेन कांडेन कर्मकांडस्य निर्विषयीकरणाद्बाधितविषयं कर्मकां
डमप्रमाणं स्यात्तच्चानिष्टं स्वाध्यायाध्ययनविधिविरोधस्स्यादित्याशंक्यात्मतत्त्वज्ञाना
त्प्राग्गृहीतादज्ञानात्प्रामाण्यापत्तिरिति विकल्प्याद्यं निराकरोति । देहाद्यैरिति ॥ ॥देहाद्यैरवि
शेषेण देहिनो ग्रहणं निजं । प्राणिनां तदविद्योत्थं तावत्कर्मविधिर्भवेत् ॥१६॥ देहिन आत्म
नो देहाद्यैरिन्द्रियमनोबुद्धिप्राणैस्तद्धर्मैरविशेषेण विवेकेनाग्रहणं तद्विशिष्टतयैवात्मा

DR. BHAU DAJ

निमानरूपं निजं स्वाभाविकं न योषिद्दादावग्न्यादिभावबुद्धिवद्विध्यधीनं यदेवंविधं प्राणिनामा
स्थ २ त्मज्ञानं तद्विद्येव मनाग्वक्ता न जन्मांतिसंस्कारोऽथ सर्वसाधारणत्वाद्यथा वदेवं ब्राह्मणोऽहं गृहस्थोऽहं
सकलेंद्रियवानहं सकामो बलवानहमित्यादिज्ञानमनुवर्तते तावत्कर्मविधिः कर्मकांडं प्रमाणं भ
वेदितव्यर्थः प्रमितिजनकं हि प्रमाणं भवति। अधिकारिणश्च प्रमितिजनको वेदो नानधिकारिण इ
ति स्थिते कर्मप्रवृत्तिपर्यंतं प्रमितिजनकस्य विधिकांडस्योक्ताधिकारिलाभान्न प्रमात्मतत्त्ववि ११
द्योदयात्प्रागप्रामाण्यप्राप्तिरिति नाक्षयन विधिविरोध इति भावः॥४६॥ ॥द्वितीयं कल्पमिष्टा
पद्यात्र त्याचष्टे॥ नेतीति॥ ॥नेतिनेतीति देहादीनपोह्यात्मावशेषितः॥ अविशेषात्मबोधार्थं
नाविद्या निवर्तिता॥४७॥ नेतीति वीप्सार्थया श्रुत्या देहादीन्मिथ्या दृष्ट्यात्मीयभावेन गृहीतानशेषा
नपोह्य प्रतिषिध्य प्रतिषेधाव शिष्टतः आत्मावशेषितः॥ मत्पस्पसत्प मिन्याशे किमर्थमित्प न

ध्याह। अविशेषात्मबोधार्थमिति। अविशेषश्चासावात्मा चेति तस्य तथा बोधो निर्विशेषचिद्दानं
दस्वभावात्मनिस्त [illegible] इत्यर्थमित्यर्थः। परागर्थेषु पोह्तेषु तदवधित्वेन प्रत्यगर्थ एवाव
शिष्यत इति प्रत्यकूतबोधार्थमित्यर्थं भवति। बोधे सति किं स्यात्तदाह। तेनेति। यच्चिद्बोधे देहा
द्यात्माभिमानः कर्माधिकारहेतुः साविद्या तेन बोधेन निवर्तिता बाधितेत्यर्थः। अतो निमित्ता
भावान्नैमित्तिकाभाव इति न्यायेनात्मतत्त्वज्ञानवतो न कर्मविधिप्रतिपत्तिरितितं विधि प्रत्यसि
चारत्वात्स्ववदिति सर्वमनवद्यं॥४७॥ ॥ननु निर्विशेषात्मबोधेन सकृन्निवर्तिताप्यविद्या पुनरुज्जीवि
ष्यति ततः कर्माधिकारहेतुसंभवात्कर्मविधिः स्यादित्युक्ति तत्राहागमात्तदज्ञाननिवृत्तावपि पुनस्त
त्रमभयात रे रजतभ्रमोदयोपलंभादित्याशंक्याह॥ निवृत्तेति॥ ॥निवृत्ता सा कथं भूयः प्रसूयेत प्रमा
णतः। असत्येवाविशेषेपि प्रत्यगात्मनि केवले॥४८॥ प्रमाणतो निवृत्ता प्रमाणाग्निना दग्धा सा

विद्यान्नृपः पुनः कथं प्रसूयेत जायेत नानहिमृता द्रष्टव्यभार्या पुनः प्रसवायोद्भवति न हीत्यर्थः।
अविद्यांतरं जायेतेति चेत्तत्र वक्तव्यं किं निर्निमित्तं जायेत निमित्ताद्वा नाद्यः अकारणकार्योत्प
त्त्यापत्तिप्रसंगात् द्वितीये किमात्मा निमित्तमनात्मा वा नाद्यस्त्वाद्यः असत्येवेति। अविशेषे केवले द्र
ष्टमनयोर्व्याख्यानव्याख्येयभावः। यद्वाविशेषउक्तं मूल्यादिकं ति पद्यविशेषाभावेपि विशेषांत
रशंकास्यादतउक्तं केवल इति। तावदुक्ते एकाकिनोप्यात्मनः प्रयत्नादिगुणयोगित्व विशेषशंका
स्यात्तन्निवृत्तये विशेषणमुक्तं। तथा च विशेषे केवले प्रत्यगात्मनि सर्वांतरे परमार्थवस्तुनि सा १२
विद्यासतीएव न सत्तां लभते। असहायस्यात्मनः कूटस्थस्य कर्तृत्वानुपपत्तेः अविद्यांतरसहाया
भ्युपगमे चान्योन्याश्रयोऽनवस्था वा प्रसज्येतेत्यर्थः। अपिशब्देन पक्षांतरं निरस्यते। अनात्मन
पा१ श्चासत्येवसा विद्याकार्यस्यानात्मनो विद्याहेतुत्वानुपपत्तेरित्यर्थः। उक्तिकादोउरजनादिवि

लेपोपादानांशस्यैवाविद्याशक्तिमद्रूपस्य ज्ञानेन निवृत्त्यभ्युपगमात् मूलाज्ञानस्य लाद्यगनं तस्मात्किम
तो विद्यमानत्वात्तद्ध्वंसस्तु नत्रैत्यिकद्वयोपपत्तेर्दृष्टांतो विषम इति दृष्टव्यं। १८। ।अविद्यायाः पुन
रनुद्भवसाधनफलमाह। नवेदिति पादत्रयेण।। ।।न चेन्नृपः प्रसूयेत कर्तास्मीति धीः कथं
मद्गस्मीति विज्ञाने तस्माद्विद्या महायिकारणा सवेब्रह्मैवाहमस्मीति विज्ञाने विशिष्टज्ञाने
परोक्षानुभवे सति नृपः पश्चाच्चेदविद्या प्रसूयेतेति कर्तास्मीति धीः कर्माधिकारनिमित्तभू
ता कथं स्यान्नस्यादेवेत्यर्थः। चकारः कर्तृत्वादेः पारमार्थिकत्वशंकानिवृत्त्यर्थः। कर्तृत्वादेः पा
रमार्थिकत्वे विद्यानिवर्त्यत्वायोगादिति मोक्षाप्रसंग इति भावः। ज्ञानकर्मसमुच्चयनिराकरणमु
पसंहरति। तस्मादिति। यस्माद्विद्यया समुत्पन्नायां कर्मासंभवः सिद्धस्तस्मादसहायाकेवलैवावि
द्याकैवल्यहेतुरित्यर्थः। १९। विद्यायाः सहकारिनिरपेक्षत्वेनैव मोक्ष हेतुत्वमित्यु

त्वोक्तेर्थे श्रौतलिंगमुपोद्बलयति। अन्यदेवाहुरिति॥ ॥अन्यदेवाहुरित्युक्तो न्यासः कृत्यात एव हि
कर्मभ्यो मानसांतेभ्य एतावदिति वाजिनां॥२०॥ अमृतत्वं श्रुतं यस्मात्तस्मात्त्याज्यं कर्म मुमुक्षुभिः॥ ॥तै
त्तिरीयोपनिषत्सु सत्यं परं पर८ सत्यमित्युपक्रम्य सत्य तप आदिमानसांतानि कर्माणि श्रे
यःसाधनत्वेन निर्दिश्य तानि वा एतान्यवराणि तपांसीति तेषां फल्गुफलत्वेन निंदामभिध्
यन्यास इति ब्रह्मेत्युक्तो न्यास एवात्यरेचयदिति तत्र श्रुतानंतरं गन्तुः संन्यासस्तूयते। तस् १३
स्प४ स्मान्निंदितस्यानुपादेयत्वात्स्तुतस्य चोपादेयत्वात्कर्मसापेक्षत्वे मोक्षसंन्यासविधानानुप
पत्तेः संन्यासमात्मज्ञानमेव मोक्षसाधनं गम्यत इत्यर्थः। अत एव हीति ज्ञानस्य स्वफले क
र्मनिरपेक्षत्वे दृढेवेत्यर्थः। लिंगांतरमाह। एतावदिति। वाजिनाममृतत्वं श्रुतमिति वाजसने
यिनामुपनिषत्सु आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमित्युपक्रम्याध

यमात्मतत्त्वं दुन्दुभ्यादिदृष्टांतप्रबंधेनोपपाद्योक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्व
मिति ज्ञानस्यैवामृतत्वसाधनत्वावधारणं श्रुतं तस्य कर्मनिरपेक्षत्वे लिंगमस्यैतावदित्यवधा
रणार्थवचनानुपपत्तेरित्यर्थः। अमृतत्वस्य तु नाशास्ति वित्तेनेति च तत्रोक्तो वित्तसाध्यस्य कर्मणो
मृतत्वसाधनत्वाभावे लिंगमनुसंधेयं। न च विद्यांचेति समुच्चयविधानविरोधः। तस्य देवतोपास
नज्ञानेन कर्मसमुच्चयविषयत्वात् अन्यथा हिरण्मयेन पात्रेण। अग्ने नय सुपथेति मार्गयाचनानु
पपत्तेरिति सर्वमनवद्यं। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। त्याग एव हि सर्वेषामो
क्षसाधनमुत्तमं। त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदमित्यादिश्रुतिस्मृतिभ्यां त्यागोपलक्षितमात्म प२
ज्ञानमेव मुक्तिसाधनं तस्मादिति प्रकृतार्थमुपसंहरति। तस्मात्त्याज्यं कर्म मुमुक्षुभिरिति। मुमु
क्षुभिः साधनचतुष्टयसंपन्नैरात्मतत्त्वजिज्ञासुभिरित्यर्थः। विविदिषोरपि नास्ति कर्मावसरः

वितप्र२

कुतो विदुष इत्यभिप्रायः॥ अत्राईश्लोकोधिकः॥ गुरूक्ताधिकार्येन संख्येयः॥ २०॥ नदेवंमुमुक्षुणाम
र्वकर्मसं न्यासपूर्वकं ज्ञाननिष्टेन भ्रंमितिन्यायेनोपपादेदानींपरोक्तं दृष्टांतमनूद्य दूषयति॥ अ घ२
ग्निष्टोमवदिति॥ ॥ अग्निष्टोमवदित्युक्तं तत्रेदमभिधीयते॥ २१॥ अर्द्धश्लोकेन दूषणमुच्यत
इति प्रतिज्ञायश्लोकेन दूषणमाहानेकेति॥ ॥ नेककारकसाध्यत्वात्फलान्यत्वाच्च कर्मणः॥
विद्यातद्विपरीतातो दृष्टांतो विषमो भवेत्॥ २२॥ कर्मणो ग्निष्टोमादेरनेककारकसाध्यत्वा
न्नियतमंत्रतत्रप्रयोगसाध्यत्वादितियावत्॥ तथा फलान्यत्वात्फलभेदवत्वात् यदेव विद्ययाक २४
रोति श्रद्धयोपनिषदा तदेववीर्यवत्तरं भवतीति श्रुते विद्याद्वारावीर्यवत्तरफलविशेषसंभ
वाच्च युक्तासहकार्यपेक्षेत्यर्थः॥ नैवं विद्यायाइत्याह विद्येति॥ तद्विपरिताकर्मस्वभावविपरीत
स्वभावेतियावत्॥ यथावस्तुधीनप्रमाणनिबंधनार्यनिरतिशायमोक्षेकफ जायाविद्यायानस

ष्पा२ प४

हकार्यपेक्षायुक्तेत्यर्थः॥ पत एवंस्वभावभेदः कर्मविद्ययोरतो ग्निष्टोमदृष्टांतो विषमो दार्ष्टीतिकानंरू ञ्२
पोभवेदित्यर्थः॥ २२॥ वैषम्यमेवोपपादयति॥ कृष्यादिवदिति॥ ॥ कृष्यादिवत्फलार्थित्वादन्यकर्मो
पबृंहणं॥ अग्निष्टोमस्त्वपेक्षेत विद्यान्यत्किमपेक्षते॥ २३॥ अग्निष्टोमः सातिशयः साध्यफलार्थत्वात्स
ड्री४ कर्मोपबृंहणमन्यैः कर्मभिः सहकारिभिर्विहितोज्योतिष्टोमांगसंश्रितोपासनादिरूपोपेक्षेतेतियो
जना। तत्र दृष्टांतः॥ कृष्यादिवदिति॥ कृषिवाणिज्यादौ फलोपचयार्थं साधनविशेषोपचयः प्रसिद्ध इ
त्यर्थः॥ विद्यातु निरतिशयफलत्वादन्यसहकारिभूतं किं वस्त्वपेक्षतेन किमपीत्यर्थः॥ २३॥ यदुक्तमकु
र्वन्विहितं कर्मेति प्रत्यवायस्मृतेश्चेति तत्रोह॥ प्रत्यवायस्त्विति॥ ॥ प्रत्यवायस्तु तस्यैव यस्याहंका
र इष्यते॥ अहंकारफलार्थित्वे विद्येते नात्मवेदिनः॥ २४॥ अस्यकर्मणोहं कर्तास्य तत्फलं दरफलं नोस्य इति
यस्याहंकार इष्यते इष्टो भवति स्वाभाविको वर्त्तत इतियावत्॥ तस्याधिकृतस्य विहिताकरणे प्रत्य

वाप्योभवेदित्यर्थः। आत्मवेदिनः आत्मतत्त्वज्ञाननिष्ठस्य अहंकारफलार्थित्वेनाविद्येते विषया
भावादत्तोनिमित्ताभावान्नवृत्त्यभावस्तस्येत्यर्थः॥२४॥ विवेकाज्ञानहानायनकर्मप्रतिकूलत
इत्थं पक्षस्येवताग्र्येनकर्मणः स्नानं त्रेणवाज्ञानसहकारितयावासर्वथानसात्ता
मोक्षहेतुत्वमस्तीत्युपपाद्य ब्रह्मविद्यामथेदानीं वक्तुं वेदः एवं क्रमइति परमप्रकृतमुपसंह
रति। तस्मादिति॥ ॥तस्मादज्ञानहानाय संसारविनिवृत्तये। ब्रह्मविद्याविधानाय प्रारब्धो
पनिषदियं॥२५॥ विद्यायाः कर्मनिरपेक्षित्वं तत्रेष्टार्थः। अज्ञानहानायानाद्यज्ञाननिरासमसिद्धये ई
पेक्षितब्रह्मविद्याविस्पष्टं संपादयितुमियंपरोपनिषद्वेदान्तभागः प्रारब्धेतियोजना। अज्ञानहा १५
नस्यविशेषणं संसारविनिवृत्तय इति संसारस्य विनिवृत्ते यस्मादिति विग्रहः॥ अक्लीबत्वमार्षं॥ अ
त्रोपनिषच्छब्दः लक्षणयावेदान्तग्रन्थेषु प्रयुक्तः॥२५॥ तर्हि कोस्य मुख्योर्थ इति वीक्षायां ब्रह्मविद्यायां

राश्रसामर्थ्यं दर्शयितुमुपनिषच्छब्दस्य व्युत्पादनेनापि स्वतंत्रैव विमोचयेदेतदिति सूचयति सदेरि
ति ॥ ॥ सदेरुपनिपूर्वस्य क्विपि चोप   निषद्भवेत् मंदीकरणभावाच्च गर्भादेः शातनात्तथा
॥२१॥ षद्लृ विशरणगत्यवसादनेष्विति धातोरुपनीत्युपसर्गद्वयपूर्वकस्य क्विप्प्रत्ययांतस्योप
निषदिति रूपं। अस्य त्रयोऽर्थाः। तथाहि ये मुमुक्षवो ब्रह्मविदस्तेषां गर्भजन्मजरादिकमुपनिष
त्स्यति शिथिलीकरोतीत्युपनिषदित्येकोऽर्थः। जितात्मा सोऽश्नात्प समीपे निश्चयेन ब्रह्म गमयतीति
४ प द्वितीयः। तत्त्वविदां तु गर्भादि नाशयत्येवेति तृतीयः। एवं सम्यगर्थयोगाद्विद्यैवोपनिषदुच्य
ते। तादर्थ्याद्ग्रंथोऽप्युपनिषदुच्यते। लांगलं जीवनमितिवदित्यर्थः ॥२२॥ ॥ इति चैतन्यप्र
करणं ॥ ॥ इत्युपोद्घातप्रकरणं प्रथमं विवृतं ॥ ॥ चैतन्यप्रकरणमिति टीकांतरे ॥ ॥ तदेवं मु
मुक्षोर्मोक्षसाधनब्रह्मात्मविद्याप्रतिपत्तये वेदांतारंभ उपपद्यत इति स्थिते पुनराशंकां तानुदि

DR. BHAU DAJI

विरोधाय वेदांतारंभस्तदोपपद्यते यदि विरोधः संभाव्येत नमश्शात्मनि संसारित्वमारूपकब्रह्म
त्वादि विरोधाद्वाकाशतेनापि नोत्पादयितुं शक्यते। असंजातविरोधितया संसारादेर्बलवत्त्वा
त्तदुपजीविनश्चागमस्य दुर्बलत्वात्कथं विदुत्पन्नापि विद्या यदि प्रमाणसिद्धं संसारं बाधेत तर्हि
ब्रह्मगात्मनोऽपि ब्रह्मरूपत्वं कथं ब्रह्मत्वानुभवो न बाधेतेति अत उत्तरं वदति ॥ प्रतिषेद्धुमशक्यत्वा
न्नेति नेतीति शेषितात् इदं नाहमिदं नाहमित्य   द्धा प्रतिपद्यते ॥२॥ नेति नेतीति वीप्सया सकलद्वैतप्रतिषे ति५
धेऽपि न मुर्षरितं प्रत्यगात्मत्वं तस्य प्रतिषेधावधित्वेन प्रतिषेद्धुः स्वरूपत्वेन प्रतिषेधमाप्तितया वस्थितं य
तोऽतः प्रतिषेद्धुमशक्यत्वादस्मात्मात्मेति प्रपद्यते निःसंदिग्धमुपलभ्यत इत्यर्थः ॥ उपलंभप्रकार
माह नयति। इदं देहरूपं नाहमात्मा इदमिंद्रियजातं मनो बुद्धिः प्राणान्तु पादानाचेतनपर्यंतं नाहं किं
त्वशेषप्रकाशक   मन्यनिरपेक्षं स्वयंप्रकाशं कूटस्थमंतरं यस्मिन्सर्वं जगदाश्रयेत्यारूढताकाश इति

ज्ञोऽतस्य तदेवाहं परमम् न्तरमिति प्रतिपद्यत इत्यर्थः ॥ अनेन विद्या नोदेतीत्येषा शंका निरस्ता
ता प्रतिषेद्धुमशक्यत्वादित्यनेन तु यथा व्याख्यातेन बाध्ययोग्यत्वं दर्शितमिति विवेक्तव्यं ॥ नन्वहं
ब्रह्मेति ज्ञानं मुक्तिविधयोत्पन्नमपि न प्रतिष्ठां लभते ॥ देहेंद्रियादिष्वभिमानस्यानवरतमनुवृत्तेरित्या
शंक्य तस्य प्रमाणमूलत्वाभावाद्बाधितानुवृत्तिमात्रत्वमावेद्य आत्मविद्याप्रतिपन्नत्वमित्यभिप्रेत्य वाक्यो
त्थप त्थज्ञानस्य प्राबल्यमुपपादयति ॥ देहधीरिति ॥ ॥ देहधीरिदमात्मोत्था वाचारंभणगोचरा निषिद्धात्मोद्भ १७
वत्वात्सा न पुनर्मानतां व्रजेत् ॥ ४ ॥ देहादाव नात्मन्यात्मबुद्धिरहंधीरित्युच्यते साहं कर्तेतिरिदमत्यात्मसूर्वपू
र्वाहंकारवासनावासितांतःकरणरूपादिदमात्मनः सकाशादुत्थिताध्यासात्मिकेत्यर्थः ॥ अस्वरूपत्वा
त्स्यादौर्बल्यमुक्त्वा विषयत्वेनेदादपि तद्दाह ॥ वाचारंभणगोचरेति ॥ निरूप्यमाणं स्वतःसत्ताहीनमपि
यदपरोक्षव्यवहारगोचरं लभ्यमानमभ्यते तद्वाचारंभणमनृतं जडं नानारूपं तदेव गोचरो विषयो

यस्याः सा तथा यत एवमतो नेति नेतीति शास्त्रेण निषिद्धो बाधित आत्मा स्वरूपमुद्भवः कारणं
यस्याः सा निषिद्धात्मोद्भवा तस्या भावो निषिद्धात्मोद्भवत्वं तस्मादिति विग्रहः ॥ सा पुनर्देहधीरात्मयाथा
त्म्यज्ञानानंतरं मानतां प्रमाणत्वं न व्रजेन्न लभेत ॥ अवस्तुत्वादवस्तु अवस्तुविषयत्वाच्च स्वप्नावस्थाज्ञा
नवदित्यर्थः ॥ अतो वाक्योत्थज्ञानमेव प्रबलं न तु देहधीरिति भावः ॥ ४ ॥ इदानीं पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति
न्यायेन प्रथमोत्पन्नाया अपि कर्तृत्वादिधियः उत्तरेण ब्रह्मात्मज्ञानेन बाध्यत्वमुपपादयति ॥ पूर्वबुद्धि
मिति ॥ ॥ पूर्वं बुद्धिमबाधित्वेनोत्तरो जायते मतिः ॥ दृष्टोऽरेकः स्वयं सिद्धः फलत्वात्स न बाध्यते ॥ ३ ॥ महदु
त्म ज्ञानमनात्मज्ञानं बुद्धिमबाधित्वा अभिभूय किं धीः कर्तृत्वादिरेतत्पश्चात्कर्तृत्वादिबुद्धिमबाधित्वात्मतत्त्वज्ञानं
मुत्तरमुत्पद्यते ॥ अतः प्रसक्तनिषेधात्मकत्वाद्बाधस्य पूर्वसमये तत्र प्रसक्तत्वाभावान्न पूर्वेण तस्य
बाध्यः किंतु परेण पूर्वस्य प्रसक्तस्य बाधः इत्यनवद्यं ॥ पदार्थबोधेष्वीक्ष्यमाणानां तरसापेक्षत्वेऽपि न

वाक्यार्थबोधे तदपेक्षा। पदार्थबोधेपि अववादरमात्रस्यैवापेक्षणात्पूर्वबुद्धेर्व्यवहारांगत्वं। शास्त्रोत्त
रेणात्मज्ञानेन तद्बाधनाच्च नोपजीव्यविरोधश्चेति द्रष्टव्यं। किंचोपनिषदात्मज्ञानमेव तत्त्वावेदकम
न्ये त्वबाध्यार्थत्वादित्याह। दृशिरिति। ब्रह्मात्माकारांतःकरणवृत्तिप्रतिफलिता परोक्षस्फूर्तिर्दृ
शिरित्युच्यते। स चैकः परात्मभावेनोपलक्षितो द्वितीय इति यावत्। स्वयंसिद्धः परनिरपेक्षसत्तास्फू
र्तिकः स न बाध्यते उक्तैर्विशेषणैर्नाध्यायोग्यत्वावगमात्फलश्चास्य ज्ञानादिकं न बाध्यते। तस्य सर्व
प्र.४ ज्ञानसाधारणत्वात्सर्वव्यवहारहेतुत्वं कार्यत्वाच्चेत्यर्थः। नित्यसिद्धस्याप्यस्य फलत्वं विषयाकारवृ १८
त्तिव्यक्तत्वापेक्षयोपचर्यत इति भावः॥३॥ एवं ब्रह्मात्मज्ञानस्य वाक्यादनुत्पत्तिशंकामुत्सन्नस्य प्राबल्यो
पपादनेन पूर्वग्रहसंगस्य ज्ञानादि निर्बाध्यार्थत्वशंकां चोन्मथ्येदानीं कथमिदमुत्पद्यतामिति वीक्षायां प
दार्थपरिशोधनेनेति श्लोकद्वयं तेनोपपादयति॥ इदं वनमिति॥ ॥इदं वनमतिक्रम्य शोकमोहादिदू

द्रष्टा०१ मार्गान्तमतिक्रम्य यन्मात्रमाचार्यादिवगम्यान्वयव्यतिरेकाभ्यां वनया पदार्थशोधनेन
देहादिकमनात्मं तया त्यक्त्वा स्वरू

षितं वनाकांक्षारकायकृच्छ्रात्मानं प्रतिपद्यते॥५॥ इदं शरीरमेव वनमिव वनं रागद्वेषशोकमोहा
दिनिर्व्याप्ततस्करादिस्थानीयैर्दूषितमात्मानं सर्वानुस्यूतमनपोह्यं प्रतिपद्यते अहं ब्रह्मास्मीत्यौ
पनिषदं पुरुषमवगच्छतीत्यर्थः। यथा गांधारको गांधारदेशवासी पुरुषो बद्धचक्षुरेव तस्करैरानी
य महावने निक्षिप्तः स बंधमोक्षार्थी नरः क्रोशं कुर्वन्केनचित्कारुणिकेनोपलब्धस्तेन मोचितबं
द्र।५ धो दर्शितस्वदेशमार्गो ग्रामाद्ग्रामं गच्छन्पंडितो मेधावी च नातत्त्वदेशं प्रतिपद्यते। तथायमपि सं
सारी अविद्यारागादितस्करैर्मिथ्याज्ञानपटेन विवेकदृष्टिमाच्छाद्य स्वदेशाद्दूरारण्यं प्रवेशि
तो बंधमोक्षार्थी कदाचित्केनचित्कारुणिकेन वक्त्राचार्येण ब्रह्मविद्यास्वाजितमिथ्यादृष्टिपटः उ
पनिबोधितस्वदेशब्रह्ममार्गोन्वयव्यतिरेकाभ्यां स्वयमूहमानः स्वमात्मानमधिगच्छतीत्यर्थः॥५॥ ॥
॥इति प्रतिबोधप्रकरणं॥ ॥आत्मज्ञानोत्पत्तिविधिप्रकरणं द्वितीयं विवृतं॥२॥ ॥प्रतिषेधप्रकरणमित्यत्र॥

पेयं ब्रह्मविद्या इति पादि नास्मां एकान्नामानं ब्रह्म किं प्रत्यगात्मनो भेदेन प्रत्येतव्यं तदभेदेन वेति द्वा
सुपर्णा सयुजे   त्यत्र भेदश्रवणात् परमात्मा ब्रह्मेत्यभेदश्रवणाच्च संदेहे निर्णयकारणं श्लोकं रचयित्वा
तं विषयमर्थं स्पष्टयति। ईश्वर इत्यादिना॥ ॥ईश्वरश्चेद् नात्मास्यान्नामावस्मीति धारयेत्। आत्मा चे
दीश्वरोस्मीति विद्या सा स्यान्निवर्त्तिका॥१॥ ईश्वरो जगत्कारणत्वेनोपलक्षितः परमात्मा सत्यज्ञानानं
तानंद रूपः। सचेदात्मभिन्नो मेघादिवद्विषयभूतः परोक्षो वा स्यात्तदा मा वीश्वरो ऽहमस्मीति मु १०
मुक्षुर्न धारयेदात्मानं तत्त्वेनोन प्रतिपद्येत ततस्तत्त्वमस्यादिवचनविरोधः स्यादात्मेति तूपगच्छंति
ग्राहयंति चेति न्याय विरोधश्च स्यादित्यर्थः। ईश्वर एवात्माहमस्मि नान्य इति चेद्धारयेद्विज्ञानीयात्त
दा न श्रुतिन्यायविरोध इति योज्यं। सा विद्या तिरोहितनैराकारप्रत्यग्ब्रह्मैक्यावलंबिनी अस्या त्र पर
विद्याया निवर्त्तिका समूलसंसारनिवर्त्तिकेत्यर्थः। ब्रह्मवेद ब्रह्मैव भवति। ब्रह्मैव सन् ब्रह्माप्येतीत्या

ब्रह्मज्ञानरसं०१

दि श्रुतौ ब्रह्मभावफलश्रवणात् न्यायवपन्नोऽस्ति तस्य नश्वम   वान्यस्यासंभावानुपपत्तेरेकस्तान
मेव फलवदिति तत्रैव तात्पर्यं न भेदे। तत्ज्ञानस्य फलश्चा इन्यो सावन्योऽहमस्मीति न स वेद इति नेद
दृश्यनिस्यमिदितव्यं न हे श्रुते स्तन्नावयविधाकल्पितनेदानुवादपरत्वात्तस्यार्थेतात्पर्यमिति न्यायः।
१। इतश्चाभेदे वेदतात्पर्यमाह। आत्मन इति॥ ॥आत्मनोन्यस्य चेद्धर्मा अस्थूलत्वादयो मताः
असेयत्वे स्यात्किं तैः स्यादात्मत्वेह्यस्यधीकृतिः॥२॥ अस्थूलत्वादयो धर्माः प्रत्यगात्मनोन्यस्य भिन्नस्येश्व
रस्य चेन्मता इष्टाः श्रुतास्तदा सेश्वरस्यानात्मभूतत्वादज्ञेयत्वे सति मुमुक्षोरस्थूलत्वादिभिः श्रौतैर्धर्मै
ः किं स्यान्न किमपि स्थूलोहं कृशोहमित्यादिस्वगतत्वं स्यान्निवर्त्तेरित्यर्थः। यदा चास्थूलत्वादिधर्मक
ईश्वरोहमस्मीति ज्ञायते तदा तस्योप्यात्मत्वे सति प्रतीचोऽन्यधीकृतिः स्यादात्मन्येव गृह्णी   ताया
स्थूलत्वादिधियो मोहमूलायाबाधसिद्धिः फलं स्यादित्यर्थः। शाकस्मिन्नाकारांतः श्रोतस्य

तिकार्यकारणात्मकजगदाश्रयत्वश्रोत्तरग्रन्थेनान्तरस्योपक्रमादेतस्यवाञ्छ ह्तरस्यव्यग्रासने
गागिड़ति। जगदीश्वरतया मध्ये परामृश्य इदृष्टि इत्यादिना तस्यैवाभावकथनपूर्वकमंतेनैतस्मिन्नु खलु
श्चत्तरेणार्पकाद्यश्रोत श्रोत श्चेत्कपसंहाराद्यीश्वरपरत्वाद्यासमणवाक्यस्याशेषस्यावधारितात् अना
न्परतोस्तिह्य इष्टोत्र भ्रष्टविज्ञाप्तिनिवद्धदृष्टत्वाधुपल तस्य प्रत्यगात्मनोन्तरब्रह्मानेद्दस्यावधारि
त इतीश्वरात्मनोरभेद एव शास्त्रार्थोपि तस्मात्प्रत्यगात्मनस्थूलत्वादिप्रतिषेधपरमिदं
वाक्यमास्थेयमत्र नितरा मिथ्येति॥ मिथ्याध्यासनिषेधार्थं ततोस्थूलादिश्रुतं परत्रतन्नि २०
षेधार्थमन्यता वक्ष्य निश्चितं ॥३॥ ततश्चास्या मिथ्याध्यासस्याज्ञानमूलस्य निषेधार्थं निर्दृष्टस्य अस्थू
लादि प्रत्यगात्माविशेषणत्वेन गृहीतं। विपर्ययेऽदोषमष्टः। परत्रेति। अस्थूलादिवाक्यं परत्र प्रत्यगात्मनो
न्यत्रस्थूलत्वनिषेधार्थं चेत्स्यात्तदा हि निश्चितं शून्यतावर्णनमेव तस्या तात्मनोन्यस्य ज उत्थात्त

स्य वस्तोत्म्यादिधर्मयोगान्निषेधान्तः पातित्वे सतीश्वरस्येश्वरत्वायोगान्निषेधमात्रमेतद्वाक्यं स्या
दित्यर्थः। तस्मादस्थूलादिधर्मकस्यानात्मत्वायोगादीश्वरमनुपगच्छतामेव सोन्मुपगतमग्रति
भाव॥२॥ किंच प्रत्यगात्मनोन्यत्रस्थूलत्वादिप्रतिषेधे च अप्राप्तप्रतिषेधो निःफलश्चापद्येतेति दोषां
तरमाह। बुभुत्सोरिति॥ ॥बुभुत्सोर्यद्यन्यत्र प्रत्यगात्मन इष्यते। अप्राणोह्यमनाः शुभ्र इति वा
नर्थकं वचः॥४॥ यदि प्रत्यगात्मनो बुभुत्सोरात्मतत्त्वं बोद्धुमिच्छोः संसारित्वेनाभिमतादात्मन इति वाक्य
मूलादन्यत्र देहेन्द्रियप्राणमनस्त्वरूपं मनिषेध इष्यते तदाप्राणइत्यादिवचनमनर्थकं निर्विषयं स्याद
न्यत्र प्राणादिप्रसक्त्यभावात्प्रतिषेधस्य च दृष्टार्थत्वादित्यर्थः॥४॥ ॥ईश्वरात्मप्रकरणरत्नायं किंत्वां
॥ननु यदि हमीश्वरान्नेरेनात्मनोस्तानंमोत्तमाधनमुक्तं तन्नोपपद्यते। संचितानेककर्मसद्भावात्कर्मणा
न फलावश्यंभावनियमान्नैः प्रतिबंधसंभवादिति तत्राह॥ अहं ब्रह्मेति॥ ॥अहंप्रत्ययबीजं यत्

DR BHAU DAJI

रहंप्रत्ययवर्जितं नाहंप्रत्ययवर्जः कथं कर्म प्ररोहतीति ॥ ५ ॥ अहमिति प्रत्ययोऽहंकारो नात्मन्यात्मा
त्रि मा नलक्षणः सबीजं कारणं यस्य कर्मणस्तदहंप्रत्ययबीजं । अहमिति प्रतीयते आत्मा यस्मिंस्तत्
करणे सा भासेतदहंप्रत्ययवत्तस्मिन्नहंप्रत्ययवति स्थितं संचितं यत्कर्मजातं तत्ताहंकर्त्रभोक्ता
किं तु ब्रह्मैवाहमस्मीति यः प्रमाणजनितः प्रत्ययः स एव वर्जितस्तेनोद्दिष्टं कथं पुनः प्ररोहति फला
भिमुखं जायेतेति योजना । तथा च श्रुतिस्मृती । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे । ज्ञानाग्निः २१
सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन इति ज्ञानोदयेनांतरीयकतया मूलाज्ञानस्य विरोधाद्देवनिवृत्ति
संभवात्तदा तत्कार्यतत्कारणस्यापि निवृत्तेराश्रयाभावे कर्मस्थितस्यायोगात्कुतस्तेन मोक्षप्रतिबंध
शंकेत्यभिप्रायः ॥ ६ ॥ ननु यथा ज्ञानवतोऽपि भिक्षाटनादिकर्म सफलमुपलभ्यते तथा तस्यादृष्टफ
स्त्र लमपि कर्मफलं स्यादिति कल्पतइति शंकते ॥ दृष्टवच्चेत्प्ररोहः स्यादिति ॥ ॥ दृष्टवच्चेत्प्ररोहः स्या

आन्यकर्मेष्यते । तन्निरोधे कथं तस्याः पृच्छामो वस्तूच्यतां । अपरिहरति । नान्यकर्मेष्यत
इति । नेति निषेधार्थः । स भिक्षाटनादि विदुषोऽव्यापारोऽन्यकर्मत्रिमस्त्रक्त्र फलं कर्म कारणं यस्य सोऽन्य
कर्म इष्यते ज्ञानाविरोधी प्रारब्धफलकर्मनिबंधनं हि भिक्षाटनादि नैवं विधिलक्षणं तस्य ज्ञानावि
रोधित्वादित्यर्थः । ननु ज्ञानाद्ज्ञाननिवृत्त्या तन्मूलाहंकारनिवृत्तिद्वारेण तदाश्रयकर्मनिवृत्तौ कथमार
ब्धमपि कर्म सिध्येद्यन्निमित्ता विदुषो भिक्षाटनादिकर्मप्रवृत्तिरिति पृच्छति पूर्ववादी । तन्निरोध इति ।
कर्माश्रयः प्रथमतच्छब्दार्थः । कर्म द्वितीयतच्छब्दार्थः ॥ २ ॥ उत्तरमाह । देहाद्येति ॥ ॥ देहाद्यारंभसाम
र्थ्यात्ज्ञानं सद्विषयं च यत् । अभिभूय फलं कुर्यात्कर्मेति ज्ञानमुद्भवेत् ॥ ३ ॥ सद्विषयं प्रमाणजनितत्वे
न प्रब लमपि ब्रह्मात्मविषयं ज्ञानं अभिभूय विदेहकैवल्यरूपात्फलात्प्रच्याव्य कर्मप्रारब्धं फल
लक्षणं स्वफलं देहाभासजगद्धा भासरूपं च यज्ज्ञानवत्यपि कुर्यादेव कुतः देहाद्यारंभवत्तेति समर्थ

वस्थाना ४

त्वादंते प्रारब्धकर्मफलभोगावसाने सति ज्ञानेन प्रतिबंधरहितेन मुमुक्षवे उद्भूतं भवति वर्गानकार्य
संपादकाविद्यालेशमप्यपबाध्याविद्यां संस्कारांश्चेत्कापयतीत्यर्थः ।३। ।ननु प्रारब्धकर्मविज्ञान
ज्ञानिनोपि भोगः स्यात्तत्र प्रारब्धकर्मतत्फलयोस्तस्मिन्नवस्थितिरिति कथमुपपद्येत ज्ञानकार्य
त्वाविशेषात्सर्वस्याज्ञानविरहेणोत्पुनरा श्रयाभावेनावस्थानासमंजसत्वादित्याशंक्य विशेषमाह ।आ
रब्धस्येति ॥ ॥आरब्धस्य फले ह्येते भोगो ज्ञानं च कर्मणः ।अविरोधस्तयोर्युक्तो वैधर्म्यं चेतरस्य तु
त्वे ४ ।४। भोगो ज्ञानं चैते हि यस्मादारब्धस्य कर्मणः फले ततस्तयोरविरोधो युक्तः इतरस्य अनारब्धस्य संचितस्य २२
क्रियमाणस्य वा कर्मणो वैधर्म्यं वैपरीत्यं विरोधस्तेनेत्यर्थः ।अयं भावः ।ज्ञानं हि स्वकारण
जायमानं शरीरादिमपेक्ष्यमेव जायते ।शरीरस्यागंतुकत्वानामंतर्वा च्छरीरादिकं तत्र ज्ञानका
रणं नुत्पद्यते अन्यकारणस्यात्र हेतुत्वायोगात् ।ततः कैश्चित्कर्मविशेषैः शरीरविशेषेण ज्ञानोत्पत्तियो

प्येव फलदानायारब्धे सति तमाश्रित्य ज्ञानहेतुकर्मणो ज्ञानमारब्धं तदुपगंतव्यं ।तथा चारब्धे
देहे तद्भोगस्यावश्यंभावित्वात् भोगप्रदकर्मारब्धशरीरमाश्रित्यस्य हेतुसमासादितं तज्ज्ञानेन स्व
फलमज्ञाननिवृत्तिं कुर्वदपि न सद्यो भोगैकनाशं देहारंभककर्माणि प्राविद्यालेशं निवर्तयत्तु प
भीव्यविरोधित्वाभावादिति नारब्धफलकर्मज्ञानयोर्विरोधः नारब्धफलानां तु कर्मणां अकर्त्रात्मत
त्वज्ञानोदयविरोधः ।देवकर्तृत्वस्वभावनिवृत्तावाश्रयाभावात् तेषामवोपपत्तेर्ज्ञानेन सहावस्थानमुप
पद्यत इत्यस्ति विशेषः ।तथा च ज्ञानिनोपि चेद्भोगो देहारंभककर्मनिबंधनोस्ति तर्हि तस्य
कदाचिद्देहात्माभिमानसंभवात्तदुद्भूतदुरित प्रतिबंधवशान्मोक्षानुपपत्तिरिति चेत्तत्राह
।देहात्मज्ञानवदिति ॥ ॥देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं ।आत्मन्येव भवेद्यस्य स नेच्छन्नपि
१ फे मुच्यते ।५। यथाविवेकवतोस्य लौकिकस्य देहे मनुष्योहमित्यात्मज्ञानं निःसंदिग्धमुत्पन्नं ।तथा

दे

मुख्यात्मन्येव देहाद्यहंकारपर्यंतस्मान्नित्रणि आत्मन्येव यस्य देहात्मज्ञानबाधक   मदमस्मिप
रं ब्रह्मैवेत्येवंरूपं निःसंदिग्धं भवेत्स यथोक्तज्ञानबलाद्दृनथरशोरुपनीत त्वाम्मुक्तिमनिछन्नपि
बलान्मुच्यत एवेत्यर्थः ॥ तथा चाविर्भूतात्मतत्त्वस्य पुनर्देहादिमानदेहभावान्तरगोहकोपि प्र
तिबंधक इति भावः ॥ तथा च श्रुतिः ॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्मा
णि तस्मिन्दृष्टे परावरावरइत्याद्या ॥ तथा च स्मृतयोपि ॥ बीजान्यग्न्युपदग्धानि न रोहंति यथा पु
नः ॥ ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संबध्यते पुनः ॥ यथा पर्वतमादीप्तं नाश्रयंति मृगद्विजाः ॥ तद्वद्ब्र 23
२ टी विदोषा नाश्रयंते कदाचन ॥ मंत्रौषधबलैर्यद्वज्जीर्यते भक्षितं विषं ॥ तद्वत्सर्वाणि कर्माणि जी
र्यंते ज्ञानिनः क्षणादिति ॥ ज्ञानिनः कर्मणा प्रतिबंधाभाववमुपपादितमुपसंहरति ॥ ततइत्यर्के श्री
केन ॥ ततः सर्वमिदं सिद्धं प्रयोगोस्मामिरीरितः ॥ सर्वमिदमिति प्रारब्धकर्माविरोधित्वोक्तिः

सिद्धं ऋक्ष्यक्रमाणा सिद्धमित्यर्थः ॥ प्रयोगउपपत्तिः ॥ ॥ इदं(मु)प्रस्यप्रकरणं ॥ ॥ इति तत्त्वज्ञानस्वरू
पप्रकरणं चतुर्थं विवृत्तं ॥ ॥ यदि ब्राह्मगुरुस्त्याब्रह्मात्मज्ञानममृतत्वंगमयेत्किमिति सर्वैरहंब्रह्मास्
मीत्यात्मरूपेन गृह्यते निसर्गत एव सर्वेषां परमपुरुषार्थार्थित्वादिति तत्राह ॥ मूढ्याशंकइति ॥ ॥
मूढाशंकोयथोदंकोनाग्रहीदमृतं पथा ॥ कर्मनाशनया कृतोरात्मज्ञानाग्रहस्तथा ॥ ५ अत्रेयमा
ख्यायिका ॥ उदंको नाम कश्चिद्दृषि भगवंतं महाविष्णुं तपसा तोषयित्वा देवरक्षितममृतं प्रार्थित
वान् तदा भगवता देवेंद्रं प्रत्युक्तममृत मस्मै दीयतामिति ॥ इंद्रस्तु विष्णोराज्ञां पालयन् अप्र
तकलशं नीचां मातंगवेषमास्थाय स्वबस्तिदेशे ककलशमुपनिधायोदंकाय दातुमास्थितः ॥ अ
मृतपानमाश्चस्यामृतपानमितिमन्यमानस्तदुदंकोपिवंजलमत्र्यत्राकयानजग्राहेति ॥ उदं
को मूढाशंकः सन् यथा नृतमेवप्रसन्नोपलब्धमप्यमृतं यथा नाग्रहीत् तदृतिलक्षितममृतमिदं टी० १

भ२

मिति । नश्यदीतबानुजातिनाना मयादि इति योजना । तथा जैनोर्लौकस्य वर्णाश्रमोपाधिविदितक
र्मिनां यथात्मत्रानस्यपयोः क्रम्यागृहस्तस्मिन्ननारस्य हस्त इत्यर्धयोजना । पदार्थस्वरूपाप
रिज्ञानं च शक्यकत्वान्मस्वरूपागृहणाकारणमिति भावः ॥४॥ ननु दृष्टांते देवदत्तस्य वेषान्यत्वमभूत
कलत्रास्य च भूत्रानायस्थाननिवेशानं च जातं तदभूत्तत्र गोत्वादिना भूताग्रहणात्कारणमासीत्त
तथात्मनो ब्रह्मभूतस्य न प्रकारणमस्तीत्यत आह ॥ बुद्धिस्थ इति ॥ ॥ बुद्धिस्थश्चलतीवात्मा ध्या
यतीव च दृश्यते । नौगतस्य यथा वृक्षास्तद्वत्संसारविभ्रमः ॥५॥ अनाद्यविद्ययात्मन्यध्यस्त बु २४
वलेत्वात् द्धौ लिंगशरीरे अभिमानित्वेनस्थित आत्मा तस्यां बुद्धौ चलतीव दृश्यते न वस्तुतश्चलत्यवि
क्रियत्वात् । तथा तस्यां ध्यायेत्यां निश्चलीभूतायां ध्यायतीव निश्चल इव दृश्यते न तिन्नासते
न वस्तुतो ध्यायति चलनाभावेन तत्र तियोगिकस्य निश्चलस्याप्यभावादित्यर्थः । तिकारबुध्य

विवेकाराशावेव संसार्यहमस्मीति विपरीतनिश्चयदोषात् स्वादिर्विरीर्यमाणमप्यात्मनो ब्र
ह्मत्वं न गृह्णाति लोक इत्यभिप्रायः ॥ अविवेकादन्यथा वृत्तिपक्षे दृष्टांत माह । नौगतस्येति ।
तद्धि इति दार्ष्टान्तिकोक्तिः ॥५॥ अक्रमेव प्रपंचयति । नौस्थस्येति ॥ ॥ नौस्थस्य प्रतिलोम्येन नग
नां गमनं यथा । आत्मनः संसृतिस्तद्वद्ध्यायतीवेति हि श्रुतिः ॥६॥ जलस्थाणां चलत्वं नावि
स्थितस्य जनस्य यथा नौगतिहिगवैपरीत्येन जलाशयतीरस्थानां नगानां वृक्षादीनां गमनं
विभात्वलेउपाध्यविवेकात् नद्दहसंमारिणोप्यात्मनः संसृतिरनुभूयतहस्य र्थः ॥ उक्तार्थानुवादि
ति२ नीश्रुतिं पठ ध्यायतीवेति हि इति । समसमानः सन्नुभौ लोकावनुसंचरति । ध्यायतीव लेलाय लेलाय
यतइत्यर्थः ॥ अत्र पं वित दृष्टांतानुगुणेन दार्ष्टांतिकं प्रपंचयन्नुदाहृतश्रुत्यर्थमाह ॥ ॥ चैतन्यप्रति पे२
।ं बिंबेनेति ॥ चैतन्यप्रतिबिंबेन व्याप्तो बोधो हि जायते । बुद्धेः शब्दादिर्भिर्मस्तेन मोमुह्यते जगत् ॥७॥
श्रुति३ नि

चैतन्यप्रतिबिंबश्चिदाभासस्तेन व्याप्तो ह्ययमर्थो बुद्धेर्बोधो विषयाकारा बुद्धिर्जायते। अतश्चिदा
भासाविवेकाद्दृश्यादिभिर्बुद्धिवृत्तिव्याप्तविषयैरित्थंभावे तृतीया। विषयभूतदेहाद्यात्मनाभा
सो भासनं स्फुरणमात्मनो भवतीति शेषः। यद्दृश्यादिनिर्भास इति पाठे तस्य तेन तदाबोध
विशेषणं दृश्यादिविषयस्य निर्भासो यस्मिंस्तथेत्युगमं। येनैवमेकस्या बुद्धेरहंकारे देहादि
श्लो ५ विषयचैतन्ययोः संश्लेषइव भवति। तेनान्योन्याविवेकनिमित्तेन जगत्तु जनोति मुह्यतीत्य
र्थः। यथा नौस्थः पुरुषो नावश्चलनं नानुभवति। अचलस्तु दृष्टेषु चलनमनुभवति। उपाधि २५
सामर्थ्यादेवं बुद्धिस्थदेहाद्यात्मभानमिवापन्न आत्मा तदीयं व्यापारं नष्टगमनुभवतीति
दाभासाविवेकात्तु चिदात्मनि विकारमारोपयन्ननुभवति मृषैवेत्येवं तथा यतीवेत्या
२ घि दिश्रुत्योक्तं। अतएव पाश्चिसामर्थ्यमिति साद्रिश्चितन्नमस्त्यभिप्रायः॥४॥ एवमविवेकाधीनेसं

माराधामेविविक्तपदार्थस्यवाक्यादहंब्रह्मास्मीति बुद्धिदृढस्फुरणेमुक्तिः फलिष्यत्यत। प्र
व २ दार्थविवेक"ताभावं मुमुक्षुणोत्पन्नं भेत्ताह। चैतन्यनास्यतेति॥ ॥चैतन्याभासतादात्म्याद्
थ्यचित्तदृश्यपत्वादहमंशावहाणे न परः सोनुभवो भवेत्। पा अहमोहंकारस्य चिदविद्धंश्चि
प श्लो ८ पस्य यच्चैतन्यनास्यताद्रूपतादात्म्यं चिदात्मनो विषयोपकेलेनतत्छेषूचमस्ति तदुभय मस्त्या
हंकारस्य संबंधितस्मिन्निदमंशस्यप्रहाणे विवेके सतिनभवेद्भास्यादिति योजना। तत्रयोनुभ
वः साक्षी परिशिष्टः स परः परमात्मा वाक्यादनुभूतो भवेदित्यर्थः। यद्वास्यादमोहंकारस्यचै
व ३ तन्याभास्यतादात्म्यं चित्तच्छेषचैवंपुनरस्ति तस्मादयमहंकारो नात्मेति वेद्यांश
प्रहाणे ततस्मिन्नस्मदर्थत्वाभिमानत्यागेनयोनुभवः स परआत्मेति निश्चयवाननुभवेदितियो
जना। अथवा मकाशार्थविषयः परः सर्वोत्तरोनुभवोऽहमोऽहंकारस्येदमंशप्रहाणे न दृश्य

DR. BHAU DAJI

करणेनानवेद्यसंबंधः। इदमनिदमात्मकस्याहंकारस्य संबंधी यदिदमंशोऽसावस्यान्वयव्यति
रेकागमापायितद्वदन्वयव्यतिरेकागमापायित इदंशान्वयव्यतिरेकालोचनरूपेणानन्तो
पबाधमति। अवशिष्टांशेन पोषणात्मेत्यनुभवो भवेदित्यर्थः। नन्वहमित्यवभासे इदमंशए
वनवकाशितस्य ग्रहणेन परोऽनुभवो भवेदित्याशंक्याहमाद्यावैतन्यभास्यतेति। ताद्र्थ्यं चेत्
सुषुप्त्यादावात्मनि भासमानेऽप्यहंकारस्यानवभासादनात्मत्वे निश्चिते मति जागरितादावागं
तुकत्वाच्चैतन्यभास्यता तस्य सिद्धा। अतः प्रतिभासत इदमंशाभावेऽपि चैतन्यभास्यत्वेन लक्षणेना २६
स्तीदृमाकारतेत्यर्थः। तथा ताद्र्थ्यमुपस्थितआत्मनि कर्तृत्वभोक्तृत्वादिव्यवहारनिर्वाहकतयाश्र
त्मशेषत्वमस्तीत्यर्थः। स्मादेवं तस्मादनात्मत्वलक्षणादिदमंशो विद्यतेऽतस्तद्ग्रहणेन ब्रह्मा
त्मानुभवो भवेदिति सर्वं समंजसं॥५॥ इति मूढाशंकप्रकरणं॥ बुद्ध्यपराध प्रकरणं पंचमं विद्व

तं॥ ॥मूढाशंकप्रकरणमित्यनन्तरं॥५॥ ॥१२॥ अथ विवेकवतो वाक्यादहं ब्रह्मेति ज्ञाने
भवतीत्युक्तं। तत्राहमित्यत्रेदमंशग्रहणेन साक्षिनस्य शोधनप्रकारः सूत्रोपायो निर्दिष्ट
तत्रासमर्थं प्रतिसूत्रलोपायेन पदार्थशोधनप्रकारमुपदेष्टुं प्रकरणमारभते। तत्र यस्वरूप
ग्रहणमंतरेणाहंत्वं न सम्भवेति। यथाऽग्नेरोष्ण्यं तस्य स्वरूपत्वादेव न विशेषणता यद्यपि त
थापि तथाविधस्यापि विशेषणत्वव्यवहारः कल्पितनेदमाश्रित्येति स्थिते आत्मनि सत्तास
ख्याचैतन्यानंदानामनपायान्न तेषां विशेषणत्वं किंतु स्वरूपत्वमेव स्फुरणं स्थूलः कृशो गौरो
हं मनुष्यः श्रोताहं द्रष्टा वक्ता कामी क्रोधी ज्ञानी कर्ता भोक्ता सुखी दुःखीत्येवंविधा निर्विशेष
णानि नात्मनः सच्चादिवत्स्वरूपभूतानि सत्यपीतमिसुषुप्त्यादौ तेषामनाभावादित्येव मा
मनः ८ घगुहत्यतस्य कूटस्थतावधेयेत्यनिषेध ८ यान्नतस्य विशेषणत्वाभावे दृष्टान्ता

ह ।। छिन्नात्मकेनेति ।। ।छिन्नात्मकेन हस्तेन स्वर्पणात्मा विशेष्यते ।। तथा विशिष्टेन सर्वेणाप्य-
नयेन विशेष्यते ।२।। यथायं दृष्टान्तस्तथा येन मनुष्यत्वादिना विशेष्यते तेन सर्वेण शिष्टे-
न स्वकहस्तातिरिक्तेन पादादिना वास्तवमात्मा न विशेष्यते यथा हस्तच्छेदानन्तरं हस्तवान-
हमिति न विशिष्टप्रत्ययः क्रियते ।एवमेव पादादिमान् मनुष्योऽहमित्यादि विशिष्टप्रत्य-
योन कार्य इत्यर्थः ।। ररेहद्वयसमवायिधर्माणां आत्मनि व्यभिचाराच्चैरात्मा विशेष्य-
न इत्येतद्य इत्युक्तमनूद्य फलितमाह ।। तस्मादिति ।। ।।तस्मात्स्वकेन हस्तेन तुल्यं सर्ववि- २७
शेषणं ।। अनात्मत्वेन तस्मात्तज्ज्ञो मुक्तः सर्वैर्विशेषणैः ।।३।। अनात्मत्वेन स्वकेन हस्तेनेति संबं-
बंधः ।। विमतानि विशेषणानि नानात्मत्वभावनानि विशेषणत्वात् छिन्नात्मकहस्तवदित्य-
र्थः ।। यस्मादेवं तस्मात्तज्ज्ञो ज्ञानवान् विवेकज्ञानवान् सर्वविशेषणैर्मुक्तः स्विन्नः सदानन्दमात्रा

करणावा विशेष्यत इत्यर्थः ।।३।। उक्तन्यायेन विशेषणानामनात्मत्वेपि नात्मनस्तद्विवेकोस्ति आ-
गमापायात्मा संबंधनैरंतर्यादित्याशंक्याह ।। विशेषणमिदं सर्वमिति ।। ।।विशेषणमिदं
सर्वं स्याध्वलंकरणं यथा । अविद्याध्यासतः सर्वज्ञानमात्मन्यसद्भवेत् ।।४।। इदं सर्वं विशेषणं
यथालंकरणमत्र कार्यसंबंधेपि न तन्नादात्म्य तद्धर्मविबुद्धिविषयस्तं साधुत्वेन तं युक्त- या ४
मिति यावत् ।। ६ तरथा आगमापायानुपपन्नेरित्यर्थः ।। तर्हि किं नो मनुष्योऽहमित्यादि
नादात्म्यावभासस्तत्राह ।। अविद्याध्यासत इति ।। मोऽज्ञादेव तथावभास इत्यर्थः ।। यस्मादविद्या-
तथानि ध्यास्तमेवात्मनीदं सर्वविशेषणमतो ज्ञाते आत्मन्यविद्यानिवृत्तौ सबाधितं कालत्रयेप्यविद्य-
अतं भवे मानं भवेदिति योजना ।। ज्ञाते आत्मनीत्युक्ते ज्ञेयत्वमात्मन उक्तमिति काश्चानुज्ञेयत्वे च विशेषणादि- तिशा २
२ वदनात्मत्वप्रसंग इत्याशंक्याह ।। ज्ञातेवेति ।। ।।ज्ञाते वात्मा सदा ग्राह्यो ज्ञेयमुत्सृज्य केवलः ।। अ-

द्र।१

हमित्यपि यद्गौणं स्वरूपं तथापेतां गसमंहि तत्र धाते यमुसत्यदृश्यांशापोहं कस्यायो ज्ञातासदा सर्वस्य स
एवात्मानन्यासां शाइति न्याशोध्यवसेय । किं लक्षणः केवलो नात्र विशेषणेनापि रहितइ
त्यर्थः । ज्ञातृत्वाद्युपलक्षितं चिन्मात्रमलुप्तप्रकाशस्वभावतया सर्वानुस्यूतं वस्त्वात्मेति विवेकतो
निश्चितं भवत्यतो भवेदिति भावः । अहमित्यनुभूयमानत्वात्कथं ज्ञातैवात्मेत्यत्र स्वतः आह
अहमित्यपीति । यद्यपीदमहमिति ग्राह्यमात्मरूपं मन्यसे तथापेतां गसंमच्छिन्नहमत्र संस्थित
नसुषुप्त्यादावात्मस्वभावमनेषहमित्यनवभासनादहमो व्यभिचारित्वे सत्यात्मस्वरूपत्वात्मत्वा २८
व२ योगादित्यर्थः ।४। आत्मनो अहं भवत्यनयोश्चानादेनु रादेरप्य विषयस्य कुतः सिद्धिरिति मुग्ध
शंकां दृष्टांतेन निराकुर्वन्नात्मनो न्यनिरपेक्षां स्वतः सिद्धिं साधयति । यावानिति ॥ ॥ यावान्स्यादि
प्र१ संयोगः सत्यतोन्यो विशेषणो विशेषप्रत्ययो भवति चेन्नाश्चित्रगुर्यथा ।५। अहमित्यत्र यावांश्चिद्व

त्मनि विशेषणवदपृथक्तत्रस्यात्सप्रत्ययः १

त्य२

शास्यवलक्षणेनेदमंशो योहंकारादिर्यत्र विशेषणं स्याद्यस्मिन्नवानुगतत्रिनासवत्यगात्मान्यो
विशेषणान्वेनाभिमतान्नहंकारादेः परो विशेषश्चेद्य स्सर्वेषां विशेषाणां व्यत्ययोप्याहत्रियं
स्मिन्निति विकल्पत्रे निर्विशेषश्चिएवं स्वरूपः स्वतः सिद्धोन्य निरपेक्ष एव सिद्धः स्फुरन्वर्तते इत्यपि दृष्टांत
ना । यथा देवदत्तो विशेषणभूताया श्चित्रगोरन्यतसंबंधात्प्रागेव सिद्धो न चित्रगोः संबंधस्त्वसिद्धिं
सपेक्षते । तथात्माप्यहंकारादिसंबंधात्प्रागेव स्वमहिम्ना सिद्धो नाहंकारादिकं [illegible] स्वसिद्धावपेक्षत
इति दृष्टांतदार्ष्टांतिकसंगतोर्थः ।५। ननु अहमो नात्मत्वे कथमहं ब्रह्मेति निराशत्व श्रुतिः निरूपपद्येते
त्याशंक्याध्यस्ताहंकारस्य मूलनिरन्वयार्थात् श्रुतिर्नाहंकारस्यात्मत्वं ब्रूते ति परिहरति । इद
मंशोहमिति ॥ ॥ इदमंशोहमित्यत्र त्याज्यो नात्मेति पंडितैः । अहं ब्रह्मेति शिष्टोंशो भूतपूर्वगतेर्गवत् ।६।
अहमित्यत्राहंकारावभासे य इदमंशः सनात्मा दृश्यत्वादिति निश्चित्य पंडितैस्त्याज्यस्तस्मिन्नात्मनि

भागेन कार्य इत्यर्थः ॥ तर्हि किं कथं स्फुरति निर्देशस्तत्राह ॥ अहमिति ॥ अहं ब्रह्मेति वाक्यार्थनिश्चयो
योऽहंकारात् रात्रिरुच्यते समनुभूतपूर्वगतेर्हेतोर्नविनाभूता संज्ञा शूर्वगतिः प्राप्तिस्तस्या इति विग्रहः
॥ अहंकारलक्षणं वस्तु तस्माज्जिरूपमहमिति श्रूयते च्छिरुच्यत इत्यर्थः ॥ ॥ इति छित्त्वाप्रकरणं ॥ ॥ इति
विशेषापोहप्रकरणं षष्ठं विवृत्तं ॥ ॥ एवं कृतान्वयव्यतिरेकस्य परिशोधितपदार्थतत्त्वस्य वाक्या
देव वाक्यार्थसिद्धिरनुपपन्न इति उपपन्नस्यानिर्धारितमर्थं स्वानुभवावष्टम्भेनास्य स्फुटीकर्तुं प्रकरणां
तरमारभते ॥ बुद्ध्यारूढमित्यादिना ॥ ॥ बुद्ध्यारूढं सदा सर्वं दुःखरूपं तथैव च ॥ मया तस्मात्परं ब्रह्म २९
सर्वज्ञश्चास्मि सर्वगः ॥ १ ॥ यस्मान्मया सर्वमध्यात्ममधिभूतमधिदैवमित्यादिलक्षणं यत्र तत्र वा जागरस्व
प्नयोरिहलोकपरलोकयोर्वा स्थितं तत्सत्यं त्यक्तादितः शास्त्रतो वाप्युपलभ्यमस्ति तत्सर्वं बुद्ध्यारूढं बुद्धिवृत्ति
कोटीकृतं सदा दृश्यते प्रकाश्यते तस्मादहं सर्वदुःखरूपविलक्षणत्वात्परं ब्रह्म प्रत्यगात्मा तेन ब्रह्मास्मि सर्वज्ञः सर्वा

र्थप्रकाशकः सर्वगो परिच्छिन्नश्चास्मीत्यर्थः ॥ १ ॥ ननु कथमेतावता सर्वज्ञत्वं पुरुषान्तर बुद्ध्या
रूढेष्वेव पुरुषान्तरस्यानुभवस्मरणयोरदर्शनवान् कस्यात्मनः सर्वार्थप्रकाशकत्वमसिद्धेरित्यत आह
यथेति ॥ ॥ यथात्मबुद्धिचाराणां साक्षी तद्वत्परेष्वपि ॥ नैवापोढुं न वादातुं शक्यस्तस्मात्परोऽप्यहं
॥ २ ॥ आत्मनि सर्वव्यवहारस्य व्यक्तिः कथं आत्मसंबन्धिनी बुद्धिरात्मबुद्धिस्तस्याश्चाराः प्रचाराश्चेष्टितेषु
आत्मबुद्धिचाराः अध्यात्माधिदैवस्थूलसूक्ष्मदेहात्मकास्तेषां साक्षी स्फोरकोऽहं यथा तद्वत्तथा परे बु
परकीयबुद्धिचारेषु अहं साक्षी साक्षित्वे हेतुः प्रमाणेन अभावात् ॥ मय्येव सकलं जातं मयि सर्वं प्र
तिष्ठितं ॥ मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहमित्यादिश्रुतेर्मय्येवैकस्मिंश्चिरेकरसे आत्मनि
सर्वप्रमाणानां बुद्धितदाचारगोचरस्य प्रपंचस्य कल्पितत्वावगमाच्च युक्तं मम सर्वसाक्षित्वमित्यर्थः ॥ यस्मादे
वमहं सर्वसाक्षित्वेन सर्वाधिष्ठानत्वेन सर्वत्रानुगतश्च तस्मात्परोऽहमयमस्य दृष्टान्तमनन्यत्वेनासी

तिवा निराकर्तुं नैव शक्यः । केनचित्तचैवाद्गतं ज्ञानेन क्रियया वा प्रकाशयितुमुत्पादयितुं वाकृष्टुं ना
शाकोऽहि यस्मादहं ग्राह्यग्राहकादिप्रपंचविलक्षणस्तस्मात्सरः परमात्मैवेत्युपसंहारः ॥२॥ ननु
बुध्यारूढं चेत्सर्वं प्रकाशयते तर्हि तेन तदा तन्निक्रियाकर्तृत्वादिदोषप्रसक्तस्तस्मान्नास्य च वसंग इति शं
कां निरस्यति ॥ विकारीति ॥ ॥ विकारित्वमशुद्धत्वमनित्यत्वं नचात्मनः । अशेषबुद्धिसाक्षित्वात्
बुद्धिवच्चाल्पवेदना ॥३॥ आत्मनो न विकारित्वं बुद्धिवत्सावयवत्वाभावात्सर्वविकारसाक्षित्वाच्च नतदा
वनात्मनोऽशुद्धत्वं क्रियागुणयोगित्वमस्ति सकलगुणक्रियावद्वस्तुसाक्षित्वाच्च । नाप्यनित्यत्व ३०
मात्मनो रूपादिहीनत्वात् । किंचनात्मनो बुद्धिवदल्पवेदना । यथा बुद्धेर्बुद्धितत्त्वसंगादिविषया
वेदनास्ति । नैवमात्मनोऽशेषबुद्धिसाक्षित्वात्सर्वबुद्धिस्वरूपतद्विकारादिसाक्षित्वादित्यर्थः ॥ अथात्मनि
विकार एवात्मा कथं तर्हि सर्वार्थप्रकाशक इत्युच्यते इत्याशंक्य लोकप्रसिद्धदृष्टान्तेनाविवि

कारस्यैव प्रकाशकत्वमुपपादयति ॥ मणाविति ॥ ॥ ॥ मणौ प्रकाश्यते यद्वज्जपाद्याकारता
सातपे । मणिसं दृश्यते सर्वमातपेनेव तन्मया ॥४॥ मणौ स्फटिकादिलक्षणे जपाकुसुमादिरूप
काद्याकारता आतपे सूर्यालोके सत्येव प्रकाश्यते गृह्यते यद्वत्तथा मयि स्वेत्रस्वे आदिसंस्थानीवि
ध्रमान एव स्फटिकादिस्थानीयायां बुद्धौ जपाकुसुमादिरक्तादिस्थानीयं सर्वं विषयजातं सर्वा
तेतत्स्मादातपेनेव निःप्रकंपेन मया सर्वं प्रकाश्यते । न बुद्धिवद्विकारवत्तया । पि बुद्धिरेवन्न्यूना
चेवं मति बुद्धेरनुपयोग एवाच्चेतनस्य विषयविशेषाकारत्वापादनाय तदुपयोगादिति ॥४॥ इदानीं
मल्पगालेनो द्वितीयश्लोकमुपपादयन्तस्य चकृतकृत्यतां दर्शयति ॥ ॥ बुद्धाविति ॥ ॥ बुद्धौ दृश्यं न बुद्ध
बुद्धौ सत्यां नास्ति विपर्यये । द्रष्टा यस्मादग्राह्यस्तस्माद्द्वैतं न विद्यते ॥५॥ जाग्रदादौ बुद्धौ सत्यां
स्वाविषयाध्यस्ताध्यां बुद्धौ समारूढं दृश्यं द्वैतं न वेद्यं न वेद्या । नास्ति विपर्यये बुद्ध्यावस्थायां स्वापा

D. BHAU DAJI

वतर

रोदस्वरूपेनास्ति   अतस्मात्सालमध्ये भमाणानावारिस्यर्थः॥दृष्टान्तमाह॥ नीलदासवस्त्रिप्पवस्त्राम
नुष्टेवन दूरपस्य सलांम्ब भिवरति।यस्मादेवं सतः प्रकाशमानस्याव्यभिचारस्तद्यभिचारिणा
स्वसत्वानुपपत्तिस्तस्माद्द्वैतं न विद्यत इति नित्यशुद्ध एव प्रत्यगात्मेत्यर्थः॥५॥यद्यपि द्वैतं संस
र्गक्रितमशुद्धत्वमात्मनोनास्ति द्वैतस्याभावात्तथापि विद्याविद्याभ्यामसंबंधादशुद्धिर्न विष्पती
५ विद्या॥ त्याशंक्याबुधेरेवविद्येनात्मनस्तत्संसर्ग इति शुद्ध एवात्मेत्याह॥ ॥अविवेकादिति॥ ॥अविवेकात्परा
नावं यथाबुद्धिरेव तथा॥ निविकात्परादन्यः स्वयं वापि न विद्यते॥६॥ न विद्यते विवेको नेदो भास ३१
मानतया यस्मिन्सो विवेको देहादावात्मबुद्धिर्विपर्ययज्ञानमिति यावत्तस्मादविवेकात्परस्मादस
सारिणः सर्वसाक्षितया विविक्तस्यात्मनः मविद्यमानतया यथाबुद्धिरेव द्विदित वर्तती॥ अत्र बुध्यध्या
सादेवविदात्मनोपि भ्रांतियोगात्साभासा बुद्धिरेवाज्ञानविपर्यासाश्रय इत्संगोरुत्मयथा

बुद्धिरेवेदित्यकर्मितिदृष्टव्यं।तथाविवेकादनुत्रनात्मापवादेनात्मनः स्वभावनिर्धारणं विवेक
स्तस्माद्विवेकादूर्ध्वंपरादृष्टसंसारिणः परमात्मनोन्यो जीवः संसारी न विद्यते स्वयं चापि सा नाना
बुद्धिरपि सनिदर्शनान विद्यते।तदा प्रत्यग्ब्रह्मलक्षणनूतत्वात्सर्वस्येत्यर्थः।तथा चश्रुतिसम्यग्ज्ञा
नयोर्विद्याविद्यासूपयोरपिबुद्धितंत्रत्वान्नात्मनोऽशुद्धिगंधोपीतिभावः॥६॥ ॥इति बुध्यारूढ
ठप्रकरणं सप्तमं॥ ॥इतिबुध्यारूढप्रकरणंसप्तमं विद्दृतं॥ ॥७॥ ॥ ॥श्री॥ ॥७॥
॥शुभंभवतु॥ ॥कल्याणमस्तु॥ ॥ ॥७॥ ॥श्री॥ ॥ ७ ॥ ॥७॥ ॥

बुध्यारूढत्वकरणं ॥७॥ ॥इति बुध्यारूढत्वकरणं सप्तमं विवृतम् ॥७॥ ॥श्रीमत्सुंदरनिर्णयतम् ॥ग॥ ॥न
नु विषयविषयोर्या हि बुद्धिगतत्वं तदिहिंसा रव्यसिद्धांत स्वसंगत्वेहि बुद्धिरेव पुरुषस्याण्वगर्थिनो गार्थं विज्ञा
ना शानरूपत्वात्मावरतोस्याशोकामपनुदन्नुपूर्वत्वानुभवानुरोधेन साक्षितमेवब्रह्मात्मज्ञानमात्ममनः
स्वबाह्यात्मके नश्वकरणांतरेण द्रढयति ॥ विविसिद्धरूपइति ॥ ॥ चिति स्वरूपे स्वत एव मेमतेरस्याद्दि
यो गस्तव मोहकारितः ॥ अतो न किंचित्त्वच्चेष्टितेन मे फलं भवेत्सर्वविशेषहानतः ॥१॥ रस्माद्दियो
गो रागादिनि बंधनो मोक्षत्वादि संबंधः मोक्षो विवेकः । फलितमाह ॥ अतोनेति ॥१॥ यस्मात्स्व ३२
वि विशेषहानिर्दिस्ताज्वच्चेष्टितेन ममानाधेयातिशयस्य किमपि फलं नास्ति तस्मात्त्वं वोपश
म एव युक्त इत्याह ॥ विमुच्चेति ॥ ॥ विमुच्य मायामयकार्यतामिहप्रशांतिमाप्याधमदीहिता
त्सदा ॥ अहं परं ब्रह्म सदा विमुक्तवत्तथाजमेकं द्वयवर्जितं यतः ॥ मायामयकार्यतां मिथ्याचेष्टितं

विमुच्यासदीहिताज्ञिरर्थकिवयासात्प्रशांतिंनृशामसिहमपि स्वत्यगात्मनि ॥ आयाद्दिप्रानुष्ठि
अनमापामयचेष्टितासदीहितत्वाहव्यामविद्यानिबंधनत्वस्यसूचितत्वात्संरव्यमतशंकानि
रवकाशहितावेदितव्या ॥ ननु किमिति प्रत्यगात्मनि मनसो लयः क्रियते तत्स्वानादिलक्षणे
त्वेणेवकस्मान्नो व्यतइत्याशंक्याह ॥ सदा ॥ अहं परं ब्रह्मेति ॥ यतःसदैवाहं ब्रह्मैव तथा सतिस
दा विमुक्तवन्मुक्तश्वास्मि न तु मे मुक्तिर्बंधनाशादिति योजना ॥ अजत्वादिशेषणं जन्मादिस
मस्तविकारसंतिषेधार्थं ॥ अतएकं सदैकरूपमित्यर्थः सजातीयभेदरहितं वाद्वयवर्जितं विजा
तीयभेदाहीनमित्यर्थः ॥ अतो मय्येकीभूतं ब्रह्मण्येव तद्देकीभूतमिति स्थितेन परं ब्रह्म सर्वएक
नवं तीतिस्फाति विरोधइति भावः ॥ अपरायां जनाहे भवेत्प्रमत्सुस्वतः स्वरूपशस्त्वेषु देहेंद्रि
यविषयेषुपरीहितमनिवर्पितं दृष्टमदृष्टं वा फलं तस्मात्सदीहितात्सदा जाग्रद्दशायामपि

ग्रस्तास्यामिति चेन्नाहं कदापि चालयितुं त्वया ५

नशांति ग्रस्तम मायाहितदृष्टिमपारं परित्यजेत्यर्थः॥ उपशांतापित्वं नैवात्मानं धारयेत्स्या
हं। विमुच्येति॥ कार्यतां बुद्धिरूपकार्यात्मतां विमुच्य विहाय मायाकारणरूपमयमपगच्छत
हा त्मिकानवा। तर्हि तद्रूपेणास्थितापुनरूपविष्यामीति चेन्नाह॥ ग्रहेति। ग्रहमस्वरूपगात
र यन्न विरां कारणरूपतां विहाय तत्प्रायः पीतो दृकविंदुवन्मरूपग्रस्तामवेत्यर्थः। कथमहं मुख्या
तः कवलीकृतब्रह्मांडकोटिमपि तत्तत्र चाल्पमाने न त्वया शक्यास्त्वज्ञातिमात्रमेतद्दित्यन्निभेत्या
द॥ अहं ब्रह्मेति॥ यतोहं सदा परं ब्रह्म अयमात्मा ब्रह्मेति श्रुतेरिति योज्यं॥ विमुक्त इति ३३
ब्रह्मविशेषणस्वार्थेति श्चितः॥ विमुक्तं नित्यमुक्तमेवेत्यर्थः। तथा यथा श्रुत्युक्तं तथेत्यर्थः। व्या
ख्यातमन्यत्र॥ २॥ ननु अजादि प्रतिपादकश्रुत्या ब्रह्मणो निर्विशेषतया नित्यमुक्तत्वेपि कृष्ण
मात्मनो देहादिविशिष्टस्य निर्विशेषतया ब्रह्मरूपता संभवत्येतत्राह॥ सदा च भूतेष्विति॥

॥ सदा च भूतेषु समोस्मि केवलोयं यथा च खं सर्वगमक्षरं शिवं। निरंतरं निष्कलमक्रियं परं ततो
न मेस्तीह फलं तवेहिते॥ ३॥ चशब्दोवधारणार्थः। अहं केवलो विद्यातत्कार्यरूपविशेषणरहि
तः सर्वेषु भूतेषु सम एवास्मि उपाधिपरामर्शमंतरेणाभिव्यक्तिविशेषोद्रेखाभावादित्यर्थः। स
ते ४ र्वभूतस्थस्याप्यसंगत्वान्नवयानिर्विशेषत्वे दृष्टांतमाह। यथा च खमिति। आकाशस्यासंगत्वा
देः प्रसिद्धत्वान्नतस्यापि कुंभकाद्येति च शब्दार्थः। सर्वगमित्यादीनि विशेषणानि ब्रह्माकाशयोः
समानि यतः आकाशवत्केवलोहं सर्वभूतेषु समः। तत्राकाशस्वभावोपमितं सर्वगमित्या
दि विशेषणं परं ब्रह्मैवास्मीति योज्यं। उपपादिते ब्रह्मात्मैक्ये फलितमाह। तत इति॥ ३॥ ब्रह्मस्वरू
पत्वमदीहितैः फलाभावेपि कथं विनष्टेष्टयात्वं संबंधिमत्वाप्रतिगुणमतस्य न क्षानरूतस्य वा
तस्य चेदृशस्य कश्चिदुपयोगो न विष्यतीत्याशंक्यालोपि मायिदुःसंपादत्वमाह। अहं ममैकश्शति। अहं ममैवांनत

दृश्यमिष्यते तथा न कस्याप्यहमस्मि संगतः । असंगरूपोऽहमतो न मे त्वयाकृतेन कार्यं तव चाद्य पू-
र्वतः ॥४॥ एकएवाद्वि   स्वरूपस्य मम परमार्थतः सजातीयविजातीयस्वगतभेदैर्भानाभावात् ततो
न मम गुणभूतं किंचिदन्योन्यदिष्यते मया तथा कस्यापि प्रधानभूतस्याहं गुणभूतो नास्मि कु-
तः असंगत्वाद् अनिष्पादितातिशयः नाधेयातिशयत्वादित्यर्थः । यतोऽहमसंगरूपोऽतो न मे त्व-
याकृतेन किमपि प्रयोजनमस्ति किंच त्वमेव नासि कुतस्त्वदीहितं तत्कृतं वेत्याशयेनाह त-
व चेति । मत्स्वरूपाज्ञानकल्पितायास्तवाधिष्ठानभूतमत्स्वरूपव्यतिरेकाभावाद्भेदेन चोपकार्यो- ३४
का३ पकारकत्वासंभवात् त्वं विकल्पनया प्रशान्तैव भवेत्यर्थः ॥४॥ इदानीं कृतार्थस्याप्याचार्यस्य स्वानु-
भवसिद्धार्थाविष्कारकप्रकरणनिर्माणप्रवृत्तौ निमित्तं प्रवृद्धजनमंजातकरुणैव न त्वख्यातिला-
भपूजेत्याह । फलेच्छेति । फलेच्छे तेव जनो विषक्तवानिति प्रवृत्त्याहमतो विमोक्षणे जनस्यास-

हरऐमोहार२

वादमिमं प्रकृतप्रवृत्तस्वरूपतत्त्वार्थविबोधकारणं ॥५॥ अयं जनो देहफलात्मके संसारे विशेषेण ग-
सक्तवानिति प्रवृत्तिं त्यक्त्वा विमूढरूपताहं अत्र जनस्य लोकस्यात्र संसाराद्विमोक्षणे मो   यमहमिमं मत्सा-
त्मसंवादरूपं ग्रंथं प्रयुक्तवान्प्रणीतवानस्मि । किमनेन संवादग्रंथेन जनस्य भवेदिति तद-
र्थं तं विशिनष्टि । स्वरूपेति । स्वस्यात्मनो रूपं नित्यनित्यचैतन्यसद्भाववस्तुस्य तत्त्वार्थे त्रिसत्त्वे त-
स्य विस्पष्टं बोधकारणमित्यर्थः ॥५॥ यत एवं विश्वो यं संसारस्तस्मात्तु साध्यसाधनपर्यावर्त-
नरूपात्संसारान्मुमुक्षुरियमनुचिंतनीय इत्यभिप्रेत्याह । संवादमेतमिति ॥ संवादमेतं य-
दि चिंतयेन्नरो विमुच्यते ज्ञानमहानपायगात् । विमुक्तकामश्च तथा जनः सदाचरत्स्योकः स-
त२ मंगात्सुखी ॥६॥ अज्ञानकृतात् महानपायात्संसारादित्यर्थः । यद्वा महानपायस्यागमो यस्मात्तन्म-
हानपायागमं तज्ज्ञानं तस्मादिति विग्रहः । नयहे बहानादिमुच्यते रत्यर्थः । कारणनिकृष्टाकार्यनि-

रूपमाह। विमुक्तकाम इत्यादि॥ वदतिजीवन्नेव बंधप्रतिभासरहितः सन्ब्रह्मरूपेण विचरतीत्य-
तत्कल्पो भवतीत्यर्थः॥ सुगममन्यत्॥ ॥६॥ ॥ इति शिविनिस्वरूपप्रकरणम्॥७॥ ॥ मतिविला-
पन प्रकरणमिदं विवृतं॥ ॥८॥ ॥ विविनिस्व पप्रकरणमिति वा॥ ॥ ॥ यस्य प्रत्यग्ब्रह्मणो
बोधस्य ज्ञानेन ज्ञाननिवृत्त्या मुक्तिरुक्ता॥ तस्य सर्वान्तरत्वेन निरतिशयसूक्ष्मत्वं व्यापित्वं
च यथावत्स्वमित्यत्र सूचितमुपपादयितुं प्रकरणं तदर्भारभते॥ सूक्ष्मतेत्यादिना॥ ॥ सूक्ष्म-
ताव्यापिते ज्ञेये गंधादेरुत्तरोत्तरं॥ उत्पन्नत्वावसानेषु पूर्वपूर्वप्रहाणतः॥१॥ गंधशब्दः पृथिवी- ३५
शब्दार्थः॥ पृथिव्यबादिलक्षणात्कार्यविशेषात्उत्तरोत्तरंकारणतयाऽस्थितेषु उत्पन्न-
त्वावसानेषु सर्वान्तरात्मपर्यंतेषु पदार्थेषु यथाक्रमं पूर्वपूर्वप्रहाणतः कार्याकारापोहेन सू-
क्ष्मता व्यापिता च विज्ञातव्या कार्यकारणान्वयव्यतिरेकालोचनया संभावनीयेत्यर्थः॥ कार्येषु

विद्यमानमपि कारणस्वरूपं तत्कार्याकारतिरोहिततया न स्वरूपेणावभासत इति सूक्ष्ममुच्यते
न पुनः कार्यपरिमाणान्यूनपरिमाणयोगात्तथा सकलविकारानुगतस्यैवोपादानकारणस्य
त्कार्यापेक्षयाधिकदेशवृत्तित्वेन व्यापित्वं च कारस्य॥ तथाहि यद्वद्विधभूतग्रामोपादानरूपा
पृथिवी तावत्तद्भूतग्रामेषु गृहसमानेषु गृह्यते। तत्र तत्र पृथिवीत्येव व्यवहारादर्शनाल्लोकस्य त-
त्तद्रूपेण तया सूक्ष्मा तद्व्यापदेशावस्थिता व्यापिका च। न च तत्कार्योपादानभूताः पृथिव्यंशा
भिन्ना इति नोपादानस्य व्यापकतेति वाच्यं॥ कार्यकारणभेदव्यतिरेकेणानन्यस्वरूपत्वेन प्रमाणाभा-
रूपत्वात्तदाकारतस्तु भूमिर्मितकुसूलस्य गृहतुरगादेर्भूमौ दृश्यमानानां विलयानां संग-
उपादानादन्यत्र कार्यलयानुपपत्तेस्तस्मात्तत्कार्यापेक्षया पृथिवी तावत्सूक्ष्मा व्यापिका च सि-
द्धा तथाऽऽप्तिर्व्याप्ता पृथिवी॥ तत्र पृथिवीशब्दः श्रासीत्तस्य महत्त्वतस्तारथ्यस्य भवतीति ज्ञातो जलपरि

C. B. BHAU DAJI

णामविशेषस्य शरीराद्यव्याप्यस्य पृथिवीमंडलाकारस्य पृथिव्यात्मत्वस्य वर्णात्वेदन्तस्त्रवणादेः प
र्वताग्रशिलायामंतर्मोक्षसर्वत्रोपलंभात् रसस्य च मलिनासाधारणगुणस्य पृथिव्यां सर्वत्रो
पलंभात्तस्यैकत्वेपि कुत्रचिन्नरणत्वादिनेदः परिणामविशेषोपाधिनिबंधनइति । तस्माज्जलव्या
प्ता पृथिवी सपरिणामेति जलं पृथिव्याव्यापकं सूक्ष्मं च न गुरुकमुक्तासिद्धं ॥ तथा स पृथिवि जि
लं तेजसा स्वकारणेन व्याप्तं सर्वत्रोष्मोपलंभान्नायोगोलकादौ सूर्यकिरणेषु चोद्रकस्पर्शदर्शी
नाच्च ॥ तथा चैवं तेजसो जलव्यापकत्वं सूक्ष्मत्वं च व सिद्धं तदपि वायुना ग्रस्तं यतश्चोदेति सूर्यो ३६
स्तं यत्र च गच्छतीति । प्राणाद्वा एष उदेति प्राणेस्तमेतिइतिश्रुतेः ॥ प्राणश्चायं वाह्यवायोर्लयश्च वणः र
निव त्रि२ ज्वालारूपस्य च वक्रे वायुवधीनप्रवृत्तिदर्शनाच्च वायुश्चाकाशेन ग्रस्त इति प्रसिद्धमेवेन तन्मा
त्मत्वं तु माख्यातमेव सर्वत्र ॥ एवं तस्य वंशितान्स्फूर्त्तिर्व्याप्तमेवानुभूयत इति । सच्चिन्मात्रं सर्वस्यो

धारानंतस्य चार्थनिरेणानुगमादर्शनान्निरूपादानकत्वे सिद्धे निरपेक्षव्यापकत्वं चागुरुपरिमा
णानिरतिशयसूक्ष्मत्वं च सिध्यति । तदनेन सच्चिन्मात्रेण सर्वस्य दृश्यराशेर्ग्रस्तत्वान्न ततः पृथ
गस्ति किमपि वस्त्वेकमद्वितीयमित्यस्य परमसूक्ष्मताव्यापितेनेत्थं सर्वोऽहमसंगकूटस्थाद्वयात्मे
तिसदाभावयेदिति तात्पर्यार्थः ॥४॥ ननु नैतावतात्मन उक्तरूपत्वज्ञानसिद्धिरध्यात्माधिदैवतयोः
पृथिव्यादिभेदेन प्रथमानत्वादित्यत आह ॥ शारीरेति ॥ शारीरा पृथिवी तावद्यावद्बाह्या प्रमाण
तः श्रवादीनिव तत्वानि तावत्तद्वैपानि दक्षस्त्वशः ॥४॥ यावद्बाह्या पृथिवी प्रमाणतः परिमाणतो
भवति तावत्प्रमाणा शारीरा पृथिवी तयेति संबंधः ॥ तथाब्वादीनि च त्वादिभूतानि दक्षत्र
शोनि रवं शोपनयान्तावत्प्रमाणानि तेषानि पार्थिवेदीरा बाह्येव पृथिवी त्रियोजना रभ
उक्तं भवति ॥ अध्यात्माधिभूताधिदैवात्मना विभक्तानां पृथिव्यादीनामेकात्म्यान विज्ञमितत्वादे

कप्रत्यक्त्वेन विलापनोपपत्तेः। सर्वत्र प्रत्यक्त्वानुगमात्प्रत्यगात्मावसानमिवाध्यात्मादिरूपं ते
न व्याप्तं न ततः पृथगस्तीति प्रत्यक्त्वेव ध्यायमाणो वाऽध्यात्मिकादिभेदस्फूर्तेरनवकाशा
त्प्रत्यगात्मब्रह्मतावन्मात्रमेव सर्वमवशिष्यत इति भवेदेवाशुकात्मज्ञानसिद्धिरिति। ननु
चैवं परागर्थस्यात्मत्वेकथमात्मनः प्रत्यक्त्वं सर्वगतत्वमित्याद्युपपद्यते न स्य पराचीनविकारापेक्ष तं ५
त्वात्ततः कथं पराचां प्रत्यगात्मावसानत्वमित्याशङ्क्य चिन्मात्रस्वरूपस्येवापूर्वादिलक्षणस्य प्रत्य
गादिशब्दैर्लक्ष्यत्वाल्लक्ष्यमाणदशायामारोपितपरागर्थापेक्षायामपि स्वरूपस्यानपेक्ष ३७
त्वाद्युक्तं सर्वस्य प्रत्यगात्मावसानत्वावधारणमिति दृष्टान्तेनोपपादयति। वाय्वादीनामपि निर्वा
प्यादीनां यथोत्तरैः पूर्वपूर्वे सर्वगं तथा। अहमेकः सदा सर्वश्चिन्मात्रः सर्वगोऽव्ययः स्पष्टार्थः॥४॥
ननु कथमाकाशवदेकत्वात्मा सर्वात्मा भवेत्। ब्रह्मादिभेदेनात्मनामनेकत्वस्य विनाप्यमान

त्वान्यथा चैतन्यमात्रत्वं नानुपपन्नं रागादिदोषसंसर्गोपलब्धेरित्याशङ्क्याह। ब्रह्माद्या इति। ब्र
ह्माद्याः स्थावरान्ता ये प्राणिनो मम पूः स्मृताः। कामक्रोधभयाद्या दोषा जायेरन्मे कुतोऽन्यतः॥५॥ ममैव चि
दात्मनः सर्वे प्राणिनः पूः पुरः शरीरभूताः स्मृता निर्णीता इत्यर्थः। तथा कामक्रोधादयो दोषा आत्म
नो मे न स्वात्मा विकाय निर्वाल्यरतोऽपि लेन संनिहित आह। जायेरन्मे कुतोऽन्यत इति। अन्य
स्यानावादित्यर्थः॥५॥ प्रत्यगात्मनो निर्दोषत्वमसिद्धं संसारदोषस्य प्रत्यक्त्वादित्याशङ्क्याकाश शंका।
प्रत्युक्तवदात्मनिर्दोषदृष्टेर्न मलत्वमेवमित्याह। भूतदोषैरिति॥ ।भूतदोषैः सदाऽस्पृष्टं सर्वभू
तस्थमीश्वरं। नीलं व्योम यथा बालो दुष्टमारोपितेजनः॥६॥ अस्पृष्टमिति छेदः। सर्वभूतेषु स्थितस्या
पि तद्दोषैरस्पृष्टत्वमीश्वरत्वादिति हेत्वर्थं विशेषणमीश्वरमिति। सर्वस्येशितारं कारणमित्यर्था
वत्। नहि कारणं कार्यधर्मैः संस्पृश्यत इत्यर्थः। स्पष्टमन्यत्॥६॥ यदुक्तं ब्रह्माद्याः स्थाव

मच्चैतन्येति २

रीनां प्राणिनः एकस्यात्मनः शरीरभृताः इति तत्कथमित्यत आह। मच्चैतन्यावभासत्वात्सर्वप्रा
णिधियां सदा। पूर्वं मम प्राणिनः सर्वेषां सर्वज्ञस्य विपाप्मनः। इ। सर्वज्ञस्य सर्वा वभासकस्यात एव
दृश्यद्योषु ३ विपाप्मनो संसर्गरहितस्य ममात्मनः सर्वप्राणिनः पृ॰शरीरं कुतः सर्वप्राणिधियां सदा
मच्चैतन्यावभासत्वादिति योजना। योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इति श्रुते
बुद्ध्यंतः स्थिततया प्रकाशमानस्य चैतन्यज्योतिष एव सर्वप्राणिष्वात्मत्वावगमात्तस्य च बु ३८
द्धितत्साभाससंभेदमंतरेण स्वरूपतो भेदानिरूपणात्सर्वदिवोदृपात्र तत्साक्षात्सम्याति
रेकेणेति सिद्धमेकस्यात्मनः सर्वाणि भूतानि शरीरमिति भावः। तथा च श्रुतिः। यः सर्वाणि
भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इति। इ। नहि आत्मा सर्वप्राणिनस्तद्बुद्धीनां सत्ता
दैहे तच्छ्रुतिरिति तत्राह। जनिमदिति॥ ॥जनिमत्त्वज्ञानं विज्ञेयं स्वप्रकाशान व द्विष्यते। नित्यं नि

र्विषयं ज्ञानं तस्माद्द्वैतं न विद्यते ॥७॥ जनिमत् उत्पत्तिमद्यज्ज्ञानं विज्ञेयं यत्कार्यं जडं वस्तु मिथ्येष्यते। यथात्मज्ञा
नेन तथा जाग्रदृश्यकार्यं दृश्यं चेति। मिथ्येति द्वैतं न विद्यते यस्मात् ज्ञेयस्याससत्त्वात् ज्ञानं नित्यं सदा निर्वि
षयं विषयनिरूप्यं न भवति॥ यद्वा नित्यमविनाशि सर्वविनाशसाक्षित्वादिति योजना। न च श्रुत्यारो
द्वैतेन ४ पितेन परमार्थमद्वैतं विद्यते नरवृक्षारोपितेन तोयादिना तदाधारभूम्यादि सम्बधिनीयं दृष्टमि
तिभावः॥७॥ स्वरूपज्ञानस्यानिर्विषयत्वं श्रौतोक्तं श्रुत्या पपादयति। ज्ञातुर्ज्ञातेरित्यादि॥ ज्ञातुर्ज्ञातेर्हि नि र्हि ५
त्योक्ता सुषुप्ते त्वन्यदसत्तः। जाग्रत्ज्ञातिस्तद्विषयानस्त्यादिवासाद्विष्यते ॥८॥ सुषुप्ते त्वन्यस्य
ज्ञेयस्याससत्त्वप्रदर्शनपूर्वकं ज्ञातुरात्मनो ज्ञातिः स्वरूपभूता ज्ञप्तिर्नित्येति श्रुत्योच्यते हीत्यर्थः
तथा च श्रुतिः। यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविना
न१ शित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदित्यादिका॥ यद्यपि सुषुप्ते निर्विषयं ज्ञानं विषया

दृष्टव्यं २

भावानुस्वरूपतो नाशगुणत्वाभावाच्च नित्यं श्रुतिसिद्धं तथा ऽवस्थांतरे स विषयमुपलभ्यत इति
नानुज्ञातिरिति त्वास्यादित्यत आह। जाग्रदिति। यतः श्रुतिसिद्धं नित्यं निर्विषयं ज्ञानं ततःकारणात् अ-
जाग्रत्स्वप्नाति विषयदर्शनात्मिका विद्या ऽन्त्याति रेवात्मनो निर्विकारतया ज्ञानकर्तृ त्वायोगाद्
तःकरणस्य च जडत्वादेवतानाश्रयत्वानुपपत्तेरध्यस्तमेव स विषयं ज्ञानं तन्मात्रं च विषयज्ञात
मसत् परमार्थमिष्यतां स्वीक्रियतामित्यर्थः। जाग्रदिति। तादृशविषयाकारबुद्धिवृत्तीनां स्फुरणान्वु
गितत्वात् सर्ववृत्युत्पत्तिस्थितिविनाशसाक्षितया स्फुरणस्यैकस्य नित्यस्यावरूपाश्रयणीयत्वा ३९
ज्ज्ञानस्यात्मचैतन्यं नित्यमेव तथा विषयाणां वृत्तिसमकालमेव स्फुरणाद्विषयव्यभिचारेऽपि
स्फुरणाव्यभिचारात्तस्य विषयानिरूप्यत्वान्निर्विषयत्वं च सिद्धमिति भावः॥९॥ नन्वात्मा वा
अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्यैवात्मनो दर्शनादिकर्मत्वोक्तेर्द्रष्टव्या

वा१ दृ१

दर्शनानुकूलगादिवत्सत्वप्राप्तिरित्याशंक्य श्रुत्या दर्शनस्य दर्शिरूपमव्ययं तथा दर्शनं नित्यमगंधवच्चयत्
॥ ॥ नव तु षा गृह्यते नापि वाना भेदैर्देवैस्तपसा कर्मणा वेत्यादिश्रुतिविरोधादर्शपादिहीनस्य दर्शनाद्य
विषयत्वाद्द्रष्टव्य इत्यादिश्रुतिरर्थ्यनित मेनयोगाद्दर्शनाद्यर्हत्वोपदेशमुखेना नाम
प्रवणतास्यानात्मनार्थेत्याह। रूपवत्त्वादिति॥ ॥रूपवत्त्वाद्धर्मत्वाच्च दृः कर्मता यथा। एवं विज्ञान पृ०॥
कर्मत्वं नूनं नास्तीति गम्यते॥१०॥ यथा द्रष्टव्यश्रुत्यादिशा ज्ञानकर्मत्वमेवं यन्नायम्ज्ञपतिनाभ्य
दृणोति नान्यद्विजानाति स भूमेत्यत्रापि भागुपस्थतः श्रुतिविरोधात्तद्याप्यनपनयप्रसाज्ञानमेवप
ये- श्यतीति स्वार्थदर्शनविधिपरत्वकल्पनायोगाद्ब्रह्मणो विज्ञानकर्मत्वं नास्तीति गम्यते निश्चीयते
इत्यर्थः॥१०॥ ॥इति सूक्ष्मताप्रकरणं नवमम्॥ ॥सूक्ष्मताव्याप्तिताप्रकरणं नवमं विवृतम्॥१०॥
॥इदानीं पूर्वप्रकरणयुक्त्या व्यवस्थापितमात्मनो निर्विषयज्ञानस्वभावत्वं स्वानुभवाभिनयेन प्र

६८१

कर्तृत्वविषयत्वेनैवात्मत्वानं भवतीति द्रष्टयितुं प्रकरणांतरमारभ्यते। दृशिस्वरूपमिति॥ ॥दृ
शिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरं। अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं वि
मुक्त ओं॥१॥ सकृद्विभातमेकरैव विस्फुरितं सदैव स्पष्टं भासमानमिति व्याख्यातं यदेवंविधमक्ष
रं ब्रह्म तदेवाहं सततं भवामि। अतो विमुक्तः। ओमित्यभ्युपगमार्थं ओंकारः। उक्तस्वरूपमोंकारद्वारा
मुमुक्षुबुद्ध्यभिव्यक्तं भवतीति सूचयितुं ओंकारनिर्देशः॥१॥ ननु नाकाशवदलेपकत्वं दृशेः संगच्छ
ते दृश्यसंबंधादशुद्धिविक्रियादिदोषसंभवादित्याशंक्याह दृशेरात्मस्वरूपत्वात्सर्वनित्यशुद्ध ४०
त्वादेःश्च तेव निर्धारितान्मेवमित्यभिप्रेत्य श्रुतिसिद्धमर्थं प्रकटयति। दृशिस्तु शुद्ध इति॥
॥दृशिस्तु शुद्धोऽहमविक्रियात्मको न मेऽस्ति कश्चिद्विषयः स्वभावतः। पुरस्तिरश्चोर्ध्वमधश्च स
र्वतः संपूर्णभूमा त्वज आत्मनि स्थित ओं॥२॥ अहं तु दृशिः ज्ञानस्वरूपः स्वभावतः परमार्थतश्च

स्थू२

शोऽशुद्ध्यादेरज्ञाननिबंधनत्वात्तस्य त्वाभासत्वादिति भावः। अहमपापविद्धमिति मंत्रवर्णात्तु य
तश्चाविक्रियात्मकः क्रियात्मका प्राणादेरन्यो ऽप्राणो ह्यमनाः शुभ्र इति श्रुतेरमन एव ह्यस्य मदीयं ह
मित्यादिश्रुतेरतोऽपि शुद्ध इत्यर्थः। न तदश्नाति किंचन न तदश्नाति कश्चनेति नात्मनो विषयसंस
र्गस्पर्शादि। न मेऽस्तीति। स्वभावतः परमार्थतः। अनेन विक्रियादेस्तु विरोधाभावाद्रूपादिविषयस्फुरणं
भवति। विषयाभावेनाद्वयात्मत्वेन भूमत्वादाकाशोपमयति। पश्यति। पुरस्तिरश्चेति। स भगवः कस्मिन्प्र
ति४ तिष्ठित इति स्वे महिम्नि ... मात्मनीति स्वरूपावस्थानमनन्याधीनमुपन्यस्यत उपपादना
येदं कारास्पदं संवर्षणादिविभागेनोधरोत्तरादिविभेदेन चोपलभ्यमानं भूमैवेति व्रतिपादयाहंकारास्प
दस्य देहादिबुद्धिपर्यंतस्य तद्भिन्नत्वान्नेदमिति शंकायामहंबुद्धिग्राह्यमपि भूमैवेति मध्यनिर्दिष्ट
इदमनिदमात्मकस्यान्तर्वस्यभ्रात्मत्वाभावेनेदंकाराभावात्स्य गात्मैव भूमेत्यात्मैवेदं

सर्वमिदं तेन संपूर्णमित्याच्छांदोग्ये ह्युक्तं इत्यर्थः ॥ अजोहमाविर्भवबर्जितो यत आत्मनि स्वेमहिम्नि
स्थितो नाम्नाधीन इत्यर्थः ॥२॥ आत्मनोजन्मजरादिविक्रियाभावेन कूटस्थादयस्त्वात्माव्यक्तिमूर
नपराः श्रुतीः स्वरूपतोर्थतश्च पठति ॥ अजोमरइति ॥ ॥ अजोमरश्चैव तथाजरोमृतः स्वयंप्रभः
सर्वगतोक्षमव्ययः ॥ न कारणं कार्यमतीव निर्मलः सदैकरूपस्तु ततो विमुक्त ॐ ॥३॥ तथाचस्मृतिः ॥
अजो नित्यः शाश्वतोयं पुराणः ॥ सवा एष महानज आत्माजरोमरोमृतोभयो ब्रह्मेति ॥ अत्राद्यं पुरुष
स्वयंज्योतिः तद्धुं ज्योतिषां ज्योतिः ॥ नित्यं विभुं सर्वगतं सुसूक्ष्मं ॥ एको देवः एकमेवाद्वितीयमि
ति ॥ तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमित्यादिश्रुत्यर्थमाह ॥ न कारणं कार्यमिति ॥ निष्कलो
निरंजनः परमं साम्यमुपैतीति निष्कलेः एकरूपः ॥ एकेन विज्ञानेन सर्वमस्त्यर्थः ॥ आनंदं ब्रह्मणो
विद्वान्न बिभेति कुतश्चन ॥ आनंदरूपममृतं यद्विभातीत्यादिश्रुतिस्मृतिभ्यः ॥ विमुक्तश्चविमुच्यत

DR BHAU DAJI

॥

जाग्रदाद्यवस्थात्रये ३

इति श्रुतिमाश्रित्याह ॥ ततो विमुक्त इति ॥ ॥ यत एवं लक्षणस्ततो विमुक्त एवाहमिति परंस
वित्राऽनुसंधानीयं ॥ यद्वा चार्यैणोक्तं ममस्वरूपं तत्तथैवेति शिष्योऽनु : मन्यते ओमिति पदे
नेत्यर्थः ॥३॥ ननु स्थानत्रये सत्यथा न्यथा प्रथमानस्य कथमविक्रियात्मकत्वमित्यत आह ॥
सुषुप्त्येति ॥ ॥ सुषुप्तजाग्रत्स्वपतश्च दर्शनं न मे स्ति किंत्विह मे मोहनं ॥ स्वतश्च तेषां परतोप्य
सत्त्वतस्तुरीय एवास्मि सदा दृगव्ययः ॥४॥ सुषुप्तस्वप्नजाग्रत्सु सदा मोस्वपश्च सुषुप्तजाग्रत
पन्नुतस्य सुषुप्तजाग्रत्स्वपतो मे मम समिवाभीयमिवेदृश्यद्वारे किंविदृदर्शनं नास्ति ॥ स्वमिव स्वरू
पन्नु तमिति वा किं तु मोहनमविवेका विद्याध्यारोपितं जाग्रदादि दर्शनमिति योजना ॥ तत्र हेतुमा
ह ॥ स्वतश्चेति ॥ तेषां जाग्रत्स्वप्नसुषुप्तिसंज्ञिनानां जाग्रदाद्यवस्थारूपाणां स्वतन्त्रः परतोप्यसत्त्व
तो ऽसत्त्वादित्यन्वययोजना ॥ नहि तेषां स्वतोन्यानिरपेक्षं सत्त्वं संभाव्यते तत्स्फुरणं च आगमापा

ष्ठितत्वेन रज्जुसर्पवदारोपितत्वनिश्चयात्तथा परतोऽपि न सत्त्वं स्फुरणं च संभाव्यते परंचैतन्नं
स्यान्न हि तेनात्मना सत्त्वादिकमेषां संभवति। एतत्कारणाभावेन विरुद्धस्वभावत्वोऽस्मा
दात्मानुपपत्तेस्तत्कल्पनायाश्च भ्रान्तिमात्रत्वादित्यर्थः। प्राज्ञस्तैजसो विश्व इत्येते
तत्तदवस्थावत्त्वेनाभासमाना न मम स्वरूपमिति भावः। तर्हि किं स्वरूपमात्मेति तत्रा
ह। तुरीय एवास्मीति। विश्वादित्रयापेक्षया परतो गम्यमानत्वाच्चतुर्थः। इतरस्य लक्ष
णं सदा दृगिति सर्वावस्थाद्रष्टेत्यर्थः। विश्वादीनां स्वस्वावस्थामात्रद्रष्टृत्वाद्दृश्यं ततो व्य ४२
तिरिक्तः स्थूलसूक्ष्मक्रमेण विविक्तान्वेषणद्वारा विश्वादिकान्त्रयापोहेनावमी
यमानत्वात्तुरीय इत्युच्यते॥ न पुनर्वस्तुतस्तुरीयत्वमस्तीति द्योतयत्यव्यय इति निर्विशे
षणत्वं सदाहमस्मीत्यर्थः।४। कथमात्मनो निर्विशेषत्वं शरीराद्यसंबंधस्य प्रत्यक्षत्वादित्य

॥

तत्राह। शरीरेति॥ ॥शरीरबुद्धीन्द्रियदुःखसंततेर्न मे न चाहं मम निर्विकारतः। असत्त्वहेतोश्च
तथैव संततेरसत्त्वमस्याः स्वप्नदृग्रूपवत्॥ शरीरादिसंततेर्न मदात्मत्वं मदीयत्वं वा पर
मार्थतोऽस्तीत्यर्थः। तत्र हेतुर्मम निर्विकारत इति। नह्यविक्रियं वस्तु आगमापायिनः शरी
राद्यात्मना परिणमते संसृजते वा येन तत्स्वरूपतां तद्धर्मतां वा भजेदित्यर्थः। हेत्वंतरमाह
। असत्त्वहेतोश्च तथैव संततेरिति। कुतोऽसत्त्वमित्यत आह। असत्त्वमस्या इति॥ स्वपनः
स्वप्नावस्थायां यथा दृश्यं मिथ्या तथास्याः संततेर्दृश्यत्वादिनासत्त्वमित्यर्थः। हि शब्दः
स्वप्नदृश्यस्य मिथ्यात्वप्रसिद्धिद्योतनार्थः।५॥ शरीरादिसंततेर्दृश्यत्वेन चेन्मिथ्यात्वं तर्हि
शुद्धस्याविक्रियत्वादेरपि दृश्यत्वान्मिथ्यात्वं किं न स्यादित्यत आह इदं त्विति॥ इदं तु सत्यं
मम नास्ति विक्रिया विकारहेतुर्न हि मेऽद्वयत्वतः। न पुण्यपापेन च मोक्षबंधनेन चास्ति वर्ष्म

रप्यारततर

अमनोऽशरीरत्वात्॥ मम विक्रिया नास्ति न मे विकारहेतुः पूर्वनिरूपितादृश्यादृश्याभावा
द्वेतोः स्वतः परतो वा ममात्मनो विक्रिया नास्तीत्यदिदृंत   त्सममित्यर्थः॥ उक्तादृश्यं
काध्याहृत्यर्थः॥ अविक्रियत्वादिना विक्रियाभावाद्युपलक्षितस्वरूपस्यात्मिवेतत्वात्तमि
श्वरे त्वमिद्वेनशंकावकाशइत्यर्थः॥ कर्म वा तत्फलं वा तद्ध्वंसो वा कर्मादिसाधनं वा विक्रिया
हेतुर्नविषयतीति कुतो ह्यपत्वमित्याशंक्याह॥ न पुण्येपीति॥ पुण्यादिनेति प्रतिज्ञाया हेतुरश
रीरत्वादिति॥ अशरीरत्वं तु पूर्वश्लोके प्रतिपादितमेवेत्यर्थः॥ ननु यद्यपि शरीरोपादानत्वेन ४३
तद्धर्मकत्वेन चात्मनः शरीरवत्त्वाभावस्तथापि शरीरेणास्ति संबंधउपलभ्योपलंभकत्वा
वलक्षणाइति कथमशरीरत्वे साशंका नैनावता सशरीरत्वेन कर्माद्यियोगित्वमिति प्रेत्यपुण्या
पुण्यादिसंबंधवैधुर्यमुक्तमुपपादयति॥ अनादित्वादिति॥ ॥ अनादित्वान्निर्गुणत्वान्न कर्मभिः फ

लैर्वा स्पृश्यत्परमोव्ययः॥ यथाननः सर्वगतं न लिप्यते तथायं देहे देहगतोपिसूक्ष्मत्वा॥३१॥
॥ यत्कर्मसमिमकायितदाद्विदृष्टंयथा रथशरीरादि॥ ॥ न च परमाणुमनसोरनेकाकालोमनस
उत्पत्तिश्चिवणास्तपरिकल्पितपरमाण्वंगीकाराच्च॥ यथा यत्कर्मसमवायि तत्सगुणं
दृष्टं यथोक्तमेवोदाहरणं तथा चसगुणत्वसादित्वं चाव्यापकं मत्स्वगात्मनो व्यावर्तमानं
तस्य क्रियावत्त्वस्वव्याप्यमादाय निवर्तत इति भावः॥ कर्मपुण्यादिलक्षणयाफलं तत्साध्यं
सुखदुःखादिरूपं बंधनमेसती   त्यव्ययः॥ तस्मादहं परमक्षमः॥ संसारिस्पोविलक्षणः॥ अ
द्वयो निर्विशेषः क्रियावत्त्वाभावात्तस्य पुण्यापुण्यसंभवइति विलक्षणत्वमुपपादयति॥
यथेति देहगतो देहेवस्थः॥ तत्रोपलभ्यमानोपीत्यर्थः॥ सूक्ष्मतोऽमूर्तत्वादित्यर्थः॥ तथा चाह भगवान्
अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः॥ शरीरस्थोऽपि कौंतेय न करोति न लिप्यते॥ यथा सर्व

गतं सौक्ष्म्यादाकाशं नोपलिप्यते । सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते इति ॥७॥ ननू
पलब्ध्यधिष्ठानानां देहादीनां वैषम्यदर्शनात्तदुपलभ्यमानस्यात्मनोऽपि तत्कृतवैषम्यसंभ
वात्कुतः परमात्मत्वं परिपूर्णतावेत्याशंक्यातारतम्यप्रतिभासोऽविद्याविलसितो न परमा
र्थ इत्यत आह । सदावेति ॥ ॥ सदा च भूतेषु समोऽहमीश्वरः क्षराक्षराभ्यां परमो ह्यधोक्ष
जः । परात्मतत्त्वश्च तथाद्वयोऽपि सन्नविपर्ययेणाभिमतस्त्वविद्यया ॥८॥ ॥ ईश्वरत्वस
नेनोपाधिवशप्रत्याभावं सूचयति । अतो न मे देहादिकृतं वैषम्यमित्यर्थः । ईश्वरह ६४
त्युक्ते तस्यैश्वर्यमपेक्ष्य स्वादयत्वं काम्यात्मत आह क्षराक्षराभ्यामिति । अथवा ईश्व
गु२ रत्वमेव साधयति । क्षराक्षराभ्यामिति । हि यस्मात्क्षराक्षराभ्यां परमोऽथ तस्मादहमुत्तमः
स्वचयः । क्षरति नश्यतीति क्षरः कार्यवर्गः । न क्षरतीत्यक्षरं सर्वमायाशबलितं विकृतं नाम

रं का १

धावि ४

परमो व्यतिरिक्तः कार्यकारणादिभेदकल्पनाधिष्ठानभूत इत्यत उत्तमपुरुषोत्तमः इत्यर्थः । यत
उत्तमोऽतः परेषामात्मनां तत्त्वस्वरूपमस्मीति परात्मतत्त्वश्चाहमेवमद्वितीयश्चेत्यर्थः ।
एवंविधश्चेदात्मा किमर्थं तद्वि [illegible] तत्र विपरीतरूपप्रतिभास इत्यत आह । तथाद्वयो
ऽपि सन्निति । उक्तोत्तरमेतदविद्याविलसितप्रविपर्यय इत्यर्थः । तथा च भगवतोक्तं । द्वाविमौ
पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते । उत्तमः पुरुषस्त्व
न्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः । यस्मात्क्षरमतीतोऽहम
क्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति । ८ तर्हि किमविद्यासंबं
धोऽस्तीत्यत आह । अविद्ययेति ॥ ॥ अविद्यया भावनया च कर्मभिर्विविक्त आत्माप्यनव
धिः मुनिमलैः दृगादिशक्तिप्रचितोऽहमद्वयः स्थितः स्वमहिम्नो गणं यथा च नो ॥९॥ ॥ अवि

द्याभूलात्तानंदात्मनात्मतत्त्वतो देहाद्यभिमानः कर्माणि तत्पूर्वकाणि पुण्यपापलक्ष-
णानि तैर्विविक्तः स्यात्संसारस्पृष्टः कुतो यस्माद्व्यवधिर्व्यवधिर्यविधानं वस्त्वंतरस्तेतो
वच्छेदात्तद्धितो व्यवधिः। अयमाशयः। विस्तकावर्णात्यावदात्मेति श्रुतिस्मृतीतिहा-
सपुराणन्यायसिद्धं। अविद्यावज्जडाप्रकाशात्मिका। अतस्तयोर्विरुद्धस्वभावयोः पर-
मार्थतः संबंधो दुर्घट एवेति स्थितेऽनवच्छिन्नचैतन्यमात्मानंदात्मना विद्याश्रयः उपपद्यते॥
तथा संसारिणमात्मस्यापि प्रकाशानुपपत्तिप्रसंगात् ज्ञानादिके न चिदवच्छिन्नस्यागकि- ४५
षमविद्याव्यतिरिक्तस्य तस्य कल्पनायाः अनिबंधनत्वात् तस्मादविद्यातिरिक्तव्यवधा-
नाभावात्व्यवधिर्नेति द्विविधपरिकल्पितांधकारवदात्मविद्यादिकल्पनमिति। अ-
त एव सुनिर्मलः। सर्वाशंकितदोषरहितत्वात्। एवं बंधे श्री मनिकथं द्रष्टारो तामं

ता बोधेत्यादि व्यवहारदृष्ट्याशंकया विदुषो धर्मांतःकरणपरिणामरूपदृग्गादिशक्ति-
संबंधादेव द्रष्टृत्वाद्युपचर्यप्रतिभासो न परमार्थत इत्याह दृगादीनि स्वरूपमन्यत्राप्ये-
एवंविधात्मतत्त्वपरिज्ञानेन सति किं वृत्तं फलं तदाह। अहं परं ब्रह्मेति॥ ॥ अहं परं ब्रह्म विनिश्च-
यात्म हृद्कून जायते नृ य इति श्रुतेर्वचः। नचैव बीजेत्वसति प्रजायते फलं न जन्मास्ति ततोऽस्य
मोहता। १०। अहं परं ब्रह्मेति निश्चयेनात्मनि हृद्कूज्ञानं यस्य स तथोक्तः स नृयः पुनर्न जाय-
ते शारीरत्वान्न भवति श्रुतेर्वचो विद्यतः इति शेषः। तथाच श्रुतिः। स तु तत्पदमाप्नोति य-
स्माद्भूयो न जायते। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति। अथ सोऽनुवाति ब्रह्म- नयंग २
वेद ब्रह्मैव भवतीति च श्रुतिसिद्धेर्युक्तिमप्याह॥ नचैवेति। उक्तसामान्यन्यायं श्रुतेर्योजय-
ति। न जन्मास्तीति। स्थियस्मादमोहता। श्रीगुरूक्तवर्त्मनामोहराहित्यं ततो देहोर्न जन्मास्तीति योजना॥

मोहपदवाच्याविद्यामूलत्वाज्जन्मादिविकारस्य तद्भावे भावाद्वेत्यर्थः ॥२०॥ मोहकार्यत्वा
त्संसारस्य मोहनिवृत्त्या निवृत्तिरेवेत्युक्तं । तत्र किमात्मकं मोहकार्यमित्यपेक्षायां तदा
ह ॥ममेदमिति ॥ ॥ममेदमित्येवं तत्र दृश्यदर्शनं तथाहमेवं न परो न वान्यथा ॥ विमूढस्त्वेवं
न जन्तुः कल्पना सदा समे ब्रह्मणि चाद्वये शिवे ॥२१॥ प्रथमं देहद्वये अहंकारस्ततस्तत्सा
ध्यार्थकल्पनमिदमिति ॥ तत्र शोभनार्थध्यासः इदमिति ततो ममेदं तत्संदर्शनं तथा न ममे
दमित्यादिकल्पना तथा परोऽप्येवं नैव मम न्यथा वा नास्ति वा अस्ति वा इति विमूढता मम पर ४६
स्य वा सुतुष्टता तथा वेत्येवं जन्तुस्य जन्मादियोगिनोऽनाद्यज्ञानतिरोहितात्मस्वभावस्
या एवंविधा कल्पना सदा समे ब्रह्मण्यद्वये शिवे परमानंदरूपे न च नास्त्येवेत्यर्थः ॥
॥२२॥ एवं विचित्रस्य संसारस्यात्मतत्त्वज्ञानेन तदज्ञाननिवृत्त्या निवृत्तिं स्फुटयति ॥ यद

द्वयमिति ॥ ॥ यदद्वयं ज्ञानमतीव निर्मलं महात्मनां तत्र न शोकमोहता ॥ तयोरभावेन हि क
र्मजन्म वा न वेद्यं वेदविदां विनिश्चयः ॥२३॥ अद्वयमद्वयात्माकारमतीव निर्मलमसंभा
वनाविपरीतभावनादिप्रतिबंधरहितं यत् ज्ञानं तत्र तस्मिन्सति महात्मनां ब्रह्म
भूतानां शोकमोहतासंसारित्वं नास्त्येवेत्यर्थः ॥ तथा च मंत्रः तत्र को मोहः कः शोक एकत्व
मनुपश्यत इति ॥ तयोः शोकमोहयो रभावेन तु फलाख्यस्य तत्कारणस्याज्ञानस्य निवृ
त्तौ बीजाभावे फलाभाववत् यावेन जन्मादि पुनर्न हि भवेदिति वेदार्थविदां वि निश्चय इ
त्यर्थः ॥ तथा च श्रुतिः ॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि
स्वस्वपमा १२ तस्मिन्दृष्टे परावरे ॥२४॥ एवमुक्तस्यात्मविदः सुषुप्तवदिति ॥ ॥ सुषुप्त वज्जाग्रति यो न
पश्यति द्वयं तु पश्यन्नपि चाद्वयत्व तः ॥ तथा च कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्ना

न्य इतीह निश्चयः॥१३॥ जाग्रति विश्वावस्थायां द्वयं द्वैतप्रपंचं प्राग्वासनावशात् पश्यन्नपि द्विभू
नपि विशेषतो न पश्यति। किंतु सुषुप्तवत् प्रविलीनप्रपंचं त्यगात्मस्वरूपेणैव पश्यतीति यो
ननात तत्र हेतुरक्षयत्व न इति॥ द्वैतस्य बाधितत्वादित्यर्थः॥ तथा च यथा पूर्वं स्नानश्चा च
मिहाटनादि कुर्वन्नपि निष्क्रियो निर्विकारो कर्त्ता त्मस्वभावाविर्भावाद्य एवंविधस्तत्र
त्मवित्तूनि ... पदगायामप्रच्युतात्मयाथात्म्यदर्शनत्वान्न त्मविद्यामुत्तमो यमेव नान्यः।
शास्त्रार्थतो ज्ञेयो पियो व्यवहारकाले शास्त्रत्वकर्तृत्वाद्यभिमानवानित्यर्थः॥ इतिहस्य मि
ह वेदांतशास्त्रे विनिश्चयः॥१४॥ शास्त्रन्यायानुसारेण स्वानुभवं प्रदर्शयेदानीमस्मिन्नू
दर्शने परिनिष्ठितस्य कृतकृत्यता भवतीति दर्शयन्नूपरानुग्रहाय प्रकरणं निर्माणेनू
द त्रि शिति सूचयति॥ इतीहमुक्तमिति॥ ॥इतीह मुक्तं परमात्मदर्शनं मया हि

वेदांतविनिश्चितं परं। विमुच्यते स्मिन् य हि निश्चितो भवेन्न लिप्यते व्योम इवेह कर्मभिः॥१५॥ ॥मति
द हिप्रकरणं॥ ॥वेदांतैर्विनिश्चितमित्युक्त दर्शनस्य परमार्थविषयत्वेन प्रामाण्यमुक्तं॥ व्योम
इवेति विसंश्लि...पदृष्टांतार्थः॥१६॥ ॥इतिहंशोस्वरूप परमार्थदर्शनप्रकरणं दशमं विवृ
तं॥१०॥ ॥के... केवलज्ञानमात्रनिष्ठो मुच्यत इत्युक्तं। तत्रोपपद्यते कर्मसाध्यत्वान्मुक्तेः।
कर्मसिद्धितज्ज्ञानसाध्यत्वाच्च॥ तथा ज्ञानस्य वेदांतविनिश्चयत्वमुक्तं तदपि संदि... मनुमा ग्घ५
नादिनाप्यपपत्तेरितीमामाशंकां परिहर्तुं प्रकरणांतरमारभते॥ ईशित्वत्वामित्यादिना
॥ ॥ईशित्वं स्वतः सिद्धं जंतूनां च ततोन्यता। अज्ञानादित्य... तोन्यत्वं सदसीति निव
र्त्यते॥१॥ तत्राहो ज्ञानादेव मुक्तिं तन्निं च वेदांतमहा... वाक्यादेव नानुमानादि न स्यतस्मा
ति ध्ययि॥ अन्यत्वं सदसीति निवर्त्यन इति॥ त्वं तत्सद्य इत्यत्र त्रिजो वासिन संसारीति

वाक्योपदेशेनैव सच्छास्त्रार्थश्रवणेनात्मत्वं जीवस्य निवर्तत इत्यर्थः ॥ संसारिणो जीव
स्याशुद्धस्य कथं तद्विपरीतब्रह्मत्वसंभावना इत्यत आह ॥ इक्षितृत्वमिति ॥ सर्वेषामेव जंतू
५३ नां प्राणिनां चिद्रूपमेवेक्षितृत्वं तत्त्वतः सिद्धं स्वाभाविकं रूपं चकारः शंकानिरस्यर्थः
॥ कर्तृत्वभोक्तृत्वादेरपि स्वाभाविकत्वशंकां तत्कार्यत्वस्य ... पत्त्या निवारयतीत्यर्थः ॥ कुतो
ज्ञानादेवान्यत्वनिवृत्तिरूपा मुक्तिरित्यत आह ॥ अज्ञानादित्यत इति ॥ इति यतोऽन्यतान्य
त्वमज्ञाननिबंधनं न परमार्थो । तदित्यर्थः ॥ अज्ञानकल्पितत्वाद्ब्रह्मविपरीतरूपत्वस्य स्वे ४८
श्चिन्मात्रे ... ज्ञाननिवृत्तिलक्षणत्वाच्च मोक्षस्य तस्य च तत्त्वज्ञानमात्रापेक्षणात् ॥
ज्ञानस्य च यथा ... बोधस्य न मनोभ्रांतत्वात् इति भावः ॥२॥ ॥ कर्मणो मोक्षहे
तुत्वकल्पनं ज्ञानमहात्म्यत्वेन नोपपद्यते श्रुतियुक्तिविरोधादित्याह ॥ एतावदिति ॥ ॥ एताव

ध्यमृतत्वं न किंचिदन्यत्सहायकं ॥ ज्ञानस्येति ब्रुवच्छास्त्रं सलिंगं कर्म बाधते ॥३॥ एतावदेवा
ऽमृतत्वं ... तदमृतत्वसाधनमात्मज्ञानमेवैतावदेवेत्येनावधारयतीति श्रुतिः शास्त्र
मुच्यते ॥ ति ... स्य किंचिदन्यत्र सहायभूतमस्तीति ब्रुवत्सलिंगं ससाधनं कर्म बाधत
इति योजना ॥ अद्वैतात्मज्ञानादूर्ध्वं कर्महेतुजात्याद्यभिमानाभावे कुतः कर्म यत् ज्ञानस्य मो
५ न क्षफले सहायभूतं वेदीति भावः ॥३॥ इक्षितृत्वमित्यत्रोक्तं स्वाभाविकं चिद्रूपत्वं प्र
पंचयन्नज्ञानिनः कर्म न घटते इत्येतदुपपादयति ॥ सर्वेषामिति ॥ ॥ सर्वेषां मनसो ह्यभावि
शेषेण पश्यतः ॥ तस्य मे निर्विकारस्य विशेषः स्यात्कथं चन ॥४॥ विशेषः कर्तृत्वादिलक्षणो
विहितकर्मसाधनजात्याद्यभिमानलक्षणश्चेत्यर्थः ॥ कथं चनेत्याक्षेपार्थो न कथंचन मे
विकारः स्यादित्यर्थः ॥ कुत इत्यत आह ॥ अविशेषेणेति ॥ अभिमानवत्संतयाके व ले

साक्षिमात्रेण प्रपश्यतीत्यर्थः ॥३॥ कथं मनोवृत्तिं प्रपश्यन्निर्विशेषणात्मेत्यपेक्षायां दृष्टांतपूर्व
कं तदुपपादयंश्चिदेकरसत्व मात्मनो निगमयति ॥ मनोवृत्तिमिति ॥ ।मनोवृत्तिम
नश्चैव स्वप्नवज्जाग्रतीक्षितुः । संप्रसादे द्वयाभावाच्चिन्मात्रः सर्वगोऽव्ययः ॥४॥ स्वप्नदृशा
यां सवृत्तिकं म नएव प्रपश्यत्यात्मा यथा वाह्यविषयाभावात् तथा जाग्रति जागरणदशा
यां मनोवृत्तिं मनःप्रचारं मनश्च तदाश्रये प्रपश्यतः कथं विशेषः स्यादिति पूर्वश्लोके नान्व
यः ॥ जाग्रद्दशायाम पि विषयाकारवृत्तिमन्मनोव्यतिरेकेण नात्मना किमपि उपल ४९
भ्यत इति भावः तथैव ति ध मनोवृत्तिमेव स्वाभाविको विशेष इत्यत आह
संप्रसादे द्व सादे सुषुप्तिदशायां द्वयस्य सवृत्तिकस्य मनसो ऽसत्वात् तद्वृत्ति
नमपि स्याद ॥ न तु न द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति श्रुतेः ॥ तथा चा

त्मा चिन्मात्रः सर्वगोऽपरिच्छिन्नोऽव्ययो नित्य इति सिद्धः इत्यर्थः ॥४॥ ननु यद्येवं तदा बाह्या
र्थेत वेत त्रयुवेलियुक्तं स्यात्तन्नोपपद्यते प्रत्यक्षादिप्रमाणविरोधात् लौकि
कवैदिकव्यवहारावलोपप्रसंगाच्चेत्याह स्वप्न इति ॥ ॥स्वप्नः सत्यो यथा बोधप देहा
त्मत्वं तथैव न ॥ प्रत्यक्षादेः प्रमाणत्वं जाग्रत्स्यादात्मवेदनात् ॥५॥ यथा आबोधात्प्र
बोधपर्यंतं स्वप्नः सत्यो लौकिकवैदिकव्यवहारास्पदतया वेना मतेः तथैव जाग्रद
वस्थायामपि देहात्मत्वं प्रत्यक्षादेः प्रमाणत्वं च सर्वव्यवहारांगं स्यात् कियत्पर्यंतमित्य
त आ आत्मवेदनादिति ॥ आ आत्मवेदनादिति पदच्छेदः ॥ आत्मतत्वसाक्षात्कारात् प्रागेव
सर्वोपि व्यवहारस्तस्मिन्सति व्यवहाराभाव इष्टएवेति भावः ॥ पात्र व्यवहार्यस्वरूपमा
विष्करोति । व्योमवदिति द्वाभ्यां ॥ ॥ व्योमवत्सर्वभूतस्थो भूतदोषैर्विवर्जितः ॥ सा

त्रीचेता ॥ गुणः शुद्धो ब्रह्मैवास्मीति केवलः ॥ १६ ॥ चेतश्चिद्रूपः साक्षीति भूतदोषराहित्येहेतुः ॥ यो
भवत्सर्वभूतस्थ इत्यसंग [illegible] त्वमुक्तं सर्वभूतेषु हमाकारः प्रत्या वनिष्यस्का पेक्षया सर्वभूतस्थ इ
त्युच्यते ॥ एतत्वाहं मनुरभवं सूर्य [illegible] श्चेति वत्सर्वात्मताभिमानवामदेवाभिप्रायद्रष्टिं द्रष्ट
व्यं ॥ गुणौ ज्ञानरहितः केवलो वस्तुत्रयरहितः ब्रह्मैव पूर्णो वास्मीत्यर्थः ॥ १६ ॥ केवलं त्वं
वान् क्रिया न मम रूपेति ॥ नामरूपक्रियाभ्यो न्यो नित्यमुक्त [illegible] स्वरूपवान् ॥ अहमात्मा परं ब्रह्म
चिन्मात्रो हं सदा द्वयः ॥ ७ ॥ वाच्यवाचकतथापारात्मकप्रपंचविहीन इत्यर्थः ॥ सुगममन्यतु ॥
७ ॥ [illegible] मनः संगच्छते ॥ अहं ब्रह्मास्मीति वदहं कर्त्तास्मीति चानुभवस्यात्र ५०
मा [illegible] नकर्मसमुच्चयवादिनो नेश नेहमतो माशि शास्त्राकुत्सयन् नु २
द्वैतो [illegible] मतेन [illegible] अहं ब्रह्मास्मीति ॥ ॥ अहं ब्रह्मास्मि कर्त्ताविभोक्त्वास्मीति ये

विदुः ॥ तेनष्टा ज्ञान[illegible] मस्यां नास्तिकाः स्फुरन्ति संशयः ॥ ११ ॥ विरुद्धार्थप्रतिपादकत्वायोगाद्धा
स्त्रस्य [illegible] कर्मकाण्ड ज्ञानकाण्डबहिर्मुखत्वान्नास्तिकत्वमेव तेषां फलि
ष्यती [illegible] ब्रह्मत्वेन कथमद्वैतमत सिद्धिस्तत्र प्रमाणस्य संभवादित्यत आह ॥ ध
र्माधर्मो [illegible] ॥ धर्माधर्मफलैर्योगि दृष्टोदृष्टो यथात्मनः ॥ शास्त्राद्ब्रह्मत्वमप्यस्य मोहो ज्ञाना
त्यथैव [illegible] नो धर्माधर्मफलैः सुखदुःखादिरूपैर्योगः संबंधः प्रमाणान्तरै
र्दृष्टोपि यथा शास्त्रादेव पुण्येवै पुण्येन कर्मणा भवति पापः पापेनेत्यादेरदृष्टोंगीकृ
तिः तः शास्त्र्यते ॥ हिरिशैष ॥ तथास्यात्मनो ब्रह्मत्वं ज्ञानादेव मोक्षश्चेति ब्रह्मवेद ब्रह्मैव भव
ति ॥ तमेव विदित्वा ति मृत्युमेति नान्यः पंथा विद्यतेयनाय इत्यादि शास्त्रादृष्टं ॥ तथा भे
दकर्मणो निंदितयोः शास्त्रै तात्पर्यविषयत्वायोगा [illegible] छास्त्रानुसारिभिर्यथा शास्त्रमर्थः प्र

तिपन्नव्यपरतिभावः।१७।। नचात्म नोधर्माधर्मफलयोगः शास्त्रोक्तो मानांतरविरोधाभावात्तथै
वेतियुज्यते। ननयात्मनो ब्रह्मत्वं।। न्नत्यरूहृदृष्टकर्तृत्वादिविरोधादृतः श्रुत्यनु नवयोरविरो
धायगौ दृशिरेवाध्यारणीया विति चेन्नैवं।। कर्तृत्वादिप्र तिभासस्याध्यासत्वाद्युक्तं चैत
त्प्रतिपक्षत्वानुपपत्तेरितिसदृष्टांतमाह।। यामहारजनाद्याइति।। यामहारजनाद्यास्ता
वासनाः स्वप्नदृश्यो लिंगः अनुभूयंतएवेह ततोन्यः केवलो हरिः।२०।।तस्मादैतस्य पुरुषस्यरू
पंयथा महार ... रमयथासंरूधि ध्रुवमित्यं तेनश्रुत्युक्ता या वासनास्ताः स्व ५२
प्नदृ ... यथैत्वस्वरूपयोजना।महारजनं हरिद्रतयारंजितं ... महार
जनंस्व ... वादासितस्यमनसोवात पित्त श्लेष्मदूषितरसपूर्ण ... अ
नुगतस्या ... नेकवासनातया जाग्रद्दृष्टार्थाकारेण परिणममानस्य हरिद्रारंजि

तपटादि ... यथाभासमानस्यान दृदृश्यपदश्ननित्काररागादिभावेननिसंश्चप्रब्रोप
लभ्य ... स्मे। हारजनादिमहद्रावासना मौलिंगा ... समहितास्वप्नदृष्टात्मादर्शिन
... वे। तथाकर्तृत्वादीनां दृश्यत्वादनात्म धर्मत्वमेवेति निश्चितमेवेह जाग्र
दवस्थायाम ... कर्तृत्वादिधर्मकाल्लिंगाद्न्यः केवलः शुद्धो हरिरात्मेत्यर्थः।२०। आत्मनःस्व
प्नावस्थायां दृष्टृत्वेन क्रूरत्वेन प्रतीतिमेवदृष्ट्यंतेनस्थयेति।।कोशादिवेतिग।।कोशादिवि
निर्मुक्तः कार्यकारणवर्जितः।यथासिः स्वप्नतेस्वभेतुदबोधात्स्वयंप्रभः।२१।।स्वशरीरंयथा
शरीरं थैश्चासिरिवेतिसंबंधः। यथाशरीरंयथावस्तित्यर्थः।यथासिः स्वकोशो यथास्त्रयात्कुरुतेन इ॰२
स्वरूपेण दृश्यते तेनदृदृबोधात्मा कार्यकारणवर्जितः कार्यकारणाकारमनसो लिंगात्पृथ
ग्भूतः स्वप्नेयथावदृश्यते इत्युक्तेविष ... यवद्दृश्यत्वान्नि श्यात्वमित्याशंक्याविशिनष्टि स्वयं प्रभ
दृश्यते २

स्वमहिम्नैव दृश्यते न विषयतयेत्यर्थः। यद्वा कथमवगम्यते। स्वप्रकाशं कार्यकारणवर्जितं इति वीतायाम् मन्त्रार्थं पुरु
षः स्वयं ज्योतिरिति [illegible] इति ५२ सस्य स्वप्रकाशत्वे [illegible]

इति। स्वयंप्रकाश इति। श्रुत्याप्रणीत इत्यर्थः। उपाधेः स्थकुम्भरूपेणावस्थानमात्रे सिद्धे स्वां
तइति नैव षष्ठ्यर्थकावकाश इति द्रष्टव्यं। २१। लोकस्य न कर्तृत्वादिप्रवृत्तिनाशं [illegible] दन्निष्ठत्वात् स्फुर
णं वा तस्मा ब्रह्मेवेति। श्राद्ध विरोधे नैव प्रत्येतुं शक्यत्वान्नभेदानेह कल्पनया। [illegible] यम
ति सिद्धे शेसोपक्रमे वादं प्रमाणमाह॥ आदेशो द्वितीः॥ आदेशात्मनि तु [illegible] तस्य स्वा
भाविकयं [illegible] क नेत्यादिवाक्येन कल्पितस्यापनेतृत्वात्। १२। तथापि तन्नापेषं बोध्यं च कार
सहोक्षस्था वि[illegible] तेसु स पुरुषो ब्रह्मात्मा [illegible] जन्मिस्यादि प्राणानाम निरासं मत्रि
तोन [illegible] तात्त्वापिष्य[illegible] इति निर्धारितस्तेन प्राणेन्द्रियादि[illegible] पलिंगसं
घोत [illegible] स्थूलसंघातादत्र [illegible] तिप्रतिपन्नमत एव [illegible] त्वानुमा
नाच्च नापि [illegible] पात्रवति सुक्ष्मस्य तस्य त्वे पदार्थस्य स्वाभाविकेपदत्वर ब्रह्मलक्षणमुक्तं॥ ५२

केन नेत्यादिवाक्येन। अथात आदेशो नेति नेति स्मात्मन सत्यस्य सत्यमिति प्राणा वै सत्यं ते
षा[illegible] नवाक्येनेत्यर्थः। किंतिषधे[illegible] वाक्येन कल्पितस्याध्यस्तस्य मूर्तामूर्त
त[illegible] स्यापनेतृत्वाद्वति[illegible] केन नेति नेति तिवीप्सया समस्तकारणकार्या
त्मकोपाधिनिषेध द्वारा [illegible] पर्यवसितं नेत्यर्थः। १२। नेति नेत्यादि[illegible] निषेधमानस्य
षिध्यमानस्य [illegible] त्वं [illegible] मित्यतः महाराजा इत्यादि॥ महाराजादयो
३६४ लोकाम[illegible] कल्पिताः स्वनेतद् दृश्यं विधा रूपं वासनया सह। १३। स्वप्ने स्वभा
वस्थाया महाराजादयो लोका यदन्यथि[illegible] निप्रकल्पिता [illegible] वासनया लिंगा
त्मना महद्दृश्यरूपं रूपं [illegible] दाहृतं च मयि कल्पितं विधात[illegible] याचक्षतिः य
त्रैषरां तत्सुप्तो[illegible] विज्ञानमयः [illegible] उपक्रम्य स यत्रै [illegible] वरतिते

हास्यलोकास्तदुतेव महाराजो [illegible] वत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छतीति।२व
शब्देन महाराजत्वादेः स्वप्नद्रष्टृस्समानानां मध्ये निर्दिष्टेव मेवैष एतत्प्राणान्गृहीत्वा
स्वशरीरे यथाकामं परिवर्तत इत्युपसंहरन्तीशरीरमध्य एव स्वप्नाशङ्कं वैच्च लिंगोपाधि
महाराजाधात्मवद्यथा गृहीत्वा स्वप्नद्रष्ट्र [illegible] व्यवहरतीति दर्शयति।। अतो न स्वप्नोपलब्धं प
रमार्थमित्यर्थः। तथा च वासनाश्रयलिंगशरीरस्य हि तस्य नृत्तिरूपस्थूलस्याभिद्
त४ गालाभिकाभिर् तत्त्वे दृश्यत्वादुपपन्नमेवेति युक्तमिति तात्पर्यार्थः।।२३।। स्वप्नप्रपंचवदस्ता
प्र [illegible] गात्मनि कल्पितत्वे सिद्धे अस्य कूटाभिनुस्य कर्मसंबंधः। शिदस्या
हा [illegible] ।।। देहलिंगात्मना कार्या वासनारूप। रणक्रियाः। नेति नेत्यात्मरूपत्वा
न्मेकाया। कयाकचित्।।२४।। क्रियाः कर्माणि देहलिंगात्मना स्थूलसूक्ष्मदेहरूपेणान्द

भिमा [illegible] त्ता मापन्नेनात्मना कार्यानुष्ठेयाः। न पुनस्तान्निरपेक्षेण तदभिमानशी
ने [illegible] र्ण।। किं न रूपेण च वासनासु पिधीवा मनाः रूपयितुं संचेतुं शीलमस्ती
ति वासना [illegible] स्तुनः पुनः कर्म हेतुतिनिमित्तेनाविधिकेनेत्यर्थः। इदानीमि ममनेति
ने [illegible] स्वरूपत्वाद्देहद्वयाभिमानाभावात्कचित्स्वप्नेवाजागरेवान क्रिया
कार्या केनापि स्वभावतो विशिष्टेत्यर्थः।।२५।। अतानविलसितद्देहाभिमानात्वकमेति
तस्मात्ज्ञानमूलत्वे सिद्धे मतेनमोक्षशास्त्र [illegible] स्वाहा। ननु तदपि।।।। ननु तो मुक्तत्वा
त्तिकर्मणो ज्ञानहेतुकः।।।। मोक्षस्य ज्ञानहेतुत्वान्न तदन्यदपेक्षते।।२६।। तत्तस्मात्कर्म
णो हेतोरमृतस्यार्थी मोक्षनावस्या ज्ञा [illegible] आरांसनेन्नास्तिकतौ ज्ञानहेतुतो ज्ञानहेतुक
त्वाद्विवेकपूर्वकस्मात्कर्मणः इत्यर्थः। जउयोरज्ञानकर्मणो विरोधाभावान्नो ज्ञाननिकृष्टरूप

Dr BHAU DAJI
डाक्तर भाऊदाजी [illegible]

मोक्षेऽकल्पिताकायक्लिष्टात्मनावस्थानरूपस्य वपरस्मान्नैरात्रिविलक्षणस्य मोक्षस्य
वाऽविधिक्रियाफलविलक्षणत्वान्न तत्रापि कर्मापेक्षेति भावः॥ कर्मणः स्वर्गोपोद्धहेतुत्वा
भावे विकोऽसंदेहज्ञानमहायतया तद्धेतुर्भविष्यतीत्याशंक्यात्मा न जिह्रतो ज्ञानमात्रस्य सम
र्थितात्तत्र कर्मसहायतापेक्षते[illegible] तदत्र तस्य स्वतःसिद्धत्वादित्यभिप्रेत्याह मोक्ष
तिप स्येति [illegible] क्रियाख्यममृतत्वं स्यान्नहि स्वर्गादिवत्कृष्यादिफलवद्वानित्यं संभवेच्च
[illegible] [illegible] मनये शलिशं विंदते इत्यमृतरूपत्वश्रुतिविरोधादतोऽन्यदात्ममि १४
पं३ ति[illegible]पार्तत्वोऽस्यालस्यानाऽनित्यपक्षे[illegible]न विरोधश्चेत्यनित्येत्याह
॥[illegible]चाश्रयेनाऽनित्येति त्यात्माक्रियोऽमृतः विपरीतमतोऽन्यद्यस्य जैत्तम
क्रियं[illegible]॥२॥ तान्हितत्वप्रकरणं॥ ॥ब्राह्मणस्य धः॥ अमृतत्वं नयेनान्यमित्यर्थः॥ पद्य

पिरूपममृतत्वमुक्तलक्षणमकर्मसाध्यं तथापि जीवोऽमृतत्कर्मणैव[illegible]मितेत्याह ८T१
शंक[illegible]लक्षणे[illegible]न्यत्वाज्ञावान्मेवमित्याह॥नेतीति॥यः क्रियोज्ञायादि श्रीत्यास्य
दतं[illegible]ममात्मा स्वरूपभूतोऽनेन जीवेनात्मनानुप्रविश्योत्पादिः क्रतेः॥सच
द्दृ५ नेत्योत्यपोह[illegible]विशेष इतिमरूपत्वान्नतस्य कर्मध्रा(प्य)ममृतत्वमित्यर्थः॥ अतएवक्षाद्य
न्तत्वभावाद्दृढ[illegible]बुद्ध्यागत्यमाणं विपरीतं दृश्यमनात्मनृतं क्रियासहितं त्यजेत्त
दनिमानं त्यजेत्तत्तस्मात्कारयादित्युपपत्ते[illegible]रार्थः॥ नचायमात्मनस्य विधिस्तस्या
विनियोज्यत्वात्तत्प्रत्यनुवादमात्रं साधकस्य पुनरुपयुज्यते मियोगइतीह विधिः
त्यपनिर्देशाऽहतिद्रष्टव्यादेः॥ ॥इति हितत्वप्रकरणमेकादशोऽविद्वत्त्वे प्रथम॥ नन्वप
हितोक्ताविप्रयाशेक्षोनिर्विशेषब्रह्मस्वरूपत्वनहि सर्वोलोको हमहमित्यात्मान

मनुभवन्नपि ब्रह्मास्मीति निर्दृष्टं नानुभवतीत्याशंकायां परार्थत्वपरिशोधनाभावात्प
राधस्य देवेति त्वं पदार्थशोधनप्रधानं प्रकरणमारभमाणः समासतः करणाविवेकाद्धा
थात्मेन स्वात्मानं नन्वत्वे त्रिस्रवेलोक इति प्रथमं सदृष्टान्तमाह। प्रकाशस्थ मिति॥ ॥प्र
काशस्वरूपयथा देहं सालोकम भिमन्यते। दृष्टान्ते तथा चित्तेन्द्रदृष्टाहमिति मन्यते ॥१॥य
थायं जनः स्वकालोकम ध्यगतस्थूलदेहं तलो विलक्षणमपि तेनालोकेन व्याप्तत्वा
त्सालोकस्तामेक विशिष्टमात्मानमभिमन्यते। न थान दृष्टान्तासं चित्तं सात्त्विचेतन्यधाबध्या ५५
समतः कृत्स्नं सवेतनं मन्यमानो हं द्रष्टेति सान्तासं चित्तमेवात्मानं मन्यते नन्तत्वाथा
त्मं तन्न ... प्रत्यगात्मावः॥ यथा विशेषेण सर्वत्र प्रकृतमालोकं देहं सं पर्कान्तदाका
२हेग राकारितान्न देहपमानं देहेन मस्पर्शालोकस्तथा सदा स्वरूपेणानवच्छिन्नप्रकाशस्वना

बोधात्मं ... संपर्कात्तदाकाराकारितइवभासते इत्यहंकर्त्तादिदृष्टालोकेत्येव
मेतत् ... नावविशिष्टमेवात्मानमनुभवतिलोकोनपुनर्यमिति॥२॥ एवमात्मनस्सा
मान्यतः करणाविवेकमुक्ता तद्धारेणादेहपर्यन्तमविवेकं दर्शयन्नात्माप्रतिपत्तिमेवलोक
स्यदर्शयति। यदिवेति॥ ॥यद्वेवहरूप तेस्लोके ते नाभित्वमात्मनः॥ प युक्ते तत्त्वो तत्
स्तेनात्मानं नविंदति॥३॥ यद्वेवसाजात्यं चित्ताविविक्तलया हंकारास्पदशरीरं विषयं स्थूलदे
हपर्यन्तं दर्शयते नुभूयते लोके यद्वद्धा रक्तमा चित्तियावत्यं तेनधारा दृदेहांवेनोत्मनो
भिन्नत्वं तादात्म्यप्रपद्यते। चित्ताद्दिदेहपर्यन्तं विदाभासप्रतीतेस्तद्विवेकात्संघात
मेवात्मानं मन्यते इत्यर्थः। यतएवं तन्नस्मान्मूढो देहादेरात्मनश्चान्यो न्यमध्या
सक ...ऽसंस्तेनमोहेन हेतुनात्मानं ... ब्रह्मत्वेन न विंदति नप्राप्नोतीत्यर्थः॥३॥

उक्तमंशद्दृष्टं तेन सा ध्यतिद्रष्टामस्मेति॥ द्रष्टामस्य न वात्मात्वप्रतिवेदात्मनः। द्रष्टृपेषु तद्दे
वायं मूढो लोको न चान्यथा॥३॥ द्रष्टाहमिमाणवकाः कश्चित्तु नदीं तीर्त्वा पारंगताः संतो गणयामा
सुः कति वयस्मः इति तत्र गणयित्वा स्वात्मानं विहाय नवैव गणयति स्मेति प्रसिद्धिः। तत्र य
द्वत् यथा दशमस्यात्मनो माणवकस्य गणयितुर विवेकात्तवात्मत्वप्रतिपत्तिः। नवस्मोन्यमा
त्मानं न विंदति नैव वयं दशमो नास्तीति भ्रांतिरूपलभ्यत इत्यर्थः। तद्वत्त्वयैवायं लोको बुध्या
दिषु दृश्येष्वेतात्मतारा तस्य प्रतिपत्त्या मूढः शास्त्रवापेपि द्रष्टाहीनः स्वात्मानमन्यथा प्रतिपद्य
ते न चान्यथात्वे परीक्षेन बुध्याद्युपोहे न ब्रह्मास्मीति स्वरूपयाथात्म्यं न वेत्तीत्यर्थः॥४॥ न
नु ध्वस्त [illegible] स्पष्टत्वे विरोधस्य प्रत्यगात्मन ॥४॥ कर्तृत्वादिधर्मवत्वं ब्रह्मरूपत्वं वा
स्फ [illegible] किमिति विवेकोत्पन्नया मूढत्वमाश्रीयत इत्यत आह। त्वं कुर्विति॥५॥ द्रष्टा शास्त्रावापेपि द्रष्टा

नो बुध्यादिविपरीते नात्मयाथात्म्यं न जानातीति तस्य पदार्थविवेकाभावात्सोन्यो नोपपन्न इति
स्मृति लेत [illegible] पदार्थविवेके न कृत्स्नं शास्त्रार्थं लभते प्रतिपत्तेः सति ब्रह्माहमस्मीति प्रसंख्यानादेवात्मयाथा
थात्म्यापरोक्ष्यं [illegible] पपन्नत इति प्रसंख्यानविध्यवभरमाशंक्य परिहरति॥ त्वं कुर्विति। त्वं कुरु त्वं तदे
वेति भ्रुत्वा विवेककालिकी॥ एकनीजोकथंस्यातां विरुद्धो न्यायतो वद॥६॥ एकनीजौ एकस्मिन्विषये विरुद्धौ
प्रत्ययौ एककालिकाविवेकावस्थानजौ कथं स्यातामिति न्यायतो युक्तितो वदेत्यन्वयः। तथा चैकस्मिन्ना
त्मनि कर्तृत्वमितिकर्तृत्वाकर्तृत्वप्रकारक विरुद्धबुध्योः समसमयमोर्मध्ये तादृशाशीतोष्णबुद्धि
वदन्योन्यस्यान्यतरबुध्या अन्यतरबाधनयुक्तो नोभयोः प्रामाण्यमित्यभिप्रायः॥६॥ तर्हि दुःखित्वादिप्र
वेन प्रत्यक्षानुभवेन ग्राह्यस्य तस्य बाधनोपपत्तेस्तदीयस्थैर्यार्थं प्रसंख्यानविधिः स्यादित्यत आह
।देहेति। देहाभिमानिनो दुःखं नादेहस्य स्वभावतः। स्वापवत्तस्य हाणा एतत्स्वमितिं सुप्तेद्रशो ॥५॥

यदि दुःखित्वादिकमात्मनः स्वाभाविकं स्यात्तदा तत्तज्ज्ञानान्यासशो नापि निवर्तयितुं शक्यते ज्ञा
नस्य ज्ञानमात्रविरोधित्वात् तथा च तन्निवृत्तिहेतुरनर्थकः। यदा त्वविद्याप्रयुक्तदेहाद्यभिमाननिबंधनं दुः
खित्वादि तदा विद्यानिवृत्त्यैव तन्निवृत्तेरविद्यानिवृत्तेश्च ज्ञानमात्रात्तत्वात्मकर्मविध्वंसकाश इति श्लोकतात्प ५३
र्यार्थः। अहं देहस्य देहाभिमानरहितस्येत्यर्थः। तत्र हेतुः स्वभावत इति। अयं देहत्वमात्मनः स्वाभाविकं रूपमिति मि
थ्यात्मकमाहं ॥१६॥ यदि तावदज्ञानाद्देहस्येत्यनेन देहाभिमानव्यतिरेकेण न दुःखमस्तीत्युक्तं व्यतिरेक
मात्रं ॥ स्वापव्यत्यासुषुप्तावित्यर्थः। देहो रात्मन [illegible] स्तत्र हारणाय मूलाभिमाननिवृत्त्ययैतत्वमि ५७
घप३ ति [illegible] मात्रं बोध्यते न कर्मेत्यन्तरार्थः। पातत्वमादिवाक्याद्देहादिव्यतिरिक्तमात्मानमव
गच्छतो [illegible] मिति प्रतीतेरनुवृत्तेर्नाभिमाननिबंधनं दुःखमित्याशंक्य तन्निवृत्तिहेतात्मदर्शनिस्याभासत्वा
न्नैवमित्याह। दर्शनेति। दर्शोऽच्छायायदारूढा मुखच्छायेव दर्शनि। परं स्तं प्रत्यंचं योगी दृष्ट्वात्मेतिमन्यते ॥१०॥

दर्शयतीति दर्शनिदर्पणादि तस्मिन्मुखच्छाया मुखाभासो मुखप्रतिबिंबरूपा यथा आरूढा भवतीत्य ह
रोः अस्यगा [illegible] छाया आभासो यदारूढा यस्मिन्संक्रान्ते भवतीति तं प्रत्यंचं प्रत्यायतीति प्रत्यग्योऽहंकारः तं
साक्षात्मनः [illegible] परस्परं स्वरूपमिति उपलभमानो योगी श्रवणादिविद्यादियोगवानपुमानात्मा दृष्टृ इति मन्य
ते। यथा [illegible] मुखस्य भावाविवेकाद्यथा दृष्टदर्पणदोषमालिन्यादि विशिष्टमेव स्वमुखमत्य
फा५ ते तथा [illegible] पाधिदोषैराक्रांतमिव तदविवेकादात्मानं परस्परं स्वरूपं कर्त्रादि दुःखित्वमिति मन्यत इत्यर्थः।
तथा चाहमिति [illegible] नस्य कल्पितात्मविषयत्वाद्युक्तं दुःखित्वस्याविवेकाभिमाननिबंधनमिति निसम्य
गात्मानं वा [illegible] व गच्छतो दुःखित्वाद्यनुवृत्तिरुपपद्यते कदाचित्तथा भानस्य बाधितानुवृत्तिमा
त्रत्वादिति भावः ॥ यदि मानात्मा स्वाहंकारमात्मानं परस्परं सम्यग्दर्शी कस्तं [illegible] तयामाहात्तं वे सि सम
तावज्ज्ञानसंबंधो नास्ति॥ उत्पन्नस्य च स्वरसभंगुरत्वात्क्रमकारक   तया ज्ञा
नात्मागवस्थानाभावात् ज्ञाने न संबंधनिरूपणं च प्रत्यक्षानुभवविरोधान्नि
त्यानुमेयत्वकल्पनानुपपत्तेश्च परिशेषात् ज्ञानस्यैवाकारो विषय इति विज्ञा
नमात्रास्तित्ववादिमतप्रवेशाद   तिभावः॥ किंचानुभवितुरपि लेमते क्षणिक
त्वादन्यानुभूतेऽन्यस्य स्मृत्यदर्शनादनुभूतविषयस्मृत्यभावश्च प्रसज्येते त्याह॥ ११९

स्मृत्यभाव इति॥ क्षणभंगुरत्वात्क्षणिकत्वात्सदास्मृत्यभावः प्रसज्येतेत्यर्थः॥ स्मृतिहे
तुसंस्कारोऽपि ते दुर्लभ इत्याह॥ क्षणिकत्वादिति धीः कचिदपि संस्कारं नैवा
धत्ते॥ न निक्षिपति॥ सर्वस्य क्षणिकत्वादित्यर्थः॥ चरार्थान्तरस्यात्मनोऽपि स्वस्या
श्रपि क्षणिकत्वादित्यर्थः॥२५॥ केचिदित्युक्तं स्फुटय   ति॥ आधारस्येति॥ ॥आ
धारस्याप्यसत्त्वाच्च तुल्यतानिनिमित्ततः॥ स्थानेवाक्षणिकत्वस्यह्य   नेस्यान्नतद्वि
ष्यते॥२६॥ ॥यत्र संस्कार आधानं आत्मनं तःकरणे वा तस्याप्याधारस्य सं
स्काराधानकालेऽसत्त्वाच्च स्मृत्यभाव इत्यन्वयः॥ यदुक्तं साहृश्यनिबंधनोऽत्र भ्रमएव
वत्यभिज्ञानमिति तद्दूषयति॥ तुल्यतेति॥ ॥इतरे आरभ्यक्रियमाणं दूषणं क्षणि
कविज्ञानमात्रवादेऽपि समानं ज्ञेयं॥ तुल्यतानिनिमित्ततः इत्येकं पदं   तुल्यतायाः

पूर्वापरक्षणयोः सदृशत्वस्य निमित्तानाद्वादित्यर्थः ॥ गुणेऽवयवे वा सामान्यं सा
दृश्यव्यवहारनिमित्तं तद्भिन्नानां नास्ति निर्गुणत्वान्निरवयवत्वाच्च ॥ तथा पूर्वोत्त
रक्षणयोर्दृष्टुरेकस्यासत्त्वाच्च न सादृश्यसिद्धिरतस्तुल्यताया असिद्धेर्न तन्निबन्ध
नं प्रत्यभिज्ञानमित्यर्थः ॥ अथ पूर्वापरक्षणसादृश्यद्रष्टा स्थायी कश्चिदात्मास्थी
ते तत्राहास्थाने वेति ॥ तत्क्षणिकत्वहानेनेष्यते त्वयेति शेषः ॥ २६ ॥ यत्तु क्षणिक
त्वादिभावनया स्थायित्वादिभ्रान्तिशान्तिर्मुक्तिरित्युच्यते बौद्धैस्तदपि नोपपद्यत
इत्याह ॥ शान्तेश्चेति ॥ ॥ शान्तेश्चाप्रयत्नसिद्धत्वात्साधनोक्तिरनर्थिका ॥ एकैकस्मि
न्समा सत्वाच्छान्तेरन्यानपेक्षता ॥ २७ ॥ शान्तेरप्रयत्नसिद्धत्वमेव साधयति ॥ एकैक
स्मिन्निति ॥ भावानामेकैकस्मिन्क्षणे समाप्तत्वात् तत्संतानस्य चावस्तुत्वादेकै

कस्मिंश्चान्त्यभावाच्छान्तेरन्यनिरपेक्षता सिद्धा तत्साधनविधानोक्तिर्नि
रवकाशेत्यर्थः ॥ २७ ॥ किंचास्मिन्मते लोकेऽपि साध्यसाधनभावो न घटत इत्याह ॥ अ
पेक्षा यदीति ॥ अपेक्षा यदि भिन्नेऽपि परसंतानदृष्टताम् ॥ सर्वार्थि क्षणिके कस्मिंस्त
थाप्यन्यानपेक्षता ॥ २८ ॥ कार्यकारणलक्षणनाम त्यंतविलक्षणत्वात् भिन्नेष्वप्य
पेक्षा तव्यास्तेऽपि हीरे यदि दृष्टापेक्षा तदा परसंताने सिकतादावपि दृष्टापेक्षेष्यतां
अत्यन्तभेदाविशेषात्कथं नेष्यत इत्यर्थः ॥ तथा च सिकतास्योऽपि दधिनायेते
सति प्रसंग इति भावः ॥ वसिष्ठवचने नातिप्रसंगपरिहारशंकां तदीयामनूद्य
निराकरोति ॥ सर्वार्थ इति ॥ सर्वस्य जनस्यार्थेप्सिमाने कार्यकारणभावेनच्छिते द
धिक्षीरादौ वस्तुनि क्षणिकेऽपि कस्मिंश्चित्क्षीरत्व कस्यचिद् दृष्टापेक्षा न सर्वत्रेति लो

ऽब्रातिशा० ४८

कत्वसिद्धेनानिष्टप्रसंग इति चेदिति शंकानुवादार्थः॥ तथापि प्रसिद्ध्याश्रयेणापि
रूपेणैकपक्षेऽप्यानपेक्षत्वेनेति परिहारभागार्थः॥ २०॥ तत्र हेतुमाह। तुल्यकालेति। तु
ल्यकालसमुद्भूताविति तरेतरयोगिनोः॥ योगाख्यसंस्कृतोऽयं तु सोऽस्मीत्याह किं तु महे
ऽ४ ति॥ २१॥ यो भावो तुल्यकालसमुद्भूतावेककालेन ह्यात्मकौ इतरेतरयोगिनौ
परस्परसंबद्धौ च यथा पर्जन्यांकुरौ तयोर्मध्ये यस्तु भावोंऽकुरलक्षणः पर्जन्ययोग
तः संस्कृतश्च नेवेतस्सहिरवल्वेनमुपकारिणामीक्षितुमपेक्षितुमर्हति न त्वेण १२१
कस्तथा प्रसिद्धभावादृतं क्षणिकानां भिन्नकालतया परस्परसंबंधाभावेनो
पकारकत्वायोगादापेक्षा घटयितुं शक्य त इति भावः॥ २१॥ तदेवं क्षणिकमतेनि
राकृत्य निष्पन्नादोस्वमतस्सामंजस्यमुपन्यस्यति। मृषेति। मृषाध्यासस्तु यत्रस्यादशा
कृत्यस्मन्मतं निरा।

शस्तत्र नो मतः सर्वनाशो न वेद्यस्य मोक्षः कस्य फलं वद॥ ३०॥ यथा वेदांतिमतेऽपि ब्रह्मा
त्मनोऽनाद्यविद्याश्रयत्वात्क्षणिकमत इव तुल्या मोक्षानुपपत्तिरित्याशंकापरमा
र्थतो तिशयायोगेऽपि स्थायित्वात्फलत्वोपपन्नैवमित्याह। मृषेति। यत्राधिष्ठा
ने ब्रह्मात्मनि कर्तृत्वादिसंसाराध्यासो मृषा मिथ्या॥ अथवा मृषाध्यासोऽविद्यानिबं
धनो भ्रमः कर्तृत्वादिसंसारप्रतिभासो यत्र स्यादिति योजना॥ तत्राहं ब्रह्मास्मीतिद्य वि५
या तत्रैव तन्नाशो ध्वस्तनाश इति नो महोऽस्माकं मतमित्यर्थः॥ तथा च योऽज्ञानाद्बंधा
नुभववांस्तस्याज्ञानाद्बंधनिवृत्त्या शुद्धस्वरूपानुभवः पुरुषार्थ इति वेदांतिमतं समं
जसमिति भावः॥ इदानीं शून्यमते दोषमाह॥ सर्वनाश इति। अनुभवितुरभावात्क
स्य पुरुषार्थः सर्वनाश इति वदेत्यर्थः॥ अधिष्ठानाशेऽप्यधोन भयोरपि नाशे

तन्नाह . भावाभाववज्जातइति ५

फलाभावात्फलासिद्धेर्मेन्त्रासिद्धिरिति भावः ।३०। सर्वनाशाद्वमोक्षो बलादापतति
परमार्थभावस्यास्तित्वे प्रमाणाभावादित्याशंक्याह । अस्तीति । अस्ति तावत्स्वयं नामज्ञा
नं वात्मान्तरं वा ।। भावाभाववत्तत्त्वस्य नाभावस्त्वधिगम्यते ।३१। स्वयं नामात्मीयवि
वादं सर्ववादिनां सच्चज्ञानं वा आत्मा वान्यद्रूपं वेत्यपरं विकल्पस्तस्याभावस्तु नाधि
गम्यते शून्यतानुनप्रामाणिकीत्यर्थः । कुत इति । लोकव्यवहारसिद्धार्थानां भावा
भावानिजत्वादन्यथा स्थिरस्य कस्यचित्तु साक्षिणोऽभावे सर्वव्यवहारलोपप्रसंगइ
त्यर्थः ।३१। तस्याप्यभावः कस्यचिज्ज्ञातीत्याशंक्याह यस्मादिति तस्यैव सत्त्वप्रसंगे नैरा १२२
त्म्यलक्षणं कार्णादतिपरिहरति येनेति । येनाधिगम्यते भावस्तस्य सत्त्वं नचेन्नु । भा
वाभावानतिजत्वं लोकस्य स्यान्नचेष्यते ।३२। अथवा उक्तमेवार्थं प्रपंचयति । येनेति

वे २

नशक्यतेनिराकर्त्तुरिवतत्त्वस्वरूपत्वात् त्याहनवे२

येनाभावोऽधिगम्यते सर्वस्य तत्त्व देवस्यातु विपर्यये दोषमाह । तन्नचेदित्यादिना
अस्तु लोकस्य भावाभावानतिजत्वमिति चेन्नेष्यत इति । केनापि सोभिज्ञो निराकर्त्तुं
तं स्यव सत्त्वात्तस्यापन्हव वचनं स्वानुभवविरुद्धमेवेत्यर्थः ।३२। यद्यपि भावा
भावविभागस्तं किंचिदस्तीत्यवगतं तथापि तत्कीदृशमिति विशेषतो निर्धारणे
कारणं नास्तीत्याशंक्याह तत्स्वरूपमुपपादयति । सदसदिति । सदसत्सदसच्चेति
५४ विकल्पात्मान्यदिष्यते । तदद्वैतं समत्वान्तु निस्पंचाधिकल्पिता ।३३। माध्यमिकास्तु स
ज गद्य सत्सदसद्रूपमिति चयो विकल्पो विवादस्तस्मात्तागेव सिद्धं निरालंबन
विकल्पानुपपत्तेर्यत्स्वरूपमिष्यते तदद्वैतं तत्र हेतुः समत्वादिति । विकल्पात्मा
वैषम्यहेतु भावादित्यर्थः । द्वैतज्ञ उ विलक्षणत्वं तत्स्वरूपमभिधाय विनाशित्वं वि

अप्रसत२

णान्तरमाह। नित्यं चेति। अनृतविलक्षणत्वेन सत्यत्वं च विशेषणान्तरमाह। अन्य द्विकल्पिता इति।
विकल्पात्सर्वाग्रहविषयत इत्यत्र हेतुः सिद्धत्वाज्ज्ञानरूपत्वमुक्तम् अद्वैतमित्यानन्त्यमुक्तं। नित्य
मिति कूटस्थत्वोक्त्या दुःखाभावस्य सूचितत्वादद्वितीयानन्दरूपता ध्वनिता। तथा च सत्य
ज्ञानानन्तानन्दरूपमात्मतत्त्वमित्यनुभवादेव सिद्धमिति न तत्र कारणान्तरमपेक्ष्यमिति भावः॥१७॥
नानाविधे द्वैते प्रतीयमाने कथमद्वैतमात्मतत्त्वमनुभूयत इत्यत आह। यद्वा ननु सत्य
त्वमुपपाद्य स्वरूपस्य विकल्पात्मकतया ऽनृतत्वं प्रतिपादयति। विकल्पो विनिवर्ततेति। विकल्पो
विनिवर्तेत सर्वस्य स्वप्नस्वरूपवद्दृश्यत्वाद्द्वैतस्य प्रागसत्त्वादसदृशत्वाद्विकल्पनात्॥१८॥ द्वैतस्यासत्त्वे प १२३
रमार्थत्वाभावः स्पष्टः। कुतो विकल्पो विनिवर्तेत विकल्परूपेणोत्पन्नत्वात् स्वप्नदृश्यवदि
ति योजना। द्वैतं न परमार्थसत् दृश्यत्वात् स्वप्नदृश्यवदित्यर्थः। हेत्वन्तरमाह। प्रागिति।

असदृशत्वादिविकल्पनात् प्रागसत्त्वाच्च स्वप्नदृश्यवदिति सम्बन्धः। न हि द्वैतस्य ज्ञानात्सत्त्वे प्रमाण
मस्तीति भावः॥१९॥ ननु यतो द्वैतं मिथ्यात्वमुपपाद्यते शास्त्रादपि मिथ्यात्वमुपपन्नमित्याह। वा
चारम्भणेति। वाचारम्भणं शास्त्राच्च विकाराणां श्रुतं वचनात्। मृत्योः स मृत्युमित्यादेश्च मम मायेति च स्मृ
तेः॥२०॥ वाचारम्भणं विकारो नामधेयमिति श्रुतिः शास्त्रादिकाराणामभावता सिद्धेति शेषः।
वाचारम्भणशब्दार्थो ह्यनृतत्ववचनो वाग्मात्रे मृत्तिकेत्येव सत्यमिति कारणस्य सत्यत्वावधारणा
दित्यर्थः। मृत्योः स मृत्युमिति शास्त्रेण द्वैतदर्शिनः निन्दितत्वात्सत्यत्वे द्वैतस्य तद्दृष्ट्ययोगाद्यथा
र्थत्वं तस्योक्तमित्यर्थः। आदिशब्देन नेह नानास्ति किंचनेत्यादिमन्त्राद्द्वैतापवादकं शा
स्त्रं गृह्यते। मम मायेत्यत्र मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते इति गुणमय्याः सकार्याया
ः मायायाः परमात्मज्ञाननिवृत्त्यत्वस्य भगवतानुशासनात्सत्यत्वेन तदनुपपन्नमायिकत्वं

द्वैतस्यासिद्धमित्यर्थः ॥५॥ तदेवं श्रुतियुक्तिभ्यां द्वैतमिथ्यात्वप्रतिपादनेनात्मनो द्विती-
यत्वे दृष्टीकृते सत्यशुद्धिकारणाभावात्तस्य विशुद्धिरपि सिध्यतीत्याह । विशुद्धिरिति । वि-
शुद्धिश्चात एवास्य निल्या चविलक्षणः ॥ उपादेयो न हेयो वा आत्मा नान्यैरकल्पितः ॥६॥ आ-
त्मनो विशुद्धिः धर्माधर्मतत्फलसंस्पर्शाभावो तत एव द्वैतस्यानृतत्वादेवासद्वयतो विकल्पाद्वि-
लक्षणस्तु विपरीतस्वभावो तत एवात्मानोपादेयो हेयो वा न भवति । हानोपादाने हि मूर्त्तवि-
षयेनामूर्त्ते व्यापकात्मनि तेसंभवत इत्यर्थः । किं चान्यैरकल्पितोऽन्यैः कल्पयितुमशक्यत्वादपि १२४
विशुद्धचात्मेत्यर्थः । न हि सर्वकल्पनाधिष्ठानेकेन विकल्पयितुं शक्यते अतो नित्यशुद्ध इति
भाव ॥६॥ कस्माद्यात्माकल्पितो न भवतीत्याशंक्य कल्पनाहेतोरज्ञानस्य वस्तुत आत्मनि चाभावा अनात्म
वादित्याह । स्वप्रकाश इति ॥ अप्रकाशो यथाहित्येनास्तिज्योतिः स्वभावतः ॥ नित्यबोधस्वरू नि २

पत्वान्नाज्ञानं तद्वदात्मनि ॥७॥ अनात्मनोऽज्ञानकल्पितत्वादेव तत्र तदभाव इति द्रष्टव्यं ॥७॥
यथा नित्यबोधस्वरूपत्वादज्ञानमात्मनि वस्तुतो नास्ति तथा सर्वक्रियारहितस्वभावत्वादव-
स्थान्तरं कूटस्थतावच्युतिरूपं तस्य नास्तीत्याह । तथाविक्रियेति । तथाविक्रियरूपत्वान्नाव-
स्थान्तरमात्मनः ॥ अवस्थान्तरवत्त्वे हि नाशोऽस्यस्यान्नसंशयः ॥८॥ विपक्षे दोषमाह । अवस्था-
न्तरवत्त्वे हीति ॥८॥ मोक्षस्यावस्थान्तरत्वात्कथमवस्थान्तराभाव इति तत्राह । मोक्ष इति । मोक्षो
वस्थान्तरं यस्य कृतकः स चलोऽध्रुवः ॥ न संयोगो वियोगो वा मोक्षो युक्तः कथंचन ॥९॥ यस्या-
हि नो मते मोक्षो अवस्थान्तरमात्मनः स्यात्तस्य मते कृतको मोक्षः स्यात् प्रागवस्थायां स्थितायां
नष्टायां तदभावस्थायोगित्वानुपपत्तेरतः स मोक्षश्चलोऽनित्य एव स्यादिति पुरुषार्थतापा-
त्तिरित्यर्थः । मा भूदवस्थान्तरं मोक्षस्तथापि ब्रह्मणा संयोगो वा प्रकृतेर्वियोगो वा मोक्षोऽस्त

विषतीतिमतांतरमाशंक्याह ॥ ननु संयोग इति ॥ ४७ ॥ अयुक्तत्वे हेतुमाह । संयोगस्येति ।
संयोगस्याप्यनित्यत्वाद्वियोगस्य तथैव च । गमनागमनेनैव स्वरूपं तु न हीयते ॥ ४८ ॥ कृतक
त्वानित्यत्वनियमादित्यर्थः ॥ ननु जीवस्य संसारदेशात् परमात्मदेशागमनं वा परमात्मनो स्वोपा
सकानुग्रहाय तत्र त्यागमनं मोक्षस्त्याशंक्याह ॥ गमनागमने चेति ॥ न मोक्षो युक्त इति पूर्वेणा
द्वयो॥५ नुषंगः ॥ जीवपरयोरप्यविक्रियत्वात् गमनागमनायोगादित्यर्थः ॥ परमते दोषमुक्त्वा स्वमतेपि
दोषितामाह ॥ स्वरूपं त्विति ॥ न हीयते न विनश्यति ॥ तस्मात् स्वरूपमेव मोक्षो युक्त इत्यर्थः ॥ १२५
॥ ४९ ॥ आत्मस्वरूपमोक्षस्य नित्यत्वे कार्यत्वे हेतुमाह ॥ स्वरूपस्येति ॥ स्वरूपस्यानिमित्तत्वा
त्व निमित्तानि चापरेऽनुपाधेः स्वरूपं हि स्वेनात्यक्तं तथैव च ॥ ५० ॥ नास्ति निमित्तं कार
णं यस्य तद् निमित्तं तस्य भावो ऽनिमित्तत्वं तस्मादकार्यत्वादित्यर्थः ॥ अपरे अवस्थांतरादयः

स निमित्ता हीत्यतो नित्याः स्युरित्यर्थः ॥ स्वरूपस्यानिमित्तत्वं तत्र कारणाभावात्साधयन् नुपा
धिमिति स्वरूपं हि नाम तद्यत् ~~[illegible]~~ स्वेनान्येन वा नोपात्तं उपाजितं न भवति
तथा स्वेनान्येन वा त्यक्तमपि न भवति ॥ न ह्युपादेयस्य हेयस्य वा वस्तुनः स्वरूपत्वं दृष्टम
तो नागंतुकं वस्तुस्वरूपं किं तु नित्यमेवेत्यर्थः ॥ ५१ ॥ उक्तं स्वरूपलक्षणमात्मनि लक्षयोजय
ति ॥ स्वरूपत्वादिति ॥ स्वरूपत्वात् सर्वस्यात्यक्तुं शक्यो ह्यनन्यतः ॥ गृहीतुं वात्मतो नित्यो ॥ विष
यत्वादथक्ततः ॥ ५२ ॥ सर्वस्याकाशादेः स्वरूपत्वादारोपितसर्परज्वादिवत्सर्वस्यात्मभूत
त्वात्त्यक्तुं गृहीतुं वा न शक्य आत्मा कुतोऽपि स्मादनन्यतो भेदाभावादित्यर्थः ॥ हेयोपादेयत्वा
भावे सिद्धे फलितमाह ॥ ततो नित्य इति ॥ आत्मन उपादानहानयोरयोगे पुनरपि क्रमेणा हे
तुद्वयमाह ॥ अविषयत्वादथक्ततः ॥ न ह्यविषय उपादीयते स्वरूपं वात्मत्यज्यत इति

युज्यत इत्यर्थः॥४१॥ आत्मनो नित्यत्वे हेत्वंतरमाह॥ आत्मार्थत्वाच्चेति॥ ॥आत्मार्थत्वाच्च
सर्वस्य नित्य आत्मैव केवलः॥ त्यजेत्तस्मात् क्रियाः सर्वाः साधनैः सह मोक्षवित्॥४३॥ ॥सर्व
स्यागमापायिनः आत्मार्थत्वादात्मनोऽपवार्गेष्वनागमापायिभोक्तात्मा नित्य एवेति॥ केव
ल॥ केवलो निरुपाधिरित्यर्थः॥ उपाध्यायतत्त्वोप्यस्य विशेषो नास्तीत्यर्थः॥ यस्मादात्मा
नित्योन्यत्सर्वमनित्यमात्मार्थं च स्यात्मन्यवस्थानं मोक्ष इति सिद्धं॥ तस्मान्मुमुक्षुणा सा
धनं सर्वं कर्म त्याज्यमित्याह त्यजेदिति॥४३॥ ॥इतोपि मुमुक्षुणा क्रियास्त्याज्या इत्याह॥ आ
त्मलाभ इति॥ आत्मलाभः परो लाभ इति शास्त्रोपपत्तयः॥ अलाभोऽन्यात्मलाभस्तु त्य
तस्मादनात्मता॥४४॥ आत्मलाभान्न परं विद्यत इति शास्त्रं सर्वत्यागेनाप्यात्मसंरक्ष
णं प्रवृत्तिदर्शनमुपपत्तिः बहुवचनप्रयोगादनेकत्वं शास्त्रोपपत्तीनां सूचयति। आत्मलाभ

DR BHAU DAJI

स्य नित्यसिद्धत्वात् किमिदमपूर्वमिवोच्यत इत्यत आह॥ अलाभ इति॥ अन्यस्मिन् स्वाज्ञान
परिनिष्पन्नेऽहंकारादावनेदेनात्मस्फुरणमन्यात्मलाभ उच्यते स तु लाभो न भवति सं
सारदुःखहेतुत्वात् स्वतःसिद्धपरमानंदाविर्भावप्रतिबंधकत्वाच्च स्तुतरहितरेवेत्यर्थः॥
तस्मादनात्मतामहंकाराद्यात्माभिमानितामविद्याध्यारोपितां प्रमाणजनितब्रह्मात्म
ज्ञानेनाज्ञानबाधनद्वारा त्यजेदित्यर्थः॥४४॥ आत्मतत्त्वब्रह्मस्वरूपावगमे आत्मलाभ
एव परो लाभः परमपुरुषार्थ इत्यात्मैक्यज्ञानं मोक्षसाधनमात्मावाद्यानंदरूप
स्तस्मिन्नज्ञानमूलः संसारो न परमार्थतः इति स्वमतमभिधाय तत्रैव मुमुक्षूणां मति
रत्नमा २ स्थैर्याय मतांतरनिराकरणं कर्तुमारोणो भगवानूनाष्पकारः सांख्यकल्पनां लावन्निरा
करोति॥ गुणानामिति॥ ॥गुणानां समभावस्य भ्रंशो न ह्युपपद्यते॥ अविद्यादेः प्रमुक्ता

त्र चान्यो हेतुरिष्यते ॥४०॥ तत्र प्रधानं त्रिगुणात्मकं स्वतंत्रमचेतनं पुरुषस्य भोगा
पवर्गार्थं महदादिरूपेण परिणमत इति कल्पयंति तत्राव न संभवति यतो गुणा
नां सत्वरजस्तमसां साम्यावस्था सृष्टिकालीनमेव न स्यात् प्रच्युतिः पूर्वावस्था
त्यागेनावस्थांतरापत्तिरूपः परिणामोपपद्येत कुत इति चेत्तत्र वक्तव्यं किं निर्हेतु
क एव गुणपरिणाम इष्यते सहेतुको वा नाद्यः सदा परिणामप्रसंगात् । द्वितीयप
विद्याद्याः पदृष्टपुरुषा एव हेतुस्तदन्यो वा परमेश्वरो नाद्य इत्याह । अविद्यादेरिति
तस्यामवस्थायामविद्यादेः प्रसुप्तत्वात् लीनत्वात् पुरुषाणामु दासीनत्वान्न तन्नि
मित्तः साम्यावस्थाभ्रंश इत्यर्थः । न द्वितीय इत्याह ॥ न चान्य इति ॥ अविद्यादिभ्योन्य
ः परमेश्वरांगीकारे प्रसिद्धांतभंग इत्यर्थः ॥४५॥ गुणानामन्योन्य प्रवृत्तिहेतु १२९

त्वं स्यादिति चेत्तत्राह । इतरेतरेति ॥ ॥ इतरेतरहेतुत्वे प्रवृत्तिः स्यात् सदा न वा ॥ निय
मो न प्रवृत्तीनां गुणेष्वात्मनि वा भवेत् ॥४६॥ अस्मिन्पक्षे प्रयोजकांतरप्रतीहान
पेक्षणात्सदा प्रवृत्तिः परिणामः स्यात् प्रवास्यादि दोषानावृत्तिरित्यर्थः । अथ कर्मणोस
त्तिसंहारायोगः प्रसिद्धत्वान्न सदा तत्प्रसंग इति तत्राह । नियम इति । नियम्यते नेनेति निय
मो नियामको हेतुः प्रवृत्तीनां गुणकार्याणां मित्यादीनां गुणेषु सत्वादिष्वात्मनि पुरुषे वा
पतो न भवे~~न्न~~ न्न संभवेद् तः सदा प्रवृत्तिरप्रवृत्तिर्वा स्यादि तियोजना ॥ न हि गुणपु
रुषातिरिक्तं किंचित्तत्त्वमभ्युपगतमस्ति सांख्यैर्यत् गुणेषु वा पुरुषेषु वा स्थित्वा प्रवृ
त्त्यादि नियामकं स्यादित्यर्थः ॥४७॥ यथा कथंचिद् गुणवा प्रधानप्रवृत्तिस्तथापि दोषप्र
सक्तिः परिहर्तुं न पार्यत इत्याह ॥ विरोध इति । विरोधो मुक्तबद्धानां तादर्थ्ये न च युज्यते ।

अर्थ्यर्थिनोस्त्वसंबंधो नार्थी ज्ञो नेतरोपि वा ॥४७॥ तादर्थ्ये प्रधानस्य पुरुषार्थत्वे सति बद्धमु
क्तानां बद्धानां मुक्तानां विशेषो न युज्यते न हि सर्वपुरुषान्प्रति साधारणो प्रधानस्यैकस्य व्या
पारे केचिद्बद्धाः केचिन्मुक्ता इति व्यवस्थोपपद्यते ॥ तथा च सर्वदा वा सदा बद्धा मुक्ता वा स्युरित्य
र्थः ॥ किं चास्मिन्मते र्थार्थिनोः शेषशेषिणोः संबंधश्च न युज्यत इत्याह यः ॥ अर्थ्यत इत्यर्थ २
इत्यर्थः ॥ सुखतत्साधनरूपः पदार्थः ॥ सोभिलषितो विद्यते यस्य सोर्थी ॥ तयोः संबंध उपका
र्योपकारकभावलक्षणः स प्रधानवादेन युज्यते न घटत इत्यर्थः ॥ कुत इत्यत आह ॥ नेति ॥ ज्ञो
ज्ञानैकस्वभावः पुरुषो नार्थी युक्तस्तस्यासंगत्वनिर्विशेषत्वाभ्युपगमात् नेतरोपि वा प्रधा १२८
नाख्यो नार्थी जडत्वादेवेत्यर्थः ॥ तस्मात्प्रधानस्य परार्थत्वकल्पनमयुक्तमिति भावः ॥४७॥
एवं प्रधानस्य पुरुषार्थं प्रतिप्रवृत्तिमंगीकृत्याव्यवस्थोक्ता सापीदानीं न घटत इति साधयन्नि

क्रियेततदांगी५

धानस्येति ॥ प्रधानस्य च पारार्थ्यं पुरुषस्याविकारतः ॥ न युक्तं सांख्यशास्त्रे पि विकारे
पि न युज्यते ॥४८॥ पुरुषस्याविकारतः प्रधानकृतातिशयायोगित्वलक्षणविकाररहि
चार तत्वात् प्रधानस्य पारार्थ्यं च न युक्तमिति योजना ॥ नन्वनुविधेयकृतातिश
यायोगित्वमनुपपन्नमित्यर्थः ॥ यदि पुरुषस्य प्रधानं प्रति साम्योपपत्तये विका
रोप्यंगीकृते पि विकारे प्रधानस्य पारार्थ्यं न युज्यते विकारवतो नित्यत्वनियमात् किंप्र
धानं स्वाम्याद्योगादित्यर्थः ॥ सांख्यशास्त्रे पीत्यपि शब्दात् न वेदबाह्यशास्त्रेष्वेवाव्य
वस्था किंतु सांख्यशास्त्रेपीति तस्यापि पुंबुद्धिमूलत्वेन सम्यग्वेदमूलत्वमस्तीति घो
त्यते ॥४९॥ प्रधानपुरुषयोः संबंधाभावमुक्त्वा प्रपंचयति ॥ संबंधानुपपत्तेश्चेति ॥ सं
बंधानुपपत्तेश्च प्रकृतेः पुरुषस्य च ॥ अभियोगो युक्तं न हि यत्त्वं प्रधानस्याविविक्तत्वतः ॥५०॥

पुरुषस्यासंगोदासीनस्वभावत्वात्प्रकृतेः जडत्वेन स्वतः प्रवृत्त्यनुपपत्तेस्तयोर्मिथः सं
बंधानुपपत्तेः प्रधानस्य नार्थ्यं पुरुषार्थत्वमयुक्तं युक्तिशून्यं चेत्यत्र चितित्वेनो जड
त्वात् प्रधानस्य नृत्यवदुपकारकत्वासंभवादित्यर्थः अत्र प्रधानपुरुषयोरर्थार्थि
त्वकल्पनानयुक्तिमतीति भावः ॥ ४७ ॥ पुरुषस्याविकारत्वरस्तुकमविकारित्वं स्पष्ट
यति क्रियोत्पत्ताविति । क्रियोत्पत्तौ विनाशित्वं ज्ञानमात्रेच पूर्ववत् । निर्निमित्तत्वनिर्मोक्ष
प्रधानस्य प्रसज्यते ॥ ५० ॥ पुरुषेय किं स्वि क्रियोत्पत्तौ अभ्युपगम्यमानायां विनाशित्वं १२ए
स्य प्रसज्येत यत्क्रियावत्तदनित्यं यथा घटादीति व्याप्तिदर्शनात् निःसंगपुरुषोऽभ्युगम
ते सांख्यैरित्यर्थः ननु न परिस्पंदः परिणामो वा पुरुषस्य क्रियाभ्युपगम्यते येनानि
त्यत्वप्रसंगः किंतु ज्ञानमेव क्रियाभ्युपगम्यते इति चेन्न हि जन्यमजन्यं वा ज्ञानमभ्युपेयते तो

प३

न यथापि घटः तत्रत्याह ज्ञानमात्रेच पूर्ववदिति । जन्यज्ञानयोगे विकारित्वाद नित्य(
त्वापत्तिरजन्यज्ञानयोगित्वेन प्रधानं प्रति स्वाम्यासंभव इत्युक्तदोषापत्तिरित्यर्थः । तस्मा
त्पुरुषस्यासंगोदासीनत्वादनाधेयातिशयत्वात्प्रवर्तकत्वानुपपत्तेरन्यस्य प्रवर्तकत्वं तरस्य
प्रधानविकारातिरिक्तस्यानभ्युपगमात् प्रलयेच प्रधानविकाराणामलब्धात्मला
भतया प्रवर्तकत्वायोगान्निर्निमित्तैव प्रधानप्रवृत्तिरंगीकार्या तथाचाव्यवस्थासु
स्थैवेति प्रतिपादयन्नुपसंहरति । निर्निमित्त इति । प्रधानस्य व्यापारे निर्निमित्ते अभ्युपगम्य
मानेतस्य सर्वदा सर्वान्प्रति प्रवृत्तिसंभवात् दृक्शक्तिमतां पुरुषाणां तद्दर्शनस्यावृ
जनीयत्वात् निर्मोक्षः प्रसज्येत अतश्चायमव्यवस्थितं सांख्यशास्त्रं न मुमुक्षुभिः अवेयमिति
भावः ॥ ५१ ॥ निर्गुणपुरुषमतप्रक्रियां निराकृत्य सगुणाः पुरुषाः इति वैशेषिक प्रक्रियां दूष मत२

यतिनप्रकारकमित्यादिना ।। नप्रकारकं यथाऽल्पत्वं ज्ञानेनैवं सुखादयः ।। एकनीडत्वतो ।।
ग्राह्याः स्युः कारणाद्विकर्मणो ।। ५१ ।। आत्मगते ज्ञानेनात्मगताः सुखादयो गुणाः प्रका
शंते इति हि ते मन्यते तन्नोपपद्यते तथाहि यथोष्णत्वमग्निनिष्ठमग्निष्ठेन प्रकाशेनन लि२
प्रकाश्यं प्रकाशान्तरेनेवति । एकाश्रयत्वादेव सुखादयो गुणा आत्मनिष्ठा आत्मनिष्ठे
न ज्ञानेन ग्राह्याः स्युः । कुतः एकनीडत्वतः एकाश्रयत्वात् । कारणाद्विकर्मणोऽस्य
ऽस्यार्थः । विषयविषयिणोः समानदेशत्वे ग्राह्यमिदं ग्राहकमिदमिति विनेदं नियमा १३०
सिद्धेरिति भावः ।। ५१ ।। न केवलमेकाश्रयत्वादेव ज्ञानसुखादीनां नास्य भासकत्वानुप
त्तिरपि तु योगपद्यासंभवादपीत्याह । युगपदिति । युगपत्समवेतत्वं सुखविज्ञानयो
रपि । मनोयोगैकहेतुत्वाद्ग्राह्यत्वं सुखस्य च ।। ५२ ।। नेति पूर्वश्लोकादनुवर्तनीयं । तथा

चायमर्थः । सुखविज्ञानयोर्न युगपत्समवेतत्वं संभवति कुतः मनोयोगैकहेतुत्वा
न्मनःसंयोगस्यासमवायिकारणस्यैकमेवात्मगुणं प्रति हेतुत्वाभ्युपगमात्तथा च
सुखासमवायिकारणमनःसंयोगनाशो सुखस्य नाशात् संयोगान्तरासमवायिका
रणं ~~स्यैकमेवात्मगुणं प्रति हेतुत्वाभ्युपगमात्तथा च सुखासमवायिकारणमनःसंयो~~
~~गोत्तरासमवायिकारस्य~~कज्ञानेन न सुखस्य न ग्राह्यत्वं भवत्यन्यत उपपद्यते इति आप
शिष्टात्समवायोपि न प्रमाणयुक्तिपथमवतरतीति द्योत्यते । विशिष्टादात्ममनसो
र्निरवयवयोः प्रदेशाभावादात्मनोऽपि संयोगानुपपत्तिः संयोगे वा विनोरात्मनो
विभागानुपपत्तिस्तदभावे संयोगान्तरानुपपत्तौ ज्ञानादिकार्यक्रियानुपपत्तिः कार्या मा२
णां समवायिकारणादेशानतिवर्तित्वनियमदर्शनात्स्यात्रेहापि तत्संसर्गेण मनःस

एपरमा

योगस्याणुदेशमात्रवर्त्तितया तत्कार्यस्यापि तन्मात्रवर्त्तित्वे सकलशरीरगता
भवेदना यास्त्रि धूल्पत्नोलप्रसंग इत्यादि दूषणगणाः समुच्चीयते ।५२। सुखदुःखे
च्छा द्वेषप्रयत्नानामप्यग्राह्यत्वं न्यायसाम्यादित्यर्थः ॥ तथेति । तथान्येषां च नित्यत्वे
युगपज्जन्मनेष्यते गुणानां समवेतत्वं तान्नैवेत्न विशेषणात् ।५३। अन्येषां गुणा
नां नित्यत्वात् परस्परविलक्षणत्वात् ज्ञानसुखयोरिव युगपज्जन्मेष्यते एकस्मात्म
नःसंयोगस्यानेककार्यहेतुत्वासंभवस्योक्तत्वादित्यर्थः ॥ चकारात् एकाश्रययोर्विषय
विषयित्वायोगः पूर्वोक्तः संगृह्यते । मा भूत् ज्ञानेनास्य तत्सुखादीनामेकस्मिन्नात्म
नि समवेतत्वमेव तेषां ज्ञानेनाभेदात् ज्ञानेन तेषां विशेषितत्वान्नैवमित्याह
गुणानामिति । ज्ञातं सुखं ज्ञातं दुःखमिति विशिष्टव्यवहारदर्शनादित्यर्थः । एतदे

व विशदयति ज्ञानेनैवेति । ज्ञानेनैव विशेष्यत्वात् ज्ञानाप्यत्वं स्मृतेस्तथा । सुखं ज्ञा
तं मयेत्येवं तत्त्वाज्ञानात्मकत्वतः ।५४। ज्ञानेन विशेष्यत्वादेव ज्ञानाप्यत्वं सुखादीनामेष्ट
व्यमित्यर्थः । ज्ञानाहितसंस्कारजन्यस्मृतिविषयत्वादपि ज्ञानाप्यत्वं सुखादेरेष्टव्यमि
त्याह । स्मृतेस्तथेति । सुखं मया ज्ञातमित्येवं स्मृतेरिति संबंधः । किंच ज्ञानविशिष्टात्मसमवे
तत्वं सुखादेर्ज्ञानमिष्यते केवलात्मसमवेतत्वं वाना द्यो युगपत्तत्तणात्म विशेषगु
णानां समवायासंभवस्योक्तत्वादात्मगतसंख्यापरिमाणादेरपि ग्रहणप्रसंगाच्चे
त्यभिप्रेत्य द्वितीये दूषयति । तवेति । तव मते आत्मनो ज्ञान क्रिया वृत्त्व इत्यमात्रत्वात्तत्स ग्रं ३
मवेतत्वमात्रेण न सुखादिसिद्धिः सर्वस्य जडत्वादित्यर्थः ।५५। ज्ञानसुखादीनामात्मगु
णत्वानुपगमेनात्मनः सकलासंभवोक्तः इदानीं तेषामात्मगुणत्वमपि दुर्निया

मित्याह ॥ सुखादेरिति ॥ सुखादेर्नित्यधर्मत्वमात्मनस्तु विकारतः ॥ भेदादन्यस्य कस्मान्नम
नसो वा विशेषतः ॥५५॥ सुखादेरात्मधर्मत्वं न संभवति त्वन्मते आत्मनोऽविकारत्वाना
वाछिन्नत्वांगीकारेण नित्यत्वाभ्युपगमात्र हि नित्यमनित्यगुणकमिति मां प्रति दृष्टांतः
कोपि विद्यते ॥ तेनात्मनो गुणवत्वसिद्धिः ॥ दूरेणाह्नाहक कल्पनेति भावः ॥ किंच
गुणगुणिनोरत्यंतभेदंगीकुर्वतस्तव मते स्यैवात्मनोयं सुखादिरिति नियमेपि दुर्घट
इत्याह ॥ भेदादिति ॥ अन्यस्यात्मांतरस्य मनसो वा कस्मात्सुखादयो गुणा न स्युः
विशेषतो भेदाविशेषादित्यन्वयार्थः ॥ अयमाशयः ॥ सर्वात्मनां विभुत्वांगीकारा
दच्छरीरावच्छेदेनात्मनि सुखादयो जायंते तत्र तदा सर्वात्मनां सत्वात् तदच्छेदस्य च तत्रान
वगमात्स्यैवात्मनोयं सुखादि धर्मो नान्यस्येति नियंतुं न शक्यते न मनःसंयोगभेदो १३२

नियामको मनस्यपि सर्वात्मसंबंधस्याविशेषात् नाप्यदृष्टं भेदो नियामकस्तस्या
प्यात्मधर्मत्वासिद्धेरदृष्टहेतुध्यानादेरपि मनःसंयोगनिमित्तकत्वात्तस्य च सर्वात्म
सुविशेषासिद्धेरदृष्टस्यापि नाश्रयविशेषसिद्धिरिति यत्र कुत्रापि जायमानं सुखा
दि यस्य कस्यापि कस्मान्नस्यात्तथा मनसः क्रियावत्वान्मूर्तत्वात्सुखादिदेशाव्यभि
चाराच्च तस्यैव कस्मान्न धर्माः सुखादयो न स्युर्विनिगमनाभावादिति ॥५५॥ यद्यपि केशि
नस्य ज्ञानांतरवेद्यत्वमिष्यते तदप्युक्तं म न्वव्छावसंगादित्याह ॥ स्यान्मालेति
॥ स्यान्माला परहार्या तु ज्ञानं चेत्तत्पृथक्जे तद्युगपत्कापि चोत्पत्तिरभ्युपेता
न इष्यते ॥५६॥ अयमर्थः ॥ येनात्ममनःसंयोगेन प्रथमं ज्ञानं जायते तदन्येन संयो
गांतरेण तद्विषयं ज्ञानांतरं जायते किं वा तेनैव संयोगेन ॥ आद्ये दोषमाह ॥ स्यादिति ॥

ज्ञानेच्छेत्तज्ज्ञेयतांव्रजेत् तत्तदाऽपदिहार्थाज्ञानमात्रापरंपरास्यात् ज्ञानानवस्थास्यादित्यर्थः। विष
यावभासस्य समयेयदि ज्ञानेनावभासेत तदा विषयः स्वयमेवभासते ज्ञानाधीनतया वेति विवेक्तुम
शक्यत्वात्तदेव ज्ञानमाने ज्ञानांतरमेष्टव्यं तस्याप्यमाने सर्वज्ञानस्य ज्ञानांतरभास्यत्वासिद्धेः स
ज्ञानाय ज्ञानांतरमिति दुर्निवारानवस्थास्यादिति भावः। तुशब्दश्चार्थः। तेनैव प्रथमज्ञानो
त्पत्त्यनंतरं मनसि क्रिया ततो विभागस्ततः सर्वसंयोगनाशस्ततः संयोगांतरं ततो ज्ञानांतर
मिति बहुक्षणविलंबेनोत्पद्यमानमुत्तरज्ञानं सर्वज्ञानावभासनं कथं कुर्यात्तस्य तदानीम
भावादित्यादि दूषणांतरं समुच्चीयते। अथ द्वितीयं कल्पमनूद्यातिप्रसंगेन दूषयति। युगपद्
ता। अपि चानवस्थादोषपरिजिहीर्षया सर्वोत्तरज्ञानयोरेकस्मादेव संयोगाद्युगपदुत्पत्तिरभ्युपेता चे
दिस्यनुषज्यते। तदाऽतोऽस्मादेव संयोगाद्युगपत्संनिकृष्टरूपरसगंधशब्दस्पर्शज्ञानानामप्युत्पत्तेर्वो
त्पत्तिरिष्यते। इष्यतां तदा संस्कारोद्बोधसन्निपाते सहकारिलाभात्तत्तदर्थस्मृतीनामप्युत्पत्तिरिष्य
तामतो न ज्ञानस्य ज्ञानांतरवेद्यत्वकल्पना युक्तिमती स्थितमित्यर्थः॥ ५६॥ किं चात्मनश्चैतन्यस्वरूपत्वे

णं उपेतं तटस्थलक्षणं वा। आद्येऽपि मोहो गंधादिवत् सनातनत्वात् तस्य च स्वस्वरूपानतिरेकात् नि
त्यज्ञान आत्मे सुखद्वेषो मृषैव स्यात् द्वितीये तु स्वरूपलक्षणमन्यदनात्मासाधारणं वक्तव्यं तच्च चे
तनातिरिक्तं न किमपि संभावितमस्ति तो देहादिजडविलक्षणमात्मानमभ्युपगच्छता सद्धा निर्वि
शेष चिद्रूपः कूटस्थ एवात्माभ्युपेतव्योऽन्यथा विकारित्वे नित्यत्वनियमाद्बंधमोक्षानव्यवस्था
त्मानवतो तु द्वि: संपादमित्यतस्तत्सर्वमभिप्रेत्याह॥ अनवस्थांतरत्वान्नेति। अनवस्थांतरत्वा
द्वेवस्थांतरश्रुतस्मादिति विग्रहः। आत्मनः क्वचिद्बंधो नात्मनि विद्यते। नाप्युद्धिश्चाप्यसंगत्वा
दसंगो हीति च श्रुतेः॥ ५७ नास्त्यवस्थांतरं यस्य सः अनवस्थांतरस्तस्य भावोऽनवस्थांतरत्वं तस्मा
दिति विग्रहः। आत्मन इति शेषः तथा चात्मनः कूटस्थत्वात् तस्मिन्नात्मनि बंधो विशेषगुणवत्व
लक्षणः परमार्थतो न विद्यते। चकारात् तन्निवृत्तिरूपो मोक्षोऽपि न विद्यत इति योज्यं तस्मान्नित
१२४ शुद्ध एवात्मेत्यत्र प्रमाणं वदन् परकल्पनानिराकरणफलमाह॥ नाप्युद्धिश्चापीति। स्वगतधर्मद्वि १२४
तबंधाभावं वदन्यसंसर्गकृताशुद्धेरपि न चास्त्यसंगत्वादित्यर्थः॥ ५८ इतश्च नात्मनः परमा

र्थिको बंध इत्याह॥ सूक्ष्मेति। सूक्ष्मे कागोचरे त्यस्य न लिप्यत इति श्रुतेः॥ एवं तर्हि न मोक्षोऽपि
बंधाभावात् कथं च नः॥ ५८ शास्त्रानर्थक्यमेवं स्यान्न बुद्धेर्भ्रांतिरिष्यते॥ बंधमोक्षस्तु तन्नाशः स
यथोक्तो न चान्यथा॥ ५९ सूक्ष्मत्वं मनोऽगम्यत्वमेकत्वमद्वितीयत्वमगोचरत्वं निर्विशेषत्व
मेतेभ्यो हेतुभ्यो नित्यशुद्ध एवात्मा न लिप्यते लोकदुःखेन बाह्य इति श्रुतेरित्यर्थः। यथा सर्वग
तं सौक्ष्म्यादाकाशं नोपलिप्यते॥ सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥ इति भगवद्वचनं
चात्रोदाहर्तव्यं॥ उत्तरश्लोकः। एवमात्मनो नित्यशुद्धबुद्धमुक्तस्वभावत्वं साधयतो वेदांतिनः आ
त्मोपदेशशास्त्रानर्थक्यमित्याशंकिते इति एवं वादिनः। एवं तर्हीति॥ यदि इत्यध्याहार्यं। यद्येवं नि
त्यशुद्धबुद्ध आत्मा तर्हि कथं च न केनापि रूपेण बंधाभावान्मोक्षोऽपि नास्ति बंधपूर्वकत्वान्मोक्ष
स्य तदभावेऽभावात् तथा च मोक्षोपायोपदेशशास्त्रानर्थक्यमेवं स्यादिति। उत्तरमाह। न बुद्धेरित्या
दिना। बुद्धेर्भ्रांतिः बंध इष्यत इत्यन्वयः। तन्नाशो नाशो भ्रांतिनाशो मोक्ष इति चेष्यते न परमार्थः॥
संबंधो यथा शर्वं मुक्तोऽज्ञानं कल्पना मूलं संसारस्य नियामकं इति तथैव न चान्यथा तथा चा

ज्ञानकल्पितबंधभ्रमनिवृत्त्यर्थत्वादुपदेशशास्त्रस्य न वैयर्थ्यप्रसंग इत्यर्थः ॥ ५८ ॥ एवमज्ञान
मूलबुद्धिधर्माध्यासलक्षणं बंधमात्मनीत्युक्तमुपपादयति बोधात्मेति ॥ बोधात्मज्योतिषा दी
प्ता बोधमात्मनि मन्यते ॥ बुद्धिर्नान्यो ऽस्ति बोद्धेति सेयं भ्रांतिर्हि धीगता ॥ इयं बोधरूपस्यात्मनो य
ज्ज्योतिः प्रकाशश्चिदाभासस्तेन दीप्ता आभासप्रकाशिता बुद्धिरात्मनि स्वस्यां बोधं चैतन्यं मन्यते अ
न्यो बोद्धा साक्षी नास्ति अहमेव बोद्धेति सा नाम सा बुद्धिः प्रकाशते तदविवेकादहमेव बोद्धेति
त्यात्मनि संसारो धीगता भ्रांतिरेवेत्यर्थः ॥ इयं बुद्धेरेव बोधात्मत्वं यथाप्रतीति परमार्थ
किं न स्यादिति निरस्यति ॥ बोधस्येति ॥ बोधस्यात्मस्वरूपत्वान्नित्यं तत्रोपचर्यते ॥ अविवेकोऽप्यना
द्यायं संसारो नान्य इष्यते ॥ इह बुद्धेरागंतुकत्वेन बोधव्यभिचारात् बोधस्य च विनापि बुद्धिं सुषु
प्ते सद्भावादात्मस्वरूपत्वात् न बुद्धेः स तत्रोपचर्यते ऽध्यस्यते ऽविवेकादित्यर्थः ॥ न हि
१३५ सो ऽविवेकः सादिरनादिर्वेति वाच्यमाह ॥ अविवेकोऽपीति ॥ यद्यविवेक एवानाद्यज्ञानं तत्त्वाद १३५
नादिस्तर्हि तस्यैव ब्रह्मात्मज्ञानान्निवृत्तिः स्यान्न संसारस्येति भ्रमं वारयति ॥ संसारो नान्य इष्यते ॥

कर्त्रादिधर्मकबुद्ध्यविवेक एव संसार इत्यर्थः ॥ इह बंधस्याज्ञानात्मकत्वे फलितमाह ॥ मोह इति ॥
मोहस्तन्नाश एव स्यान्नान्यथानुपपत्तितः ॥ येषां वस्त्वंतरापत्तिर्मोक्षो नाशस्तु तैर्मतः ॥ इह अज्ञानाद
ज्ञाननिवृत्तिस्तत्कार्यबंधनिवृत्तिरेव मुक्तिर्नान्यथा हेयस्योपादेयस्य वा मोक्षस्यानुपपत्तितोऽनुप
पत्तेरित्यर्थः ॥ अनुपपत्तिमेव द्वयन् पक्षांतरं निराकरोति ॥ येषामिति ॥ येषां वादिनां स्वरूपादन्य
वस्त्वंतरापत्तिरात्मनो मोक्ष इति मतं तैरात्मनाश एव मोक्ष ई   तीकृतः स्यात् स्थितस्य नष्टस्या
न्यस्यापत्त्यासंभवाद्वस्त्वंतरापत्तिशब्देन यदि प्राप्तिर्विवक्षिता तथापि संयोगा विप्रयोगांता इति न्या
येन कृतकस्यानित्यत्वप्राप्तेश्चानित्यो मोक्षः स्यादित्यर्थः ॥ इह यथा वस्त्वंतरापत्तिर्मुक्तिरिति पक्षेऽनुप
पत्तिरनित्यत्वापत्ति   स्तथात्मनोऽवस्थांतरापत्तिर्मोक्षपक्षेऽपि सदोषत्वमस्येत्याह ॥ अवस्थां
तरमप्येवमिति ॥ अवस्थांतरमप्येवमविकारान्न युज्यते ॥ विकारावयवित्वं स्यान्नानाशोऽवयवादिवत् ॥
इह अविकारित्वादात्मनोऽवस्थांतरमपि न युज्यते ॥ यदि तु न विकारोऽप्यभ्युपगम्यते तथा सति साव
यवत्वमात्मनः स्यात् ततः सावयवत्वान्नाश एव घटादिवदपरिहार्यः स्यादतो भ्रांतिनिवृत्तिमात्र एव मोक्षो

नान्यथा संभवतीत्यर्थः॥ एवं च वेदांतसिद्धांतादन्याः बंधमोक्षादिकल्पना वादिभिरुक्ता हिनाः श्रुतिस्मृ
तिन्यायबाधितत्वान्नादरणीया मुमुक्षुभिरित्युपसंहरति॥ तस्मादिति॥ यस्मात् तस्माच्छ्रुतिरतोन्यानि
बंधमोक्षादिकल्पना॥ सांख्यकाणादबौद्धानां मीमांसाहतकल्पना॥ एवं श्रुतिरेव परिशेषादा
त्मनि बंधमोक्षप्रतिभासइति कल्पनाकल्पाद्यविरुद्धा अतोऽन्या बंधमोक्षादिकल्पना सांख्यादिशब्दा
दिनु कल्पना च नादर्तव्या कदाचनेति संबंधः॥ अतो तस्मात् सिद्धांतादन्या बंधमोक्षादिकल्पनादियस्मा
च्छ्रुतिः प्रमाणमस्मात् तस्मान्नादर्तव्येति वान्वयः॥ केषां वा कल्पना नादर्तव्या इत्यत आह॥ सांख्येति॥
मीमांसाहता विचारविरुद्धा विचारासहा वा कल्पना मीमांसाहतकल्पनेत्यर्थः॥ एवं च अनादरे हे
तुमाह॥ शास्त्रेति॥ शास्त्रयुक्तिविहीनत्वान्नादर्तव्या कदाचन॥ उक्तं ते शतशोऽवकं दोषास्तासो
सहस्रशः॥ एवं॥ शास्त्रयुक्तिविरुद्धा यतः कल्पना इत्याहस्तोक्यत इति॥ एवं इतश्च सांख्यादिकल्पना ना
१२६ दर्तव्या इत्याह॥ अपि भिन्नं रोचपक्षेरिति॥ अपि भिन्नं रोचपक्षे श्रयानस्ता अन्यानि वेत्यत आह त्वत्त्व्यातोऽन्य
शास्त्रोक्तौ मतिं कुर्याद्दृढां बुधः॥ एतद्यानन्यतोऽन्यानि शास्त्राणि रुचिमां विविधानि वेगास्त्रोकनीयानि

विद्वद्भिर्धर्मप्रद्विमतीर्थ्युनिदं॥ या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः॥ सर्वास्ता निःफ
लाः प्रेत्य तमोनिष्ठा हि ताः स्मृता इत्यादिभिरनवस्थानान्नादर्तव्या इत्यर्थः॥ अतोऽन्यशास्त्रोक्तौ सत्स्वपि दृ
ढां मतिं बुधः कुर्यादित्यन्वयः॥ एवं कथं मतिं कुर्यात् तत्र वेत्याकांक्षायामाह॥ अवेदेति॥ अवज्ञाने
पुरस्कृत्य हित्वा सर्वमनार्जवं॥ वेदांतस्यैव तत्त्वार्थे व्यासस्याभिमतो तथा॥ एवं अवज्ञापुरस्कृत्य
विश्वासो न क्रियते तत्सरतापुरस्कृत्यादरेणावलंबेत्यर्थः॥ सुगममन्यत्॥ एवमुक्तं परपक्ष
निराकरणं संक्षिप्य तत्प्रयोजनं कथयति॥ इतीति॥ इति प्रणुन्ना द्वयवादकल्पना निरास्ता
दृश्यतयाहियुक्तितः॥ अपेतशंकाः परवादतः स्थिरा मुमुक्षवो ज्ञानपथे सुरिस्तुताः॥ एवं
इति इत्थं युक्तितः प्रणुन्ना निरासत्ता द्वयवादकल्पना भेदवादकल्पनाः सांख्यादिकल्पनाः श्रुति
यावत्॥ तथा निरात्मवादाः बौद्धवादाश्च युक्तितः प्रणुन्ना इत्यर्थः॥ किमर्थं तदाह॥ अपेतेति॥
मुमुक्षवः परवादतः परशास्त्रेभ्यो अपेतशंकास्तत्प्रामाण्यकृतशंकारहिताः संतो ज्ञानपथे
वेदांतोक्तज्ञानमार्गे स्थिराः सुमेवेयुरित्युतः अपीतियोजना॥ एवं वेदांतविहितम

त्मज्ञानस्यैव परमपुरुषार्थसाधनत्वमिति तत्त्वरूपकथनपूर्वकं मुमुक्षूणां तन्निष्ठत्व
मावश्यकमिति दर्शयति॥ स्वसाक्षिकमिति॥ स्वसाक्षिकं ज्ञानमतीव निर्मलं विकल्पनाश्यो वि
परीतमद्वयं॥ अवाप्य सम्यक् यदि निश्चितोर्जवे निरन्वयो निर्वृत्तिमेति शाश्वतीमु॥ द्वय॥
अद्वयमखंडवस्तुमात्राकारमित्यर्थः॥ निरन्वयो निरस्ताज्ञानतत्कार्यसंबंधः सन्नित्यर्थः
शाश्वती निर्वृत्तिरखंडानंदानुभवस्वरूपाविनाशः॥ यथोक्तज्ञानाधिकारिणं संहिताविर
मणसारं कथयंस्तत्वनिष्ठालक्षणमाह॥ इदं रहस्यमिति॥ इदं रहस्यं परमं परायणं अपेत
दोषैरभिमानवर्जितैः॥ समीक्ष्य कार्या मतिरार्जवे सदा न तत्वदृक् स्वान्यमतिर्हि कश्चन॥७०॥
१३७ यदवाप्य शाश्वती निर्वृत्तिमेति तदिदं रहस्यमुपदेशैकगम्यं परमं परमात्मतत्वप्रकाशत्वा
त्सर्वेभ्यः श्रेष्ठं परायणं निरवधिकं सर्वाश्रयं परमगतिरूपमिति यावत्॥ एवंविधमात्मज्ञानं
समीक्ष्य सम्यगालोच्य दृढीकृत्येति यावत्॥ अपेतदोषैरपगतं प्रियवह्निर्मुखैरभिमानवर्जि
तैः पांडित्यादिनिमित्तदोषरहितैः शांतैर्दांतैश्चेति यावत्॥ एवंविधैरधिकारिभिरार्जवे ऋ १३७

जुनावे सर्वसमे ब्रह्मात्मत्वमतिर्निष्ठा सदा कार्या ब्रह्मात्मत्वमेव ऋजु सर्वदा सर्वत्रैकरूपत्वा
त्प्रत्यक्त्वरूपमेवार्जवं नाम तस्य निर्विशेषत्वादिति दृष्टव्यं॥ तथा च ब्रह्मात्मैकेनात्मज्ञाननि
ष्ठा तत्वनिष्ठे स्फुटं न वर्तितण्यतदेवव्यतिरिक्तकथनेन विशदयति॥ न तत्वदृगिति॥ यः कश्च
न स्वान्यमतिः स्वस्य गात्मनोन्यस्मिन् आत्मन्ति मतिर्यस्य स स्वान्यमतिः स न तत्वदृक् तत्वदृष्टि
र्न निवर्तीत्यर्थः॥ तदेवं ब्रह्मत्वं विद्धिनेदं यदिदमुपासते॥ अथ योन्यां देवतामुपास्तेऽन्योसावन्यो
ऽहमस्मीति न स वेद इति श्रुतेः॥७०॥ एवं मतियत्नलभ्येन ज्ञानेन किं फलं साध्यते तदाह॥
अनेकेति॥ अनेकजन्मांतरसंचितैर्नरो विमुच्यतेऽज्ञाननिमित्तपातकैः॥ इदं विदित्वा परमं
हि पावनं न लिप्यते व्योमवदेहकर्मभिः॥७१॥ स्पष्टार्थः॥ इदं ज्ञानमाचार्येणकस्मै दातव्यमित्यपे त ३
क्षायां विस्तृतविशेषणमधिकारिणमाह॥ प्रशांतेति॥ प्रशांतचित्ताय जितेंद्रियाय च प्रही
णदोषाय यथोक्तकारिणे॥ गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे॥७२॥

प्रशान्तचित्ताय शमादिगुणयुक्ताय जितेन्द्रियाय दान्ताय प्रहीणदोषाय अनेकजन्मानुष्ठितयज्ञादि
परिक्षीणचित्तेश्वरप्रसादहततमस्तत्कल्मषाय यथोक्तकारिणे॥ शास्त्रोक्तस्वधर्मस्य यथाशास्त्रमनु
ष्ठात्रे गुणान्विताय विद्याविनयार्जवादिगुणयुक्ताय सर्वदा दीर्घकालं सततं च नैरन्तर्येणानु
गताय गुरुमनुसृताय एवंविधाय मुमुक्षवे मोक्षमात्रकाङ्क्षिणे तदात्मज्ञानं गुरुणा देयं प्र
तिपादयितव्यमित्यर्थः॥७२ एवंविधः शिष्यो महावाक्येनावगमितमात्मतत्त्वं कथमवगच्छतीति किं
वा फलं प्राप्नोतीत्यपेक्षायामाह॥ परस्येति॥ परस्य देहेन यथाभिमानिता ऽपरस्यात तद्वत्परमार्थमीह
श्या॥ इदं हि विज्ञानमतीव निर्मलं संप्राप्य मुक्तो भवति स्वयं सर्वतः॥७३ यथा परस्यान्यस्य देहे यथा परस्यापरस्य
१३८ नाभिमानिता अहं ममेत्यभिमानित्वं न भवति॥ तद्वत्स्वदेहेऽपि परमार्थमीहसे देहातिरिक्तमात्म
तत्त्वमीहशः सोऽभिमानरहितः सन्निति यावत् आत्मचकारात्तत्प्रतिपादकं वेदान्तवचांसि सोऽस्मीति य १३८
श्यते॥ एवंविधः इदं ज्ञानं स्वेक्षितसाक्षात्कारं संप्राप्याथ तदैव सर्वतो मुक्तो भवेन्निरस्ताज्ञानतत्कार्य

न्म ४

संस्कारपरमानंदानुभवब्रह्मात्मरूपो भवेदित्यर्थः॥७४ ननु किमिति गुणविशेषवच्छिष्यपरीक्षणं
गुरोर्यस्मै कस्मैचिच्छिष्याय कस्माच्चिद्यान दीयते तत्राह॥ न हीति॥ नहीहलाभो ऽस्त्यधिको ऽस्ति केवलं न स्व श्र२
रूपलाभात्सुकृतोदितात्परतः॥ न देयमेतद्यदपि राज्यतो ऽधिकं स्वरूपलाभं त्वपरीक्ष्य यत्नतः॥७५॥
इति पादोधिव प्रकरणं॥ ॥६॥ ॥स्वरूपमात्मतत्त्वं लभ्यते ऽनेनेति स्वरूपलाभस्तत्त्वज्ञानं त
स्मादन्यधिको लाभः कश्चन कोपीह देवमनुष्यादिलक्षणपरं पाठ्यो नास्ति आत्मलाभान्न परं विद्य
त इति स्मृतेः स लाभः इतः एव वेदान्तवाक्यानुभूत्यतो ऽन्यस्माच्छास्त्रान्तरान्न भवति यस्मात्तस्मा
द्यत्नतः शिष्यमपरीक्ष्य स्वरूपलाभं तु ज्ञानं न देयं॥ यदपि राज्यतो राज्यादधिकमिति विशे
षणेन प्रणाय्यायान्तेवासिने नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पू
र्णां दद्यादेतदेव ततो भूय इति श्रुतिं प्रमाणयति॥७६ इति पादोधिव प्रकरणं षोडशो विवृतं॥ ६॥
मुक्ष्वीनायनमनपरपक्षनिराकरणमुखेनोक्तं मोक्षसाधनं ज्ञानं स्वप्रक्रियया पि असिद्धिनं प्रकर

नं: ५

णं तरमारनमाणो देवतानतिकैर्विद्याभ्यंतरंगत्वं द्योतयन् प्रकरणप्रतिपाद्यार्थं नमस्कारव्याजेन
संक्षिप्याह॥ आत्मा ज्ञेय इति॥ आत्मा ज्ञेयः परोक्षात्मा यस्मादन्यन्न विद्यते। सर्वज्ञः सर्वदृक्शुद्ध
स्तस्मै ज्ञेयात्मने नमः॥१॥ आत्मा स्वरूपं ज्ञेयः स्वरूपतो वधार्यः। किं घटादिवद्विषयत्वेन नेत्याह॥
परोक्षात्मेति। हि यस्मादात्मा सर्वज्ञेयात्परो ज्ञेयत्वधर्मरहितः। तत्कुत इत्यत्राह॥ यस्मादन्यन्न वि
द्यत इति॥ यस्मादात्मस्वरूपादन्यत्परमार्थतः पृथग्भूतं तद्धर्मो वा न विद्यते॥ तथा च रूपादिहीन
तया चक्षुराद्यगोचरत्वात्स्वसमानजातीयप्रत्यक्षप्रत्यक्षं तदभावाद्व्याप्तिग्रहणाभावे सत्यनुमाना
१३५ द्यापत्तिग्राह्यत्वाभावात्सदृशाभावस्वतत्त्वाभावेनोपमानाग्राह्यत्वात् बहिर्जातिगुणक्रियादिधर्म
रहितत्वेन शब्दागोचरत्वात्तज्ज्ञातुं स्वरूपत्वादेव नास्तीत्यस्य परंतु मशक्यत्वात्परिशेषाद्विष
यभूतदेहेंद्रियादिः करणप्रसारस्थानेनान्विष्यतत्त्वाहितयाविषयत्वेन स्वयंप्रकाश आत्मा
ज्ञेय इत्यर्थः॥ एवं त्वंपदार्थं परिशोध्य तस्य तत्पदार्थात्मैक्यं वाक्यार्थं कथयितुं तत्पदार्थमाह
सर्वज्ञ इति॥ सामान्यतः सर्वं जानातीति सर्वज्ञो विशेषतः सर्वं पश्यतीति सर्वदृक् सर्वज्ञत्वमु १३५

पलक्षणमुक्त्वा तस्य स्वरूपलक्षणमाह॥ शुद्ध इति॥ अनंतज्ञ परिच्छिन्नदुःखादिप्रपंचसंस
र्गरहितः सत्यज्ञानानंतानंदरूप इत्यर्थः॥ वाक्यार्थं तत्पदार्थैक्यमाह॥ तस्मा इति॥ इत्थं भक्तिप्रका
रेण ज्ञेयस्वाभावात्मा च ज्ञेयात्मा तस्मै ज्ञेयात्मने तस्मै सर्वज्ञत्वाद्युपलक्षिताय नमः प्रह्वीभावोऽस्तु
तदृष्टिविलय एवेह नमस्कार्यार्थः॥२॥ देवतानतिकैर्गुरुनतेरपि विद्याभ्यंतरंगत्वं प्रसं
दर्शयन् तस्मिन्नेव देवे तथा गुरोरिति यस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति श्रुतिसिद्धं द्योतय
न् गुरुपरंपरां प्रणमति॥ पदवाक्येति॥ पदवाक्यप्रमाणज्ञैर्दीपभूतैः प्रकाशितं॥ ब्रह्मवेदरहस्यं यै
स्तान्नित्यं प्रणतोऽस्म्यहं॥३॥ यैर्गुरुभिर्वेदरहस्यं ब्रह्म प्रकाशितं तान्नित्यं प्रणतोऽस्म्यहमिति संबंधः
पदानां वाक्यानां च शक्तितात्पर्यमयादयापरिमाणज्ञैः पदवाक्यप्रमाणज्ञैः पदपदवाक्यप्रलिंगे प्र
माणमनुमानादि तज्ज्ञैरित्यर्थः। दीपभूतैरयत्नेन सर्वार्थप्रकाशकैरिति संबंधः॥ सामान्येनाचार्यप
रंपरां नमस्कृत्य विशेषेण स्वगुरुचरणानमस्करोति तु हृद्यं प्रतिजानीते॥ यत्प्रसादेति॥ यत्कृपस्य शृंसंपा
त प्रनष्टध्वांतकल्मषः प्रणम्य तान्गुरून्वक्ष्ये ब्रह्मविद्याविनिश्चयं॥ ब्रह्मतत्त्वविद्याया विनिश्चयो यस्मात्

न्यायविशेषाद्भवतीति तं न्यायविशेषं वक्तुमिदमित्यर्थः। सुगममन्यत्॥७॥ किमर्थं ब्रह्मविद्याविनिश्चयो वक्तव्ये
त्तदाह। आत्मलाभादिति। आत्मलाभात्परो नान्यो लाभः कश्चन विद्यते॥ यदर्था वेदवादाश्च स्मार्त्ताश्चापि
तु याः क्रियाः॥ अथ आत्मलाभस्य परमत्वे प्रमाणं सूचयति। यदर्था इति। वेदवादाः वेदवचनानि स्मार्त्ता
श्च वादाः स्मृतिवचनानि साक्षात्तज्ज्ञानार्थाः वेदवादाः स्मृतिवादाश्च यदर्थाः अपि तु याः क्रियाः कर्मपर
वेदस्मृतिविहिताः ताश्च चित्तशुद्धिपरंपरया यदर्थास्तस्मादात्मलाभादिति संबंधः॥ पुत्रादिलाभापे
क्षया आत्मलाभस्य परमत्वं प्रामाणिकमित्युक्तमुपपादयति। आत्मार्थेपीति। आत्मार्थोपि हि योल
२४५ भः सुखायेष्टो विपर्ययः। आत्मलाभः परः प्रोक्तो नित्यत्वाद्ब्रह्मवेदिभिः॥८॥ योपि लाभः पुत्रधनादिविष
यो लोके सुखायेष्टः सोप्यात्मार्थः आत्मसुखार्थ इति हि प्रसिद्धमिति योजना तर्हि पुत्रादिलाभेनैवात्म
३ यं सुखसिद्धेः किमित्यात्मज्ञानमात्मलाभायेष्टं विशेषाभावादित्यत आह॥ विपर्यय इति। सुखविपर्ययः
दुःखायापि स लाभः स्यात्कदाचित्कस्यचित्पुत्रादेरेव दुःखहेतुत्वदर्शनादित्यर्थः तस्माद्द्वैतान्नोतरा २४५
न्यया आत्मलाभः परमो लाभ इति तदर्थं सर्वपरित्यागेनात्मज्ञानं संपादनीयमित्यभिप्रायः॥

आत्मेति॥ विपर्ययप्रसंगस्तत्र नास्तीत्याह। नित्यत्वादिति तथा च श्रुतिः तदेतत्प्रेयः पुत्रात्प्रेयो
वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादंतरतरं यदयमात्मा स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियं रो
त्स्यतीतीश्वरो ह तथैव स्यादात्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवतीति॥९॥ आत्म
सुखलाभस्य नित्यत्वमुक्तं साधयति। स्वयमिति। स्वयंलब्धस्वभावत्वाल्लाभस्तस्य न चान्यतः॥
अन्यापेक्षस्तु यो लाभः सोऽन्यदृष्टिसमुद्भवः॥१०॥ तस्यात्मनो लाभो न चान्यतोऽनित्यनिमित्तो न भवति
कुतः स्वयंलब्धस्वभावत्वात्साधनसाध्यत्वाभावान्नित्यत्वमित्यर्थः॥ पुत्रादिसाधनस्य लाभस्य साधनाधीन
त्वेनानित्यत्वं साधयति। अन्यापेक्षस्त्विति। अन्यदृष्टेः सकाशात्समुद्भवो यस्य स तथा अन्याधीनस्य तदपाये
ऽपगमादनित्यत्वमित्यर्थः॥ ननु केयमन्यदृष्टिः का वा तदुद्भवस्यान्यपुत्रादिलाभस्यानित्यत्वे हानिरित्यत
आह। अन्यदृष्टिस्त्विति॥ अन्यदृष्टिस्त्वविद्या स्यात्तन्नाशो मोक्ष उच्यते॥ ज्ञानेनैव तु सोपि स्याद्विरोधित्वा
न्न कर्मणा॥११॥ अन्यस्मिन्ननात्मनि दृष्टिः प्रतीतिर्यस्याः सा अन्यदृष्टिः साऽविद्या भवतीत्यर्थः॥ तत
स्यात्माविद्याकृतत्वाभिनिबंधनत्वात्पुत्रादिलाभप्रीतिकस्यास्य च स्वयं तु स्यत्वान्नित्यात्मप्रियहानिः

तस्मात्स्य

स्यादितिभावः तथा चाविद्यानिवृत्तिमन्तरेणात्मस्वरूपनित्यत्वाज्ञानाभावात्तत्संपाद्येत्याह । तन्नाश इ
ति । मोक्षो नित्यनिरतिशयपरमानन्दाविर्भावोऽज्ञानहानिस्तद्धेतुत्वात्तस्याप्युपायमाह । ज्ञानेनैवेति ।
सोऽप्यज्ञाननाशलक्षणो मोक्षो ज्ञानेनैव स्यात् तस्यैवाज्ञानविरोधित्वान्न कर्मणा तस्याज्ञानविरोधि
त्वाभावात् सकार्याविद्यानिवृत्तिरूपो मोक्षः कर्मणा मा भूत्तथापि तेन नित्यपुरुषार्थाभिव्यक्ततः कि
[illegible]र्वं कर्मपरित्यागेनात्मज्ञानं सर्वथा संपादनीयमेव मुमुक्षुणेत्यर्थः ॥७॥ ननु विरोधाभावात्सकार्या
विद्यानिवृत्तिरूपो मोक्षः कर्मणा मा भूत्तथापि तेन नित्यपुरुषार्थाभिव्यक्तेः किं ज्ञानेनेति नेत्याह । क
र्मकार्यस्त्विति । कर्मकार्यस्त्वनित्यः स्यादविद्याकामकारणः । प्रमाणं वेद एवात्र ज्ञानस्याधिगमे स्मृतः ।
ण तत्र हेतुभागं विशेषणं च विघेति । मिथ्याप्रत्ययमूलरागप्रयुक्तकर्मसाध्यत्वादित्यर्थः । कर्मसा
१४१ ध्यं फलमनित्यं ज्ञानसाध्यं तु नित्यमित्यत्र किं प्रमाणमिति चेद्वेद एवेत्याह । प्रमाणमिति । तद्यथेह कर्म १४१
जितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते । ब्रह्मविदाप्नोति परं । तरति शोकमात्मवि
दित्यादिर्वेद एव कर्मसाध्यमनित्यं ज्ञानसाध्यं नित्यं मोक्षरूपमित्यज्ञानस्य विवेकस्याधिगमे प्र

माणं विद्वद्भिः स्मृत इत्यर्थः ॥८॥ किं च वेदस्य सर्वस्याध्ययनविध्युपात्तत्वात्पुरुषार्थपर्यवसा
नायोगात्परमपुरुषार्थपर्यवसायिनात्मैक्यज्ञानपरत्वमेष्टव्यं ततो न कर्मसु तात्पर्यं महातात्पर्यं
ज्ञाने तदस्य लिङ्गेनेत्याह । ज्ञानैकार्थेति ॥ ज्ञानैकार्थपरत्वात्तु वाक्यमेकं ततो विदुः । एकत्वं ह्यात्मनो ज्ञेयं वाक्या
र्थप्रतिपत्तितः ॥९॥ ज्ञानमेवैकोऽर्थः प्रयोजनं परं प्रति यावद्यस्य वेदस्य सन् तथा तस्य भावस्तत्त्वं तस्मात्तं वे
दमेकवाक्यं विदुः वाक्यप्रमाणविदस्तज्ज्ञा इत्यर्थः । किं तस्य ज्ञेयमित्यपेक्षायामाह । एकत्वं हीति । ततो ज्ञाना
दात्मन एकत्वमेव ज्ञेयमित्यन्वयः । हिशब्दोऽवधारणार्थः । ज्ञानप्रकारमाह । वाक्यार्थप्रतिपत्तित इति ।
सत्यं ज्ञानमनन्तमित्याद्यवान्तरवाक्यार्थप्रतिपत्तिद्वारेण तत्त्वमस्यादिमहावाक्यादात्मनो ब्रह्मैकत्वं
ज्ञेयमित्यर्थः । आत्मतत्त्वज्ञानस्यैव परमपुरुषार्थहेतुतायाः श्रुतत्वात् कर्मकाण्डमपि तत्त्वज्ञानापेक्षि
तचित्तशुद्धिहेतुकर्मविधानद्वारपारम्पर्येण परमपुरुषार्थसाधनतां भजत इति मुख्यकार्यपर्य
वसानेनैकवाक्यत्वं वेदवाक्यस्येति भावः ॥१०॥ नन्वात्मनो ब्रह्मणश्चैकत्वज्ञानमनुपपन्नं तयोः पर्या
यशब्दवाच्यत्वेन भेदादित्याशङ्क्य मैवमन्योन्याश्रयापत्तिरित्याह । वाच्यभेदादिति । वाच्यभेदात्तु

तन्ने ह स्थ्यो वाच्यो हि तं ह्युतेऽत्रायं त्वे तत्तत्तः ओक्तं रूपं नाम च कर्म च॥२०॥ तन्नेहेः पर्यायशब्दः नेहो
वाच्य नेहा तत्कस्य स्त्वया॥ वाच्योऽपि तद्युते रपर्यायशब्दं तरश्रवणा ज्ञिन्नः कस्य। तथा च सिद्धान्त स्वजी
वेऽश्लक्ष्णे ह तद्वाच्य कशब्दयो पर्यायत्वसिद्धिस्तत्सिद्धाविति रसिद्धिरित्यन्योन्याश्रयः स्याद् इत्यर्थः॥ स्व
रूपतोऽनेह कस्य नायां प्रमाणं नास्ति इति भावः॥ नेह स्याप्रामाणिकत्वाद् एकत्व ज्ञानमुपपन्नं इत्युक्तो
ह स्यापि प्रमाणसिद्धत्वं शर्ववादी शंकते॥ अयं त्वत्तहिति॥ अयं वाऽइदं नाम रूपं कर्मेति श्रुत्या तत्तत् आ
त्मनाऽतिरिक्तत्वं रूपं नाम च कर्म च प्रोक्तम नोऽनेकत्वमेव वेदार्थ इत्यर्थः॥२०॥ सिद्धान्ती दूषयति
न ५ ॥असदेन हिति॥ असदेतत्रायं तस्माद् अन्योन्याहि कल्पितं॥ हिय स्मारेतत्रय मन्योन्येन कल्पि
१४२ तेऽन्योन्यसापेक्षसिद्धिकेतत्स्माद् असदित्यन्वयः॥ अन्योन्याश्रयग्रस्ततया नेहस्य प्रमातुः शक्य म ४
तया प्रामाणिकत्वाभावाद्यथा कथंचित् लोकसिद्धो मिथ्या नेह श्रुत्यानूद्यते केवलं वैराग्याय १४२
तो नाद्वैतज्ञानविरोधितेति भावः॥ अथवा कथं सर्वस्य वेदस्य कार्यज्ञानपरत्वेनैकवाक्यत्वं नि
यं तु शक्यते। पुनरुक्तशब्देन हरणं तत्र तत्रार्थं नेहस्य प्रतीयमानत्वाद् इति चेत्तत्संनयापिन

तत्तत्स्यार्थं युक्तं प्रमाण युक्तिबाधितत्वान्नद्वैतस्य तत्तत्प्र[illegible]च्य नेहादिति॥ वाच्य नेह प्र
माणिकसत्तिसद्विषयतास्यर्थवस्तुकनेहा हनेकता सिद्ध्यति तथा तन्नेहो वाच्य नेहापि न युक्तेः न च शु
ता बन्ने हस्य कृतेः श्रवणात्कस्य॥ प्रकारान्तरेणावाच्य नेहा[illegible]तो न हि शब्दाधीनोऽर्थतत्त्वनिश्चयः स्था
वृ ६ रोपित्तविषयेपि शब्दनेह दर्शनात्॥ नाप्यर्थाधीनः शब्दनिश्चयः। एकस्मिन्नपि पुरुषे पितान्त्रा ता मा
तुलो जामाता पितृव्य इत्युपाधिनेहो पुनरुक्तशब्दनेह दर्शनात् न हि तत्र प्रतियोग्युपाधिनेह व्यति
रेकेण वस्तुनेहोऽविद्यते तथा चानाद्यविद्याकल्पितानेकोपाधिनेहावच्छिन्नानेकशब्दैर्हि[illegible]नेहा
नुवादेन ज्ञानायेहितानन्तःकरणशुद्धिसाधनकर्मविधिपरत्वात्कर्मकाण्डस्यात्मतत्त्वज्ञानवाक्यैक
वाक्यत्वोपपत्तेर्निरतिशयानन्दसंततिकदुःखनिरतिशुद्धिफलस्य सर्वेषां स्वरूपतोऽनिलाषगोचरस्या स ६
त्मतत्त्वज्ञानादन्यत्तोऽसत्त्वादविद्याविद्यावदेव [illegible]पाधिनेहनाधिकारिभेदप्रयोगनेहयोश्चोपपत्तेरे
कपुरुषापेक्षितैकपरमपुरुषार्थैकसाधनप्रकाशकत्वेनैकवाक्यता वेदस्य युक्तेति भावः॥ एवं द्वैत
स्याविद्याकल्पितत्वयुक्तिमभिधाय प्रमाणमभिधत्ते॥ नेयं त्विति॥ यतोऽयमभि[illegible]पताकारनेहः अयं

व स्वतः हेतोरेतत्सर्वं द्वैतरूपं नामरूपकर्मेति त्रयं राशीकृत्य सामान्यमिति योजना ॥ त्रयं वा इदं ना:
मरूपं कर्मेत्यस्मिन्श्रौतवाक्ये रूपत्वेन वर्णविशेषाणामाज्ञामात्रत्वं रूपविशेषाणां चक्षुर्मात्रत्वं कर्म
विशेषाणां प्राणमात्रत्वमिति विशेषमविलापनेन तत्सत्तामात्रत्वमभिधाय तदेतत्त्रयं सदेक
मयमात्मा ऽत्मैकः सन्नेतत्त्रयमित्यैकात्म्यं सर्वस्य जगत उपसंहृतमतो न तत्त्वेनेहास्तीत्यर्थः ॥१०॥
उपसंहरति ॥ असदेतदिति ॥ उक्तार्थमेतत् ॥ श्लोकेऽपि हेयावगम्यमानस्य मिथ्यात्वे दृष्टान्तमाह ॥ म
तद्दृति ॥ तन्तौ वस्त्रविधानाद्वस्त्रं तन्तोरन्यत्र धियावीक्ष्य ॥११॥ आद्यो तन्तुर्वर्णादिजातिरूपविशेषः सहस्राग्र
वस्त्रबाहुत्वादिः धियापरस्परायान्यत्र वदितुं ज्ञातो चित्ररूपेण तु तो यथा कल्पितो मिथ्येति योजना ॥ न
हि चित्रे दृश्यमेवं रूपमिदं स्पवस्त्रस्य वास्तवतिं तथा च मिथ्यार्थगोचरः शब्द इत्यर्थः ॥१२॥ शब्दानि मिथ्या
१४२ र्थकल्पनामुदाहृत्य मिथ्यार्थो खपुष्पकल्पनामुदाहरति ॥ दृष्टं चापीति ॥ दृष्टं चापि यथारूपं बुद्धेः शब्द
ज कल्प्यते ॥ एवमेतज्जगत्सर्वं ज्ञातिबुद्धिविकल्पितं ॥१३॥ तिसृपदोदृष्टं देवतारूपं तथा न तद्देवं बुद्धे १४२
स्तद्दृष्टेन संस्कृतात्या आगमशब्दात्मा शब्दापदेशाय कल्पितमिति योजना ॥ दृष्टान्तितमाह ॥ एवमिति

एतत्सर्वं जगदेवं यथा दृष्टान्तमेवं ज्ञातव्यं भ्रान्त्यारोपितमिवात्मनि विविधं कल्पितं न वस्तुसद
स्तीत्यर्थः ॥१४॥ जगतो मिथ्यात्वे फलितमाह ॥ असदेतत्तदिति ॥ असदेतत्ततो युक्तं सच्चिन्मात्रेण क
ल्पितं ॥ वेद्यश्चापि स एवाद्यो वेद्यं चान्यत्तु कल्पितं ॥१५॥ सर्वं कल्पितं चेत्तदन्यवादापत्तिरित्याशङ्क्यानत्र
र्थ्यस्यास्य सच्चिदिति ॥ निरधिष्ठानकल्पनानुपपत्तेः सर्वकल्पनास्पदं सच्चिन्मात्रं प्रत्यक्तत्त्वं न कल्पितं
सर्वसाक्षित्वात्तस्य सर्वकल्पनायाः प्रागेव सिद्धत्वादित्यर्थः ॥ वेद्यवाद्यादिरात्मत्वप्रतिपत्तिहेतुत्वाद
कल्पितत्वमस्तीति कथं सच्चिन्मात्रमकल्पितमित्युच्यते तत्राह ॥ वेद्यश्चापीति ॥ स एवाद्यः स्वतः सिद्धः
आत्मा वेद्योऽपि वेदनहेतुः श्रुत्याचार्यरूपेण मायया प्रवृत्तेः स्वप्रकाशज्ञानशक्तेरन्यत्र जडे संभवात्
न च चिद्गतप्रकाशज्ञानशक्तिव्यतिरेकेण दीपादेः परप्रकाशज्ञानशक्तिरस्ति वेद्यं च तत्त्वं स एवाद्य इ
ति संबंधः ॥ अन्यत्तु जिज्ञासमात्रं कल्पितं तथा च कल्पितविशेषानुगतत्वेनात्मन एव बोधकत्वं स
५१ र्वकल्पनापवादावसितया तस्यैव बोध्यत्वं चोपपद्यत इत्यर्थः ॥१५॥ कथं स वाद्यो वेद्यो वेद्यं चेत्याशङ्क्य ए२
स्वप्नदृष्टान्तेनानुसारयति ॥ येनेति ॥ येन वेत्ति सवेद्यं स्यात्स्वप्ने सर्वं तु मायया ॥ न परस्पति तच्च

DR BHAU DAJI

च्छुः शृणोति श्रोत्रमुच्यते॥१४ स्वप्ने स्थित आत्मा येन स्वाप्नं विषयजातं वेत्ति स एव वेदः स्यान्मदि
स्वप्ने विदात्मातिरिक्तं नास्त्येकमस्ति। आदित्यादिज्योतिरभावं तदा परमात्मस्वयंज्योतिरुक्तं तेस्थायद्यपि
तत्र सर्वं वेद्यं तदपि मायया स एव। न हि स्वप्ने बाह्यं विषयजातमस्ति तत्र न वकाशान्नतानर्था
द्युत्पादि श्रुतेश्च तथा च संवादम्य स्वसाक्ष मायासृतोपाधिभेदावच्छिन्नसदात्मनावेद्यस्तदु
स्पृतस्थिदात्मना वेदनरूपश्चेति वेदवेदितृता वो मायिक इत्यर्थः। चक्षुरादीन्द्रियाणामुपर
मात्स्वप्नगतश्चात्मा येन पश्यति रूपमुपलभते तदेव चक्षुरिति योजना। स्वप्ने रूपाकारसंस्कृ
तमनोवस्थेच्छिन्नचिदाविधात्मकं रूपं प्रकाशयन्पश्यतीत्युच्यते। एवं श्रोत्रादावप्यूह्यं॥१५॥ ये
न स्वप्नगत इति॥ येन स्वप्नगतो जिघ्रति सा घ्राणं तथैव चारसनस्पर्शने च मनश्चान्यदि
१४४ न्द्रियं॥१५॥ येन स्वप्नगतो जिघ्रति तद्घ्राणमित्यादि यथायोगं योज्यं॥१५ कल्पमेकरूपं चेतन
घ२ वेदवेदकवस्तुरादि रूपेण निदर्शितं तत्राह॥ कल्पोपाधि... जिरितः॥ कल्पोपाधिर्विरचितं १४४
ज्ञानमनेकधा॥ उपाधिभेदाद्यथा तेदा मणेः रत्नस्य जायते॥१६ स्वनकल्पोपाधिभेदा देकम

घ२

वेदं ज्ञानमनेकधाभिन्नमित्यत्र दृष्टांतमाह॥ उपाधिभेदादिति॥ मणेः स्फटिकादे राधिभेदान्नीलपी
ताद्युपाधिभेदात्तथा ज्ञानमेकमनेकधाजायत इत्यर्थः॥१६॥ यथा स्वप्ने निर्भेदस्य ज्ञानस्य कल्पितोपा
धिभेदाद्भेदव्यवहारास्पदत्वं दृष्टमेवं जागरितेऽप्यशेषव्यवहारास्पदत्वं तस्योपपन्नमिति दार्ष्टांति
कमाह॥ जाग्रतश्चेति॥ जाग्रतश्च यथा तेदा ज्ञानस्यास्यापि कल्पितः॥ बुद्धिस्थं आकरोत्यर्थं त्वास
द्रलोऽन्नवक्रियः॥१७ कथं चिद्रूपस्य ज्ञानस्यास्य जाग्रति विकल्पितं तदाह॥ बुद्धिस्थमिति॥ आत्मा स्व ९५
च्छानवंचुकः प्रथमं बुद्धिं परिकल्प्य ततस्तत्वं चुकः संस्तद्विवेकाज्ञं स्वाबुद्धिस्थमेवार्थमाकरो
ति स्वात्मगतमाकल्पयन्नव्यवहरतीति तन्नक्षत्रो तिप्रयुक्तःदस्मात्स्यकामोऽहं तात्रियाहानोपादानव्य
वहाररूपाय स्यसतथा। अविद्याप्रसुपस्थापिता नतः करणपरिणामावस्थाभवन्नास्वयंस्तद्विवे
काद्नेकरूपप्रपंचमात्मनि कल्पयन्व्यवहरतीत्यर्थः॥१७ स्वप्नदृष्टांतसिद्धमनूद्य दार्ष्टांतिकं निगमय
त्यद्वैतं॥ स्वप्नेऽत्यदितिः॥ स्वप्ने तद्दृत्नबोधे यो बहिश्चान्तस्तथैव चा। आलस्याध्ययने तद्वत्तद्भोऽन्य
थियोऽद्वयं॥१८ यद्वत्स्वप्ने व्यवहारस्तद्वद्बोधेऽपि व्यवहारः। यथैव स्वप्ने तद्बहिर्भावः तथैव प्रबो

प्यंतर्बहिर्निर्वदतीति योजना॥ अंतर्बहिर्निर्वेदनप्रथमानो ऽयं व्यवहारः स्वप्नवत्कल्पित इत्युक्तं तत्रै
व दृष्टांतांतरमाह॥ आलेख्येति॥ आलेख्यापेक्षया ऽध्ययनं श्लोकादेरध्ययनापेक्षया च पत्रादेः पुन
रालेखनं मिथ्यैव सर्वगतानां निरवयवानां वर्णानां लेखनासंभवादित्यर्थः। एकाक्षरयोजना।
आलेख्यं च अध्ययनं चालेख्याध्ययने तद्वत्तयोर्यथा ऽन्योन्यमिथ्यो द्वयमंतर्बहिर्भावेन परस्प
रापेक्षबुद्धिजन्यं बहिरेखाविशेषाकारेणानुगतमपेक्ष्यांतर्बुद्धौ संस्काररूपेण धीयत इति त
दपेक्ष्य च बहिः शब्दव्यवहाराय लिप्यत इत्यक्षरे बुद्धयोरन्योन्यापेक्षत्वेनालेख्याध्ययन
योरवस्तुत्वं यद्वत्तद्वदेतन्नप्यंतर्बहिर्भावेन दृश्यमानः सर्वो ऽपि व्यवहारो न वस्तु सन्निति॥ २८
बुद्धिनिष्ठमर्थं प्राकुर्वन्नूनं तत्स्यात्तद्भाव क्रिय इत्युक्तं प्रपंचयति॥ यदायमिति॥ यदायं क
१४५ ल्पयेज्जेदं तत्कामः सन्प्रयात्यसौ॥ यत्कामस्तत्क्रतुर्भूत्वा कृतं तत्तत्प्रपद्यते॥ २९ अयमात्मा
पूर्वं ज्ञातिसंस्कारवशात्परबुद्धिकं चेत्कुरुते सन्नविषयानेदं कल्पयेत्तदा तत्कामः ज्ञाननन्त्व १४५
नाध्यस्तविषयजेदंमिलाषवान्सन्प्रयात्यसौ प्राकामं कृतसंकल्पो न वा तत्क्रतुः संकल्प

रूपमहं साधयिष्य इत्यध्यवसायरूपः तत्तत्र यत्कामस्तत्क्रतुर्भूत्वा यत्कामसाधनं कर्म
सो ऽतं तन्निष्पादितं तत्फलावस्थं प्रपद्यते प्राप्नोतीति पुनस्तत्संस्कारसचिवो ऽहं परिकल्प्यका
मक्रतुः सर्वं कर्मानुष्ठानाय फलनाशि सेवमन्योन्यमिथ्याहेतुफलात्मना परिकल्पितं संसा
रमनुभवतीत्यर्थः॥ तथा च श्रुतिः॥ अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भव
ति तत्क्रतुर्भवति तत्कर्म कुरुते तत्तदभिसंपद्यत इति॥ ३० उक्तं दृश्यमिथ्यात्वं सोपपत्तिकमुप
संहरति॥ अविद्याप्रभवमिति॥ अविद्याप्रभवं सर्वमसत्तस्मादिदं जगत्॥ तद्दृष्टा दृश्यते यस्मात्सु
षुप्ते न च दृश्यते॥ ३१ तद्दृष्टा ऽविद्यावता यस्माज्जाग्रत्स्वप्नयोर्दृश्यते तदभावे सुषुप्ते न चैव गृह्यते तस्मात्स
र्वमिदं जगदविद्याप्रभवं मिथ्याज्ञानविजृंभितमसत्परमार्थमिति योजना॥ ननु किं जगद्धेतु
रविद्या कीदृशी तन्निवृत्तिः का विद्या वा कीदृशी केन वा विद्याविधिर्ज्ञायते इत्याकांक्षायामाह॥ वि
द्याविधिरिति॥ विद्याविधिश्रुतिप्रोक्ता एकत्वान्मिथ्यो हि नः॥ तस्मात्सर्वप्रयत्नेन ज्ञास्मै विद्यावि
धीयते॥ ३२ एकत्वान्मिथ्यो विद्याविधिश्रेष्ठस्तन्मध्ये विधानत इत्थीरविधेति स्वरूपाणि॥ प्रसो

ज्ञे इति ज्ञापको लिङ्। अथ योऽन्यां देवतामिति। अन्यास्ते दर्शयितोऽविद्यात्वं लोकानुभवसिद्धमेव
तु वा इदं रूपत्वयोक्तं॥ किमुत ब्रह्मा वेद इत्याशङ्क्य उत्तरं स्मरं ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावे
दहं ब्रह्मास्मीति प्रत्यक्षप्रमाणमन्वत्ताज्ञसिद्धार्थबोधिनी श्रुतिरेकत्वज्ञानस्याविद्यात्वं ज्ञापयति
नो स्मावन्मित्यर्थः। यस्माद् विद्यावद् विद्यालोकस्यानुभवसिद्धा न तवलित स्मात्सर्वप्रयत्नेना
धारोपापवादप्रबंधनिर्माणेन शास्त्रे विद्या विधीयते प्रतिपाद्यत इति मुमुक्षुः शास्त्रतस्तत्स
रोन वेदित्यर्थः॥२१ शास्त्रे चेत् सर्वप्रयत्नेन विद्या अनुसाध्यते किमिति तदिह सर्वोपि शास्त्रेण प्रव
र्त्तते प्रवर्त्तमानो वा कथं विद्यां न प्राप्नोतीत्यपेक्षायां चित्तशुद्धतां वा हि सत्त्विवेसाह॥ चित्ते हीति॥
चित्ते ह्यादर्शवद्यस्मात् शुद्धे विद्या प्रकाशते॥ यमैर्नित्यैश्च यज्ञैश्च तपोभिस्तस्य शोधनं॥२२ तस्मा
१८६ चित्तस्य शुद्धिः कर्त्तव्येति शेषः। तर्हि केनोपायेन चित्तशोधनमित्यपेक्षायामाह॥ यमैरिति॥ अहिं
सा ब्रह्मचर्यादयो यमास्तैर्नित्यैः शौचादिभिर्नियमैरित्यर्थः। यज्ञैः स्वाश्रमविहितधर्मैराश्र १८६
रसाज्ञैते स्तपोभिश्च तस्य चित्तस्य शोधनं कार्यमित्यर्थः॥२२ तपःशब्दार्थमाह॥ शारीरादिति॥

शारीरादीति तपः शुद्धये तत् हि श्रुत्यर्थे नुत्तमं॥ मनआदिसमाधानं तत्तद्देहविशोधणं॥२२ तस्य
स्वरूपं भगवतोक्तं॥ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं॥ ब्रह्मचर्यमहिंसा च शारीरं तप उ
च्यते॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्॥ स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ मनःप्रसा
दः सौम्यत्वं मौनमात्मविनिग्रहः॥ भावसंशुद्धिरित्येतत्तपो मानसमुच्यते इति॥ एतान्यपि सात्त्विकान्यनु
ष्ठेयानि न राजसतामसानि॥ तत्र सात्त्विकं तपो लक्षणं॥ श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः॥ अफला
कांक्षिभिर्युक्तैः सात्त्विकं परिचक्षते इति॥ एतदुक्तमुत्तममिति॥ तद्धि श्रुत्यर्थं चित्तं विशुद्ध्यर्थं मनआ
दि सादिपदग्राह्येंद्रियनिग्रहः समाधानं नैश्चल्यं तत्र तत्रैतस्मिन्नर्थे तच्छब्दः॥ तेषु तेषु देहे विशो
धणं शोधनं मरदर्पवातसहनेन दृढीकरणमित्यर्थः॥२३ एवमात्मोपकारकं तप उक्त्वा श्रवणादौ सन्नि
पत्योपकारकं तपो विशेषे स्मृतिवचनपाठेनाह॥ मनस इति॥ मनसश्चेंद्रियाणां च ह्यैकाग्र्यं परमं त
पः स्मृतं॥ तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते॥२४ ऐकाग्र्यं श्रवणे वस्तुनि मननद्वारा स्थिरीकरणं॥
एतस्याव ३ पकर्त्तव्यत्वे या स्मृतिः कियत इत्यत आह इति॥ एवमुक्तैः साधनैः संशुद्धचित्तः श्रवणा

द्धिपरः सन्नवस्थात्रयात्तत्साक्षित्वेन विविच्य वाक्यात् ब्रह्मात्मत्वेन जानीयादित्याह । देहमिति । देहं जाग-
रितं विश्वात्मकं तं स्वप्नं तैजसं तु । सुषुप्तं तदभावं च स्वमात्मानं परं परम् ॥ १४ ॥ देहं देहं नं बाह्येंद्रियैर्बा-
ह्यार्थोपलंभेन जागरितं विश्वात्मा तद्देवं तु देहशब्दवाच्यमेव स्मृतं । संस्कारवशान्निद्रायां मा-
नसं स्वप्नं विश्वात्तैजसं तदभावं तयोर्देहस्वप्नयोरभावो यस्मिंस्तत्सुषुप्तं विश्वात् । एवं दृश्यत्रयं दृष्ट्वा त-
स्य तत्साक्षिणं स्वं स्वरूपं तं तमात्मानं परं परं सत्यज्ञानादिलक्षणं ब्रह्माहमस्मीति विद्यादित्यर्थः ॥
१५ ॥ नन्ववस्थात्रयदेहेतावदज्ञाने सति कथं तद्विविक्ततया प्रत्यगात्मनो ब्रह्मत्वमुपपद्यत इतीत्त आह ॥
१४२ सुषुप्त्याख्यमिति ॥ सुषुप्त्याख्यं तमोऽज्ञानं बीजं स्वप्नप्रबोधयोः । स्वात्मबोधप्रदग्धे स्याद्बीजं दग्धं १४२
यथाभवम् ॥ १६ ॥ तमइति विशेषणेनाज्ञानस्य भावरूपत्वमुक्तं ततो बीजत्वमुपादानत्वमुप-
पद्यते तदज्ञानं स्वात्मनः सम्यग्बोधाग्निना प्रकर्षेण निःशेषं दग्धं स्याद्यथा दग्धं बीजमभवं न
वप्ररूढ्यंकुरकार्यं स्यादंकुरं न जनयतीति तथा सत्यज्ञानाग्निदग्धमज्ञानं पुनरवस्थाप्ररोहकरं न भवती-
त्युक्तं भवति । एवं प्रतीचो ब्रह्मत्वमित्यर्थः ॥ इदं च अज्ञानस्यावस्थाबीजत्वमुक्तमुपपादयन्नज्ञाने

नेहस्यैव सर्वसंसारोपाधिनिवृत्तिर्नेयत्तां तरसाध्येति दर्शयति ॥ तदेवैकमिति ॥ तदे-
वैकं त्रिधाज्ञेयं मायाबीजं पुनः क्रमात् ॥ मायाबीजं यात्मा विकारोपि बहुधैकोजलार्कवत् ॥
१७ तदेवैकं मायाख्यं बीजं त्रिधा तत्क्रमात् सुषुप्तादिक्रमेणेत्यर्थः । एतदुक्तं भवति । चिन्मा-
त्राश्रयविषयं पुनरिदं त्रिविधमाकारं च या सुषुप्तिमारभ्य जागरितपर्यंतं तदारभ्य सुषुप्ति-
पर्यंतमहरहस्त्रिधा विक्रियत इत्यर्थः ॥ एतदुक्तं भवति । चिन्मात्राश्रयविषयमेक-
मेवाज्ञानमनाद्यनिर्वचनीयमनेककार्यविक्षेपसंस्कारोपेतं चैतन्याभाससखचितं
स्वाश्रयेऽनात्मन्यध्यासाधिदैवतत्वेनेदं प्राज्ञस्येश्वरोपाधिविशिष्टसुषुप्तिलयावस्था-
कारं जायते ॥ तथा तैजसहिरण्यगर्भोपाधिसंततिस्वप्नस्वप्नावस्थात्मकं भवति ॥ त-
था पुनर्विश्ववैश्वानरोपाधिस्थवितजाग्रत्स्थितिसर्वस्थारूपमापद्यते तत्रापि देवति-
र्यङ्मनुष्यस्थावरादिभेदेन नानाविधशरीरेंद्रियांतःकरणोपाध्याकारं सत्संसारव्यवहार-
विहारमन्यत्तजीवेनेदमवहारनिर्वाहकं भवति यथैकं वटादिबीजं महाभ्रितं सत्तस्याभि

तस्य हि अंकुरकांडविटपशाखापत्रपुष्पफलादिभावमापद्यमानं बीजं भावं चापद्यते तथे-
दमपीति दृष्टांतः देवदेहाकारं वस्तुस्वमूलदाहे सति नैव भद्रूभावमापद्यमानं भवति।
यथा तथा संसारहेतुमूलाज्ञानस्य तत्त्वज्ञानाग्निना दाहे स्वाश्रये चिदेकात्मना विलीनत्वा-
त्पुनर्नेदं जनियोग्यो भवति संसार इत्सज्ञा दाहाद्यैव तत्त्वज्ञाने यतितव्यमिति। तदेवं कं त्रिष्व-
स्तुनेतमोबीजस्य स्वातंत्र्येण प्रवृत्तिशंकास्पात्तथा सति सोस्य सिद्धांतायातः इत्यत्त स्तमसो
ऽपेहितमाश्रयं दर्शयति। मायावीति। आत्मा निरूपचरितमायाविमानुस्वप्रकाशचिदेकर-
सो मायावी मायाद्वितीयो ब्रह्मवाच्याज्ञानाश्रय इत्यर्थः। मायाश्रयश्चेदात्मा तर्हि तस्य मायावि-
हितानर्थोपाधिश्रयेनैकधा विहितपरमाणस्य कथं कूटस्थत्वमित्याशंक्य दृष्टांतेन प्रसाधयति
२८८ त्र्प्रविकार इति॥ एकएवात्मा स्वगतविकाररहितोपि बहुधा विभाव्यमानो भवति जलादिवत्॥
मध्येकएवार्कोजले ते तेषामुपाधिषु नेकधा विभाव्यमानोपिना॥ नैको भवति न वा जलोपाधिवि- २८८
रेण विक्रियते तथायमपीत्यर्थः॥२५॥ उक्तमेव दृष्टांतदार्ष्टांतिकरूपं प्रपंचयति। बीजं चे-

बीजं चेकं यथा भिन्नं प्राणस्वप्नादिभिस्तथा॥ स्वप्नजाग्रच्छरीरेषु तद्वदात्मा जलेंदुवत्॥२६
प्राणादय्यत्यासतारस्येति॥ स्वप्नादिभिरिति जाग्रद्व स्वप्नमूर्छावस्था चयहते। यथैकमविद्यामा-
यास्यबीजमव्याकृतावस्था देहेन भिन्नं तथा स्वप्नजाग्रच्छरीरेषु समष्टिव्यष्टिस्थूलसूक्ष्मशरी-
रेषु जलेंदुवच्चिदात्मासोपि भिन्नो भवति। तदात्तदधिष्ठानभूतश्चिदात्मा चोपाधिगतानाना विवेका-
त्तद्भिन्नो विभाव्यते तेजसहिरण्यगर्भविश्वानराहित्ये देन प्रकाशत इत्यर्थः॥२६॥ ननु यथात्मनो
मायाकल्पितेषूपाधिषु बहुत्वं तर्हि तत्र मायारवत्त्वमप्यस्यादिति कथं कूटस्थतेत्याशंक्य दृ-
ष्टांतेन निराकरोति॥ मायाहस्तिनमिति॥ मायाहस्तिनमारुह्य मायाव्येको यथा व्रजेत्॥ आगच्छ-
स्तद्वदेवात्मा प्राणस्वप्नादिगोऽचलः॥२७॥ यथैवएको मायावी स्वमायानिर्मितं हस्तिनमारुह्य व्र-
जेदिदं देशमागच्छंश्च भवति गमनागमने आचरन्निव जनसमानोप्यचल एव तद्वत् तथैवात्मा प्रा-
णस्वप्नादिगतत्वेन विभाव्यमानोऽप्यचलः कूटस्थ एवेत्यर्थः॥२७॥ प्राणाद्युपाधिसंबंधमात्मनो
ऽगीकृत्योक्तमिदानीं सोपि नास्ति वस्तुत इत्याह॥ न हस्ती॥ न हस्ती न तदारूढो मायाव्यन्यो यथा

नास्ति न्वयमाह बद्धा ४ वाशब्द इवार्थः अपिशब्दादेवरक्तत्वेनिश्चयादपि मायावी न व्यामुह्यतीत्यर्थः व्यतिरेकमुक्त्वा

स्ति तथा न प्राणादिनत्तद्दृष्टान्तप्याज्ञोऽन्यः सहाद इति ॥ ३४ ॥ निगदव्याख्यातं पद्यमूः ॥ ३४ ॥ रामोजयति

वस्तुतः प्राणाद्युपाधिसंबंधाभावेपि मायासंबंधोऽपरिहार्य इत्यत आह ॥ अबद्ध इति ॥ अबद्ध

बद्धेषु नास्ति माया मायाविनोपि वा ॥ बद्धाहस्यैव सा मायाऽमाया ह्येव ततोऽभवेत् ॥ ३५ ॥ न बद्धो

हुर्यस्य सोऽबद्धः बद्धेषु तस्य सोविकः स्य यथा मायानास्ति मायाविनोपि तथा बद्धेषु बंधाभावान्मायाह

स्यैवेति ॥ सा माया बद्धाहस्यैव न यहेतुरूरस्यादिरूपाभास तदस्यर्थः ॥ ततस्तस्मादमायाह्येवमा

योपलक्षित एव भवेत्सुमान्मायाधार इत्यर्थः ॥ अयमेव श्लोको दृष्टांतिकेपि योज्यः ॥ अबद्धेषु

सो माया नादृत [illegible] ज्ञानावस्य मायाविनोपि मायाविस्येन विनाश्यमानस्यापि माया नास्ति ना

२४९ द्दहेतुर्हि माया साहमस्मि परं ब्रह्मेति प्रकाशमानत्र्यात्मनि विरोधादेव न भवतीत्यर्थः ॥ वाशब्दो

लोकप्रसिद्धमायाविदृष्टांतार्थः ॥ तथा च ज्ञानावस्थायां कदाचित्प्राणाद्याकारां मायां पश्यन्न २४९

ज्ञानावस्थायामिव न व्यामुह्यति किंतु सुषुप्ति इव निर्विकार एव भवतीत्यर्थः ॥ समानमन्य

त् ॥ ३५ ॥ तस्मात्साक्षात्कृतात्मज्ञानादमायावी माया तत्कार्यसंबंधविनिर्मुक्तो भवतीत्ययमर्थः ॥

DR BHAU DAJI

श्रुतिसिद्ध इत्यद्वैतेयो मुमुक्षुणेत्याह ॥ साक्षादेव इति ॥ साक्षाद्देवः स विज्ञेयः साक्षादात्मेति च श्रु

तेः ॥ त्रिधुक्ते हृदयग्रंथिर्न चेहितसाद्धितः श्रुते ॥ ३६ ॥ सर्वविकारसाक्षी कूटस्थ आत्मा साक्षाद्देवो वि

ज्ञानमानंदं ब्रह्मेत्यादिलक्षणो विज्ञेयः य साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतर इति श्रुतेरात्मेति श्रु

श्रुतेरित्यर्थः ॥ एवं विज्ञानेनात्मविज्ञानेहानिं च श्रुत्या दर्शयति ॥ त्रिधुक्त इति ॥ न चेदिहावेदीन्मह

ती विनष्टिरित्यादित्वं इत्यादिशब्दार्थः कथं वा तु ॥ मत्सोः समसुमाप्नोति य इह नानेव पश्य

ती ति इत्यादिश्रुतयो गृह्यंते ॥ ३६ ॥ साक्षादात्मविज्ञानमुक्तमाक्षिपति ॥ अशब्दादित्वादिति ॥ अशब्दा

दित्वतो नास्य ग्रहणं चेंद्रियैर्भवेत् ॥ सुखादिभ्यस्तथाऽन्यत्वाद्बुद्ध्या वापि कथं न वेत्त्यसौ ॥ ३७ ॥ अशब्दादित्वान्तः

करणग्राह्यत्वादात्मनः कथं साक्षाद्विज्ञानं स्यादित्यर्थः ॥ ३७ ॥ परिहरति ॥ अदृश्योपीति ॥ अदृश्योपि यथारा

हुश्चंद्रे बिंबं यथांभसि ॥ सर्वगोपि तथैवात्मा बुद्धावेव स गृह्यते ॥ ३८ ॥ यथा स्वरूपेणादृश्योपि राहुश्चंद्रे बिं

दमंडलेऽपरक्तोपि दृश्यते यथा वा जलसिक्तेरथरदादेः बिंबं दृश्यते तथैव चक्षुराद्यगोचरोपि स परमात्मा

सर्वगोपि सर्वत्र वर्तमानोपि तत्त्वमस्यादिमहावाक्योत्थबुद्धावेव प्रतिबिंबितः गृह्यते तत्र प्रतिबिंबि

तयास्वतःस्फुरणमेवग्रहणं न विषयीतावदित्यर्थः॥२॥ अत्रैकस्यापि प्रत्यक्त्वे रज्जुदृष्टांतः सर्वसन्नि
हितत्तयाज्ञासमानस्य सर्वत्र यथावत्स्फुरतोऽप्युपाधिविशेषे यथावत्स्फुरणे प्रतिबिंबदृष्टांत इति वि
वेकः॥२४॥ बुद्धौ बैंबात्मा प्रत्येतो चेद्बुद्धिधर्मा बोध इति शंकां दृष्टांतेन प्रत्याचष्टे। जानोरिति। जानोर्बिंबं यथा
चाक्ष्यं जले दृष्टं न चांनसः। बुद्धौ बैंबो न तद्धर्मस्तथैव स्यात्त्रिधर्मतः॥२५॥ यथा जले दृष्टं बिंबमोक्ष्यं च
जानोरेव न त्वांनसो जलस्य धर्मस्तस्यैवोत्पत्त्यानाद्यात्तथैव बुद्धौ स्फुरन्बोधो न बुद्धिधर्मः स्यात् बु
ता विधर्मतो विपरीतधर्मतो बुद्धेर्जाड्यधर्मत्वनिश्चयादित्यर्थः॥२५॥ न केवलं शास्त्रीयबुद्धावेवचिदानुव
परमात्मा स्फुरति किंतु लौकिक्यामपि विषयाकारबुद्धिवृत्तिष्वात्मा स्वतोऽपरोक्षः साक्षितया स्फुरतीत्या
ह। चक्षुरिति। चक्षुर्मुखा धियो वृत्तीर्यातां प्रत्यगात्मदृशम्॥ दृष्टेर्द्रष्टारमेवाहात्मानं श्रुतेः श्रोतातथा म
१५० वेत्ता॥२६॥ चक्षुरादिकारणाकारा या धियो वृत्तीस्तां प्रत्यगात्मेव नासयन्नात्मा स्फुरद्रूपं गतं वित्तज्ञान १५०
शक्तिर्दृष्टेर्द्रष्टा नयेतऽएव मुत्रस्ताप्ये योज्यो॥२६॥ केवलामिति। केवलां मनसो वृत्तिं प्रत्यगात्मनं ताम
तेरज्ञा विज्ञाताऽस्तु तत्साक्षित्वात्तथा शास्त्रे न हीत्यतः॥२७॥ चक्षुरादिद्वारा बहिरप्रवृत्तामंतरेव वि

षयाकारामित्यर्थः। अजोऽविज्ञाररहित इत्यर्थः॥ अत्तु श्वचिद्भक्तित्वादित्यर्थः॥ अत्तु श्रूयात्ति। श्रु
तिमुदाहरति। तथा शास्त्रमिति। एतद्धि स्पष्टमित्येतत्तः … ॥ तसैः सार्व वित्तक्तित्वां गत्वापरा
सन्नप्यर्थं नत्तिरिति के चित्तान हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इ
ति श्रुतेरित्यर्थः। दृष्टेर्द्रष्टा साक्षी चेन दृष्टेर्द्रष्टारं पश्येन्न श्रुतेः श्रोतारं शृणुयान्न मतेर्मंतारं मन्वीथा
न विज्ञातेर्विज्ञातारं विजानीया एष त आत्मा सर्वांतर इति श्रुतिरुदाहार्या॥२७॥ दृष्टत्वादिरूपद्र
ष्टृकारित्वाप्रसिद्धत्वप्रसक्तिमाशंक्याह॥ ध्यायतीति॥ ध्यायतीव विकारित्वं तथा लेलायतीत्यपि॥ अत्र स्तेन
ति प्रसिद्धत्वं तथानन्वागतं श्रुतेः॥२८॥ श्रुता विवक्षा स्यात्तु ध्यानचलनयोरात्मा सत्त्वमुच्यते॥ अत्रतोऽविकारित्वं सिद्ध
मित्यर्थः॥ अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा भवतीति। अनन्वागतं पुण्येनानन्वागतं पापेनेति च श्रु
तेः प्रसिद्धत्वं सिद्धमित्यर्थः॥२८॥ न तु सुषुप्ते ज्ञानाभावाज्जाग्रत्स्वप्नयोश्च तज्ज्ञावादात्मनः कूपमविकारित्वमित्यत
आह॥ शास्य लोपाद्विति॥ शात्र्यस्य लोपात्सुषुप्ते … विकारता … स्यैव विशेषस्तु यत्र चेति श्रुते
र्वेद्यः॥२९॥ सुषुप्ते … मात्रेवशात्रस्य लोपादिति यजनम्॥ यद्वैतन्न पश्यति पश्यन्वै तन्न पश्यतीत्यादि श्रुतेरित्यर्थः॥

तथा बोधे बाधस्यायां जाग्रत्स्वप्नयोरिति यावत् ॥ ज्ञो ज्ञानस्वरूप एवात्मा निरन्वयत्वेनाविकारतो विक्रि-
यानुपपत्तेरित्यर्थः ॥ अवस्थात्रयेऽपि निर्विशेषचिद्रूपश्चेदात्मा कथं तर्हि नाशविषमिति पृष्टं हि परम-
र्शो बोधावस्थायां च कथं जानामीत्यनुभवः स्यात् ज्ञो क्व विषयोपरमात् परमोपाधिनिबंधनं तदुभयं न स्व-
रूपनिबंधनं तथैव प्रत्येकत्वादित्याह ॥ ज्ञेयस्येति ॥ यत्र वा अन्यदिव स्यात्तत्रान्योन्यस्य पश्येदित्यादिकान
न्त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुत्योदाहरणं ॥ ३९ ॥ एवं नित्यस्यैतन्यस्वरूपत्वान्नित्यापरो-
क्षो निर्विकारश्चात्मेत्युक्तं प्रपंचयति ॥ श्लोकत्रयेण ॥ व्यवधानाद्यीति ॥ व्यवधानक्रियारोपोऽत्र लोके दृष्टेरन-
त्मनः ॥ दृष्टेरात्मस्वरूपत्वात्स्वतन्त्रत्वमत्र तत्स्मृतेः ॥ ४० ॥ अनात्मनो घटादेर्विषयस्य ग्राहिका या लोके दृष्टि-
वा४ स्तद्ग्राहकचक्षुरादिदृष्टेर्देशतः कालतो व्यवधानाद्वा सन्निकर्षत्वारोपः संहितसिद्धमित्यर्थः ॥ न तथात्म-
नो दृष्टेर्व्यवधानमस्ति दृष्टेरात्मस्वरूपत्वादात्मन एव ब्रह्मत्वात्तद्ब्रह्मस्वत एव सदाप्रस्पष्टं स्मृतेर्ब्रह्म-
१५१ विज्ञिरिति योजना ॥ ४१ ॥ स्वरूपप्रकाशस्यानन्यापेक्षत्वं दृष्टान्तेन स्फुटयति ॥ न हीति ॥ न हि दीपान्तरा- १५१
पेक्षा यद्वद्दीपप्रकाशने ॥ बोधस्यात्मस्वरूपत्वान्न बोधोऽन्यस्तथेष्यते ॥ ४२ ॥ स्फुटं ॥ ४२ ॥ एवमपरोक्षत्वं

विनाशित्वस्याविकारित्वं विनाशी कुर्वन्नात्मनो निर्विशेषत्वमाह ॥ विषयत्वमिति ॥ विषयत्वं
विकारित्वं नानात्वं वा न हीष्यते ॥ न हेयो नाप्युपादेय आत्मा नान्येन वा ततः ॥ ४३ ॥ न हीष्यते श्रुति-
विरोधादिति शेषः ॥ अन्यस्यासत्वाज्जडत्वाच्चेति हेतुरनुसंधेयः ॥ स्वाशाब्दात्स्वेनापीत्यर्थः ॥ ४३ ॥
नन्वेवमपि कुतश्चात्मनो निर्विकारत्वं नरकपातादिभयदर्शनादित्याशंक्याह ॥ सबाह्याभ्यन्त-
र इति ॥ सबाह्याभ्यंतरो जीर्णो जन्ममृत्युजरातिगः ॥ अहमात्मेति यो वेत्ति कुतो न्वेव बिभेति सः ॥
४४ ॥ सम्यक्प्रकारार्थं शोधनं शर्व केयं अत्रात्मतत्वं जानाति स कुतो न्वेव बिभेति ॥ जन्यहेतोर्द्वितीय-
स्याबाधितत्वादित्यर्थः ॥ ४४ ॥ तथापि यावज्जीवादिश्रुतिविहितत्वात्कर्मणां तदकरणे प्रत्यवा-
यत्वं विदुषोऽप्यस्तीति तत्परिहारायानुष्ठानं स्यादिति चेन्नेत्याह ॥ प्रागेवेति ॥ प्रागेवैतद्विधे-
कर्मवर्णित्वादेरपोहनात् ॥ तदस्थूलादिशास्त्रेभ्यस्तत्त्वमेवेति निश्चयात् ॥ ४५ ॥ अस्थूलादिशा-
स्त्रेभ्यो वर्णित्वादेः कर्माधिकारहेतोरपोहनात्तत्त्वमेवेति वाक्येन ब्रह्मस्वरूपत्वे निश्चयादे-
तद्विधेरेतदात्मतत्वविधानात्प्रतिपादनात् प्रागेव सर्वमेव तद्यावज्जीवादिशास्त्रविहित

कर्मेनोर्ध्वमितियोजना॥ अनधिकारिणोऽकरणे प्रत्यवायाभावेनवाज्ञानुष्ठानप्राप्तिरितिभावः॥
॥छ॥ आत्मनोऽध्यासं विनानवर्णित्वाद्यसत्त्वात्तत्र युक्तिमाह॥ इत्येवेति॥ पूर्वदेहपरित्यागेजात्यादीनां
प्रहाणतः देहस्यैवतुजात्यादिमत्त्वस्याप्येवं त्वनात्मता॥छ॥ पूर्वदेहपरित्यागेतदनुरक्तजातेरप्यपरित्या
गाद्रागमापादयित्वेन तज्जात्यादेरात्मधर्मत्वं किंतु देहस्यैवजात्यादिधर्मः॥ तर्हि देहएवात्मास्त्वित्यत आ
ह॥ तस्यापीति॥ एवमागमापायित्वाद्देवदेहस्याप्यनात्मतेत्यर्थः॥ देहस्यजात्यादिश्च वर्णित्वादिनाप्रका
रेण कर्माधिकारहेतोरभावादात्मनो न स्वभावतः कर्मकर्तृत्वमुपपद्यत इति भावः॥छ॥ शरीरादि
षु आत्मात्मीयाभिमानस्य प्रसिद्धत्वेन हेयत्वायोगमाशंक्याह॥ ममाहमिति॥ ममाहं चेत्यतोऽविद्या
शरीरादिष्वनात्मसु॥ आत्मज्ञानेन हेयास्यादसुराणामिति श्रुतेः॥छ॥ यत आत्मत्यागमापाद्यात्मा
१५२ मनात्मत्वं देहादेर्निश्चितमतो हेतोः शरीरादिष्वनात्मसु ममाहमेत्यभिमानोऽविद्यामिथ्याप्रत्यय १५२
सात्मज्ञानेनात्मतत्त्वप्रत्यगात्मानुसंधानेन हेयास्याद्बाध्यास्याद्देहात्मदृष्टेरासुरत्वेन निंदाश्रुतेश्चे
त्याह॥ असुराणामिति॥ असुराणां ह्येषोपनिषदिति श्रुतेरित्यर्थः॥छ॥ तत्त्वज्ञानादूर्ध्वं निवर्त्तकर्मनवा

तत्प्रयोजकंजात्याद्यात्मनोऽस्तीत्येतद्दृष्टांतेन साधयति॥ दृशाहेति॥ दृशाहारेश्च कार्याणां पारिव्राज्येऽनि
वर्तनं॥ यथाज्ञानस्य संप्रश्नोत्तदग्न्याद्यादिकर्मणि॥छ॥ पारिव्राज्ये सति सपिंडताभिमानाभावात्संन्यासि
नो यथा श्राद्धादेरननुष्ठेयत्वात्तथा प्रत्यगात्मज्ञानस्य संप्रश्नोजात्याद्यभिमानाभावाद्विदुषः कर्मानुष्ठ
नाभाव इत्यर्थः॥छ॥ यस्मादेवमात्मनो प्रत्यगात्मत्वाज्ञानमूलो देहाद्यध्यासनिबंधनः संसारस्तस्मात्तत्त्वज्ञा
नात्सकामादियुक्तो धर्माधर्मद्वारा संसरति प्रत्यगात्मज्ञाने च सति कामादेरभावान्मुक्तो नवेदित्याह॥ यत्का
मयति॥ यत्कामस्तत्क्रतुर्भूत्वा कृतं त्वत्र प्रपद्यते॥ यदा स्वात्मदृशः कामाः प्रमुच्यंतेऽमृतस्तदा॥छ॥ स्व
स्वरूपप्रत्यगात्मत्वात्मदृष्टिर्यस्य स स्वात्मदृक्तस्य स्वात्मदृश इति विग्रहः॥ यदा सर्वे प्रमुच्यंते कामा ये
ऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवतीति श्रुतेः॥ हृद्याः कामाः हृदयाध्यासबाधनेन बाधिताः संतो यदस्य
र्पणमुच्यते तदा प्रवृत्तिबीजाभावात्स्वात्मसंस्थ आत्माऽमृतो मुक्तो संसारबंधनो भवतीत्यर्थः॥छ॥ धना
एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंति नित्यदृष्टे निरंजन इत्यादिश्रुतेरात्मनो नित्यदृ
त्वावगमात्तस्य साध्यसाधनविलक्षणत्वेन स्वतः क्रियादिसंस्पर्शित्वाभावादध्यासमूलत्वं क्रिय

तत्कारकयोगस्येति निष्क्रियात्मतत्त्वावबोधनेनैव क्रियादिसाध्यमित्याह ॥ आत्मस्वरूपेति ॥ आत्मस्वरूप
विधेः कार्यक्रियादिभ्यो निवृत्तेः ॥ न साध्यं साधनं वात्मा नित्यतृप्तः स्मृते मतः ॥ विधिविधानं तत्स्वरूप
वधारणं ॥ धन्य यद्यपि विज्ञातात्मतत्त्वस्य क्रियाहेत्वभावात्तद्नाथस्तथापि जिज्ञासोर्मुमुक्षोर्मोक्षाय क्रि
यानुष्ठानं स्यादित्याशंक्य मोक्षस्य क्रियाफलविलक्षणत्वान्न तस्यापि क्रियासंभव इत्याह ॥ उत्साद्येति
उत्साद्याप्य विकार्याणि संस्कार्यं च क्रियाफलं ॥ नातोऽन्यत्कर्मणः कार्यं त्यजेत्तस्मात्ससाधनं ॥ एवं ससा
धनं जायापत्यवित्ताग्निस्वाध्यायोपवीतादिसाधनसहितं कर्म विधिवत्त्यक्त्वा त्यजेन्मुमुक्षुरिति शेषः ॥ उत्पत्त्या
दि कस्मान्नित्यत्वान्मोक्षस्य च नित्यात्मस्वरूपावस्थानरूपत्वान्मुमुक्षोरपि कर्मणा कृत्यमस्तीति भा
वः ॥ एवं किं ससाधनकर्मत्यागमात्रेण मुक्तिसिद्धिः किं वान्यत्किमपि कृत्यमस्तीत्यपेक्षायामात्मतत्त्व
१५३ ज्ञानाय गुरूपसत्तिः कर्तव्येत्याह ॥ तापांतेति ॥ तापांतत्वादनित्यत्वादात्मार्थत्वाच्च या बहिः संस्था
त्मनि तां प्रीतिं संत्यज्य गुरुमाश्रयेत् ॥ अपरस्य बाह्यस्यास्य सर्वकर्मनिबंधनां प्रीतिरनित्या दुःखांता स्वा १५३
र्थप्रवृत्ता च तस्मात्त्रिनिमित्तां प्रीतिं मनात्मविषयामात्मन्येवोपसंहृत्य नित्यगुरुमार्थीं गुरुं संश्र

श्रयेतेति मुमुक्षुं शिक्षयति ॥ तापांतत्वादिति ॥ बहिः आत्मनोऽन्यत्र जायापुत्रादौ प्रीतिस्तां आत्म
मात्मन्युपसंहृत्यात्मन्यात्मत्वेनेत्यर्थः ॥ परं तु पूर्णत्वं गुरुं विशिनष्टि ॥ शांतमिति ॥ शांतं प्राज्ञं तथा
मुक्तं निष्क्रियं ब्रह्मणि स्थितं ॥ श्रुतेराचार्यवान्वेदत्त ह्रिद्वीतिस्मृतेस्तथा ॥ प्रशांतमद्बुधश्चित्तं प्रा
ज्ञं मेधाविनं यथापरिसत्कबंधसजातीयेन पुनर्बंधेन नवं जितं तथा मुक्तं निर्बंधनमित्यर्थः ॥ नि
ष्क्रियमेहिकामुष्मिकार्थशहित्तिरहितं ब्रह्मणि स्थितं स्वस्वरूपानंदानुभवेन सर्वत्रोदासीनमि
त्यर्थः ॥ गुरोराश्रयणीयत्वे प्रमाणमाह ॥ श्रुतेरिति ॥ आचार्यवान्पुरुषो वेदेति च श्रुतेः ॥ तद्विद्धि प्रणि
पातेन परिप्रश्नेन सेवया ॥ उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ इति स्मृतेश्चेत्यर्थः ॥ प्रकृतं
प्रकरणानुसारेणाक्तविशेषणगुरूपगमनेफलं निरतिशयं दर्शयति ॥ सगुरुरिति ॥ स गुरुस्तारयेद्युक्तं
शिष्यं शिष्यगुणान्वितं ॥ ब्रह्मविद्याप्लवेनाशु स्वांतर्ध्वांतमहोदधिं ॥ प्रयुक्तं समाहितं शिष्यगुणैः प्रशा
न्तचित्ताय जितेंद्रियायेत्यत्रोक्तगुणैरमानित्वादयश्च भगवजोक्तैरन्वितमित्यर्थः ॥ ब्रह्मविद्येव
प्लवो ब्रह्मविद्याप्लवस्तेनेत्यर्थः ॥ स्वांतमंतःकरणं तदुपाधित्वेनोपाधीयमानो जीवो लक्ष्यते तस्य ध्वांत

मात्मस्वभावावरणानात्मविक्षेपलक्षणमनाद्यनिर्वाच्याज्ञानं तदेव महदुदधिरपर्यंतत्वात्तमित्यर्थः
॥२॥ कथमुक्तलक्षणो गुरुरुक्तलक्षणं शिष्यं सम्यग्ज्ञानेन सद्यः संसारसागरं तारयेदित्यपेक्षायां प्रथ
मं पदार्थविवेकं कारयित्वा वाक्यार्थज्ञानोपदेशेनेत्यभिप्रेत्य संक्षेपतः पदार्थविवेकमाह ॥ दृष्टिस्पृ
ष्टिरिति ॥ दृष्टिः स्पृष्टिः श्रुतिर्घ्रातिर्मतिर्विज्ञातिरेव च ॥ शक्तयोऽन्याश्च भिद्यंते चिद्रूपत्वेऽप्युपाधि
भिः ॥५५॥ अन्याश्च रसयतिमल्लिंगस्याघ्राश्च शक्तयश्च इत्यर्थः ॥ एता दृष्ट्यादिशक्तयो यद्यप्यखंडचि
द्रूपा एव तथापि तत्तदिंद्रियद्वारकबुद्धिवृत्तिभेदोपाधिभिर्भिद्यंते न वस्तुतो भेदोऽस्तीति तत्तद्वृत्ते
रुपरित्यागेन सर्ववृत्तिसाक्षितयाऽनुगतप्रकाशस्वभाव एवात्मा त्वंपदार्थ इति प्रथमं ग्राहयेदि
त्यर्थः ॥५५॥ कथमुपाधिभिरेव विच्छिन्नः स्वरूपत एव भेदो यथानुभवमस्त्विति चेन्नैवमात्मनो वि
१५४ कारित्वापत्तेः कल्पनागौरवाच्छ्रुत्यभिप्रेतदृष्टांतेनाखंडरूपतां साधयति ॥ अपायेति ॥ अपायो वृत्तिही
नानि वै स्वस्वरूपेणैतैर्निःसंधिरप्यन्वियथा ॥ सर्वज्ञः सर्वदृक्शुद्धः सर्वं जानाति सर्वदा ॥५६॥ अपायोऽपायविरया १५५
यो वृत्तिहानानि च स्वस्वरूपेण तत्तद्विच्छिन्नास्तत्तद्बुद्धिवृत्त्युपाधिभेदात्तद्भिन्नाभिन्नाः सर्वं विषयजातं वि

शेषतो जानाति ॥ सर्वदा सर्वदृक्सामान्येनापि सर्वं पश्यन्नास्ते यतः सर्वदृक्स्वाधिष्ठानत्वेन सर्वाम
विचारी तस्माच्छुद्धो निर्विकार इति योजना ॥५५॥ यद्येवमुक्तलक्षण आत्मा कथं तस्य संसारोपलब्धिरि
त्यपेक्षायां दृष्टिं निर्वासितुमाह ॥ अन्यदृष्टिरिति ॥ अन्यदृष्टिः शरीरस्थस्तावन्मात्रोऽस्यविद्यया ॥ जलेंदु
पमानि स्वतंत्रधर्मांश्च विभाव्यते ॥५६॥ अविद्यया शरीरस्थः स्थूलसूक्ष्मशरीरयोरेवोपलभ्यमानत्वात्त
त्र वर्तमानस्तावन्मात्रः शरीरं यावत्तावन्मात्रोऽहमिति मन्यमानोऽन्यदृष्टिर्देहबाह्यमात्मव्याप्तत्वात्मदृ
ष्टिस्तत्तद्धर्मैरात्मनो धर्मवत्त्वदृष्टिरपि सम्परिच्छिन्नः संसारीव चावभासत इत्यर्थः ॥ एतदेव दृष्टां
तेन स्पष्टयति ॥ जलेंद्विति ॥ यथा चंद्रादिर्जले प्रतिबिंबितो जलोपाधिभेदाद्भेदवानिव जलकंपादि
मानिव चाविवेकादेव विभाव्यते तथैवात्मा निरुपमानि स्वधर्मैर्युक्त इत्यर्थः ॥५६॥ तदेवमुपाधिपराम
र्शमंतरेणात्मनि भेदं संसारादि चानुपलंभादुपाधीनां चात्मनो बहिःस्वातंत्र्येण सत्तायां प्रमाणाभावा
द्विद्यामयत्वे सति निःसंगः शुद्धः परिपूर्ण एवाद्वितीयोऽयमात्मेत्यवांतरवाक्यैरवधारिते आत्मैव सत्यज्ञानादि
लक्षणं ब्रह्मेति महावाक्येनाचार्याद्वगतात्मतत्त्वो मुमुक्षुरवस्थात्रयात्मकस्यैव सर्वदृक्त्वात्तद्योहे

नतत्साक्षितयातदधिष्ठानतयाचाव्यभिचारिचिदेकरसं ब्रह्मात्मेति स्वानुभवमापादयन्नुच्यतइ
त्यतिप्रेत्यानुसंधानप्रकारमाह॥ दृष्ट्वेति॥ दृष्ट्वा बाह्यं निमील्याथ स्मृत्वा तत्प्रविहाय च॥ अथोन्मी
ल्यात्मनो दृष्टिं ब्रह्म प्राप्नोत्यनधुग॥५७॥ बाह्यं जागरितं पंचीकृतपंचमहाभूततत्कार्यात्मकं समष्टि
व्यष्टिरूपं सर्वं विषयजातं दृष्ट्वा दृष्टं दृश्यान्वयव्यतिरेकाभ्यां कार्यकारणान्वयव्यतिरेकाभ्यां चा
लोच्य निमील्य दृश्यं तत्सर्वं दृष्टमात्रत्वेन कार्यं सर्वं कारणभूततन्मात्रत्वेन विलाप्येत्यर्थः॥ स्थि
त्यानंतरं स्मृत्वा जाग्रद्दृष्टवासनाकार्यं स्वप्नदर्शनं स्मृतिस्तां स्मृत्वा विमृश्य वैश्वानरसहितं स्थूलोपा
धितद्वासनामये लिंगे सूक्ष्मभूतसहिते प्रविलाप्य वासनामयं स्वप्नमात्रमेव तदित्यनुसंधायेत्यर्थः॥
तदपि लिंगशरीरं वासनामयं प्रविहाय च वासनासहितस्य मनःप्राणेंद्रियसंघातस्यापि तत्कारणपं १५५
चतन्मात्रादनतिरेकात्तावन्मात्रेण प्रविलाप्य तेषां चोत्पत्तिक्रमवैपरीत्येन तत्कारणसामान्यज्ञान १५५
मात्रत्वेन प्रविलाप्यावस्थानं तद्विहानं तत्कृत्वेत्यर्थः॥ अथानंतरं सुषुप्तौ बीजात्मकमज्ञानमात्रय
दुर्वेरितं तदपि सदसत्त्वभिन्नाभिन्नादिप्रकारनिरूपणासहत्वाद्धिंबांधपरिकल्पितांधकारवद्यत्किं

चिदिति विवेकेन बाधित्वात्मनः सर्वावस्थासाक्षितयानुस्यूतसच्चिदानंदमात्रस्य दृष्टिं ज्ञान
प्रकाशस्वरूपामुन्मील्य निरुपाधिकां लब्ध्वा स्थितो ब्रह्म प्राप्नोति स स्वज्ञानादिलक्षणं ब्रह्मैव भव
तीति यावत्॥ अनधुगोऽविरादिक्रमध्यानेन प्राप्नोति ब्रह्मण आत्मत्वाभ्यासायत्ता ब्रह्मप्राप्ति
रित्यर्थः॥५७॥ अनधुगो ब्रह्म प्राप्नोतीत्युक्तमेव विशदयन्निरूपचरितैवास्य मुक्तिर्नैवापि सव
स्यैवायं हि वीतिघोतयति॥ प्राणादीति द्वाभ्यां॥ प्राणाद्येवं त्रिकं हित्वा तीर्णोऽज्ञानमहोदधिं॥
स्वात्मस्थो निर्गुणः शुद्धो बुद्धो मुक्तः स्वतो हि सः॥५८॥ सुषुप्तादीत्यर्थः॥ स्वात्मस्थो नाविरादिमार्गस्थः
यतो निर्गुणः स्वात्मनि प्रविलापितसर्वसगुणद्वैत इत्यर्थः॥ शुद्धो निरुपाधिकोऽतः स्वतः स्वभावत एव मुक्त
इत्यर्थः॥५९॥ अजोऽहमिति॥ अजोऽहं चामरोऽमृत्युरजरोऽमृत एव च॥ सर्वज्ञः सर्वदृक्छुद्ध इति बुद्धो न जायते॥
॥६०॥ एवं विधोऽहं ब्रह्मास्मीति यो बुद्धोऽज्ञाननिद्राया निर्गतः स न जायते॥ पुनः शरीरं न गृह्णातीत्यर्थः॥
॥६१॥ प्रबुद्धस्य पुनर्जन्माभावे हेतुमाह॥ पूर्वेत्यमिति॥ पूर्वोक्तं यत्तमो बीजं तन्नास्तीति विनिश्चयः॥ तद
भावे कुतो जन्म ब्रह्मैकत्वं विजानतः॥६२॥ सुषुप्तावाहं तमोऽज्ञानमित्यादिना यत्पूर्वोक्तमज्ञानं तत्तत्कालत्र

ऽपि नास्तीति विनिश्चयः अस्मिन्नपि काले ऽसतो ज्ञानमात्रात्तिरोधानासंभवात् तस्य तु ज्ञानोदयमात्र एव
तिरोधानान्मुक्तिरनंतरवर्तिन्यर्थः ॥ तदभाव इति कारणाभावात् कार्याभाव इत्यर्थः ॥ इदं ब्रह्मास्मीति
त्मोनं साक्षात्स्वरूपतोऽपि सर्वं वध्यं वहो दर्शनात् तत्तद्धर्माधर्मनिबंधनं पुनः शरीरग्रहणं स्यादिति शंकां
बाधितानुवृत्तिमात्रत्वात् ज्ञानिनो व्यवहारस्य न तन्निबंधनः पुनः शरीरग्रहणादिसंसार इति ह्युक्तं
सर्वकर्माद्यहीरादिति ॥ हीरात्सर्पिर्यथा दृष्टं हि तस्मिन्न सर्ववत्तत्क्षुधादेर्जलस्तथा ऽसस्मान्न देहोऽस्
र्वं वक्ष्यते तद्यथा ॥ यथा सर्पिर्नवनीतं हीरादुपायेनोद्धृतं तस्मिन्नेव निःसारीकृते हीरे हि स न सर्वं स्
विविक्तं न भवति तथाऽसस्मात् क्षुधादेः संघातात् प्रथममात्मा विविक्तो ज्ञानमात्ररूपेणोद्धृतो ब्रह्माहमस्मी
ति वाक्यादवगतब्रह्मभावः सर्ववस्तु न देहादिद्वयसंघातात्मिमान् स्वतस्तस्मिन्विद्यमानोऽपि न स्वे
१५६ त्यर्थः साहंकारस्य हि कर्मबंधहेतुर्न निरहंकारस्य तथा चोक्तं भगवता ॥ यस्य नाहंकृतो भावो बुद्धि
र्यस्य न लिप्यते ॥ हत्वापि स इमांल्लोकान्न हंति न निबध्यत इति ॥ २ ॥ पदार्थपरिशोधनपूर्वकं वाक्याद
हं ब्रह्मास्मीति प्रतिबुद्धस्य पुनः संसारभयशंका नास्तीत्युक्तेऽर्थे आनंदं ब्रह्मणो विद्वान्न बिभेति कुत

श्चनेति श्रुतिमर्थतः पठति ॥ सत्यं ज्ञानमिति ॥ सत्यं ज्ञानमनंतं वरसादेः पंचकोशरमूः ॥ स्यामहमस्या
दिन्याश्रोऽकोऽमहं ब्रह्मेति ॥ निर्जन्यमंदर रसादेरन्नमयप्राणमयमनोमयविज्ञानमयानंदमयाख्यकोश
पंचकोशरं तदाधारतत्त्वं ब्रह्म पुच्छं प्रतिष्ठेति निर्दिष्टं यत्तदेवाहं स्वरूपेणात्मा निरुक्तोऽनिलयनेऽप्र
तिष्ठं विंदत इति श्लोकार्धं ब्रह्माहं स्यामस्मीति यत्स्वरूपं निश्चयो न भवतीति योजना ॥ दुरत्ययं कारण
मपि तत्ययं करब्रह्मात्मनस्तत्त्वस्य कुतोऽपि भयशंका का क्वापि इति ब्रह्मज्ञस्य पुनः संसाराभावमुक्तं दृढयति
॥ यस्माद्धीति ॥ यस्माद्भीताः प्रवर्तंते वाग्वह्निः पावकादयः ॥ तदानंदं तत्त्वज्ञो न बिभेति कुतश्च
नेति ॥ ३ ॥ यद्धि वाग्निपावकादय इति पाठस्तत्र इनः सूर्यः आदिपदादिंद्रमृत्यू गृह्येते ॥ तथा
च श्रुतिः ॥ भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति ॥ वा
ग्वह्निः पावकादय इति पाठे आत्मं वागादयोऽधिदेवमग्न्यादयश्च यस्माद्भीताः प्रवर्तंत इत्यर्थः ॥ तथा
च श्रुतिः ॥ केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः ॥ केनेषितां वाचमिमां वदंति च
क्षुः श्रोत्रं क उ देवो युनक्ति ॥ भयादस्याग्निस्तपति भयात्तपति सूर्यः ॥ भयादिंद्रश्च वायुश्च

DR BHAU DAJI

मृत्युर्धीवति ... मा इति॥ ६२ ननु विदुषोपि हरिहरहिरण्यगर्भादीनां नमस्कार्यत्वात्तदतिक्रम
भयसंभवात्कार्यशेषो विद्यत इति चेन्न। स ह॥ नामादिभ्य इति। नामादिभ्यः परे भूम्नि स्वाराज्ये चे
त्स्थितो द्वये॥ प्रणमेत्कं तदात्मज्ञानी कार्यं किमेव तदा॥ ६३ नाम वाङ्मन आदि प्राणान्तेभ्य उत्त
रोत्तरभूयस्त्वेन श्रुतेभ्यः परे परस्मिन् भूम्नि सर्वव्यवहारातीते ऽमृतत्वरूपे ऽद्वये स्वे महि
म्नि स्वाराज्ये ऽहमस्मि ब्रह्माहमस्मीति व्यवस्थितः आत्मज्ञो विद्वांस्तदा तस्यां दशायां गुणज्ञा
... कं प्रणमेत् प्रणम्यानामात्मत्वात् ... तेः परिपक्वे ज्ञानस्य हेतुत्वात् ... कर्मणा
किमपि कार्यमस्तीत्यर्थः॥ ६४ भूम्नो नामादिभ्यः परत्वेपि कथमद्वयत्वमित्यत आह नामा
२५७ दिरवस्थात्रयरूपस्याध्यस्तत्वेन मिथ्यात्वात्तत्साक्षिणस्तुरीयस्य भूम्नो ऽद्वयत्वमिति
वक्तुं प्रथममवस्थात्रयमनुवदति विराडिति। विराड् वैश्वानरो बाह्यः स्मरन्नंतः प्रजापतिः प्रवि
लीने नु सर्वस्मिन् प्राज्ञो ऽव्याकृतमुच्यते॥ ६५ आध्यात्माधिदैवतयोरभेदेन ... विराड्वै २५७
श्वानर इत्युक्तं विश्वं वैश्वानर इत्यर्थः॥ बाह्यो बहिःप्रज्ञ इत्यर्थः॥ अंतः स्मरन्निति स्वप्ने वासना

मयविषयद्रष्टा प्रजापतिर्हिरण्यगर्भस्तैजस इति योज्यं॥ अव्याकृतं मायोपाधिरीश्वराद्वैतत्वेन
शेत इत्यर्थः॥ एतदवस्थात्रयात्मकं जगद्यो यतस्तत्साक्षिणं वस्तुतत्त्वस्याहं ब्रह्मेति सम्यग्ज्ञाना
न्मुक्तो भवतीत्याह॥ वाचेति। वाचारंभणमात्रत्वात्तु प्राज्ञादित्रिकं त्वसत्॥ सत्यो ऽहं ब्रह्माहमित्येवं सत्य
संधो विमुच्यते॥ ६६ प्राज्ञः साक्षी सत्यः परमात्मा सो ऽहमेवेत्येवं सत्यसंधो ऽनायासेन मुच्यत इत्यर्थः॥
६७ आत्मतत्त्वाज्ञानाद्बद्धस्तु संसारस्तज्ज्ञानान्निवर्तत इत्युक्ते ज्ञानाज्ञानयोरात्मधर्मत्वं स्यादिति सा
शंक्य दृष्टान्तेन परिहरति। नारूपत्वादिति। नारूपत्वाद्यथा भानोर्नाहोरात्रे तथैव च। ज्ञानाज्ञाने न
मे स्यातां चिद्रूपत्वाद्विशेषतः॥ ६८ ज्ञानाज्ञानयोरपि सापेक्षत्वात्कल्पितत्वे सति नात्मधर्मत्वमि
ति भावः॥ ६९ आत्मनो निर्विशेषत्वाच्छास्त्रप्रामाण्यादेरसिद्धेर्नात्र युक्तिकल्पनया मनः खेदनी
यमित्युपदिशन्नेवाह॥ शास्त्रस्येति। शास्त्रस्यानतिशंक्यत्वात् ब्रह्मैवास्मि सदा॥ ब्रह्मणो मे न देयं सा
ध्यं चेति वसन् स्मरेत्॥ ७० किं तद्ब्रह्मपरं शास्त्रं किं वा सर्वदा ऽद्वैतानुकारः यद्ब्रह्मात्मज्ञाननिष्ठस्य
फलमित्यपेक्षायां यस्तु सर्वाणि भूतानीत्यादिमंत्रार्थमुदाहरति। अहमेवेति। अहमेव च भूतेषु स

वैधर्म्येण न स्तो यथा॥ मयि सर्वोऽस्मिन्नेतानि पञ्चपञ्चैवं न जायते॥ द्वयस्य सृष्टं॥ द्वयम् आत्मनो द्वितीयब्रह्मरूप
त्वे शास्त्रमर्यन्तेऽहंकारस्य निर्विशेषब्रह्मरूपत्वे उदाहरति॥ न बाह्यमिति॥ न बाह्यं मध्यतो वा न विद्यते न
स्वतः कुत्रचित्॥ अबाध्यां नः श्रुते किंचित्तस्मात् कुतः स्वयं ज्ञानं॥७०॥ तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबा
ह्यमयमात्मा ब्रह्म सर्वानुभूरिति श्रुतेरित्यर्थः॥ सर्वानुभूरित्यस्यार्थः॥ स्वयं ज्ञानं इति॥७० सामान्येन सर्वा
पंच संस्पर्शरहितत्वे श्रुतिमुदाहरति॥ नेति नेति॥ नेति नेत्यादि शास्त्रेभ्यः प्रपंचोपशमोऽद्वयः॥ अविज्ञे
ता हि शास्त्रान्नैव ज्ञेयोऽवत्तोऽन्यथा॥७१ अयं च निषेधद्वारेणैवात्मा विज्ञेयो न तु न विषयतया स्वप्र
पंचतयाचेत्यत्रान्यदेव तद्विदितादथो अविदितादधि। यस्यामतं तस्य मतं मतं यस्य न वेद सः॥
१५८ अविज्ञातं विजानतामित्यादिशास्त्रमुदाहरति॥ अविज्ञाताऽरीति॥७२ तस्मादेषां तन्न प्रियं यदेतन्मनुष्या
विदुरिति श्रुतेरेवमद्यादि नैतेहोऽमात्मानं जानतो देवाः फलस्थाहिं विघ्नं तीतिवेन्मेवं॥ देवानामप्य १५८
तमत्वाद्विदुषो विघ्नकर्तृत्वविद्विषयत्वाहितस्यान्निबेस्याह॥ सर्वस्येति॥ सर्वस्यात्माहमेवेति ब्रह्म
वेदिहितेयरे॥ स आत्मा सर्वभूतानामात्मा ह्येषामिति श्रुतेः॥७२ तस्य ह न देवाश्चनाभूत्या ईशते।

त्मा ह्येषां स भवतीति श्रुतेरित्यर्थः॥७२ एवं ब्रह्मात्मज्ञानवतो देवैरप्ययास्यत्वसिद्धेर्नेतस्य देवपशु
त्वशंकापीस्यत्तो न कुर्यादिति॥ अयमस्तीत्यत्र श्रुतिश्रुतेरैमर्थनः पवति॥ जीवश्च इति॥ जीवश्चेत्पर
मात्मानं स्वात्मानं देवमंजसा॥ देवोपास्यः स देवानां पशुत्वाच्च निवर्तते॥७३॥ यद्देवमनुपश्यत्यसा
त्मानं देवमंजसा॥ ईशानं भूतभव्यस्य न ततो विजुगुप्सते॥ सर्वेऽस्मै देवा बलिमावहन्तीति॥ तमेवं वि
द्वानमृत इह भवतीति च श्रुतेरित्यर्थः॥७३ यदुक्तं सत्यसंधो विमुच्यत इति तत्स्फुटयत्यहे स्फु
मेवेति॥ अहमेव सदात्मज्ञः श्रुत्यसत्वमेवथ्यांबरं॥ इत्येवं सत्यसंधत्वाद्धेस्फूर्तानबध्यते॥७४
सदात्मा चासौ ज्ञश्चेति सदात्मज्ञः तत्सत्यं स आत्मेति श्रुतिरिहोदाहरणं॥ अन्येऽप्यनृस्य इति वाचारं
णश्रुत्यर्थो दर्शितः॥ यथांबरमिति द्रव्यसंसर्गभावत्वात्कुड्यद्रव्यस्यत्र दर्शितोक्तिः॥ अथ सद्धातान्तता
निसंधिरहितोऽतस्कर इव न बध्यते बंधानर्थहीनो भवति स यथात्र नादह्येत तदृतं हात्म्यमिदं सर्व
मित्यादिश्रुतिरिहोदाहार्याः॥७४ एवं विधज्ञानानां वाहितरे यश्च भूताः ज्ञो न्यानवंतीति दर्शय
न्नेथयेत्यथा सोऽविदुरन्यराजानस्तेह पालोकान् वंतीति श्रुत्यर्थमाह॥ हयणा इति॥ हयरा

त्तेऽन्यथैवातो विदुश्रेयस्परं हि ये। स्वराड्योऽनन्यदृक्स्वस्थस्तस्य देवा असन्वशे॥ ७४ ये परं ब्रह्मा
तोऽन्यथैवोक्तेर्वैपरीत्येनानात्मभूततया विदुस्ते हीनकृपणाः क्षोभ्या एवेति योजना॥ अनेन दृढनीत्तु
३ए नक्तपर्यस्याह॥ स्वराडिति। एवं विज्ञानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड्भव
तीति श्रुतिरिहोदाहरणं तस्य सर्वेषु लोकेषु कामचारो भवतीति श्रुत्यर्थमत्र नागोदाहरणं न द्योतय
ति। तस्येति। आसन्निति सर्वे असन्निति छांदसं यस्त्वेवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे इति मंत्रो
स्यायमर्थः॥ यस्त्वेवं ब्राह्मणो ब्रह्मनिष्ठ एवं वेदाहमेतं पुरुषं महान्तमिति तत्प्रकारेणात्मात्मानं विद्या
१५५ त्तस्य विदुषो देवा वशगा भवन्तीति॥ ७५ यस्माद्यथोक्तात्मज्ञानादेव लतं तत्प्राप्यते तस्मात्तु मुमुक्षुणा तदर्थं
यत्नवता भवितव्यमिति तत्र छिद्यन्त्याह॥ हित्वेति॥ हित्वा जात्यादिसंबंधान्वाचोऽन्याः सह कर्मभिः
ओमित्येवं सदात्मानं सर्वं शुद्धं प्रपद्यथ॥ ७६ यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैस्तमे १५५
वैकं जानथ आत्मानमन्या वाचो विमुंचथामृतस्यैष सेतुः। ओमित्येवं ध्यायथ आत्मानमिति च वाक्यद्वयम
त्रोदाहरणं। अन्या वाचोऽनात्मविषयाः प्रवृत्तिपराः सर्वं सर्वाधारभूतं शुद्धं विविक्तं निर्विशेषमित्यर्थः॥

७६॥ तमेवं प्रतिपत्तव्यमात्मानं श्रुत्यन्तरेण विशिनष्टि॥ सेतुमिति। सेतुं सर्वव्यवस्थानामहो
रात्रादिवर्जितम्॥ तिर्यगूर्ध्वमधः सर्वं सकृज्ज्योतिरनामयम्॥ ७७ सर्वव्यवस्थानां वर्णाश्रमादिमर्या
दानां सेतुं विधारकं॥ अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदायनैनं सेतुमहोरात्रे तरतः
स सकृद्विभातो ह्येवैष ब्रह्मलोक इति श्रुतिरत्रोदाहरणं॥ ७७ पुनः किंलक्षणमात्मानं प्रपद्यते इत्यपेक्षा
यामाह। न्यत्र धर्मादन्यत्रास्मात्कृताकृतादन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति श्रुत्यर्थमाश्रि
धर्माधर्मेति॥ धर्माधर्मविनिर्मुक्तं भूतभव्यात्कृताकृतात्॥ स्वमात्मानं परं विद्याद्विमुक्तं सर्वबंधनैः॥ ७८
कृताकृतात्कार्यकारणादित्यर्थः॥ ७८ ननु कथं सर्वबंधनैर्मुक्तमात्मानं स्वकर्तृत्वादिश्रवणादित्याकर्तृ शंक्य।
त्वादेरपि सहेतुकत्वश्रवणाद्विरुद्धो न यस्स्वभावस्येह क्रियायोगात्स्वभावप्राप्तं कर्तृत्वादिकं मायामयं प्रमा
णावधेयमकर्तृत्वादिकमात्मस्वभावभूतं विशेषमत्र सविरुद्धधर्मवादिनीः श्रुतीरुदाहरति॥ अ
कुर्वन्निति॥ अकुर्वन्सर्वकृच्छुद्धस्तिष्ठन्नत्येति धावतः॥ मायया सर्वशक्तित्वाद्रजःसन्बहुधा मतः॥ ७९
अनेजदेकं मनसो जवीय इति मंत्रनागार्थोऽकुर्वन्सर्वकृदित्युक्तः। शुद्धमपापविद्धमित्यस्यार्थः शुद्ध

इति॥तद्भावतोऽस्मान्तस्येति तिष्ठन्निस्यस्यार्थमाह तिष्ठन्निति॥धावतो वेगवतोऽन्यानात्मनः प्राणादीनस्येति अत्ये
ति गच्छति यत्र मनःप्राणादि गच्छति तत्र सर्वत्रात्मा चैतन्यस्याभिव्यक्तिनियमाभावात्तिष्ठन्नपि गच्छतीवाभा
सत इत्यर्थः॥अजायमानो बहुधा विजायते इति मंत्रार्थमाह अजः सन्बहुधा मत इति॥सर्वत्र हेतुर्माययाऽसर्व
शक्तित्वादिति॥न हि मायायामसंभावनीयमस्तीति भावः॥२७॥अक्रियस्यापि क्रियावत्त्वोपचारमुक्तं दृष्टांते
न प्रपंचयति॥राजवदिति॥राजवत्सान्निध्यमात्रत्वात्सान्निध्यात्क्रमको यथा॥आमयन्नगदात्मा द्रुतिः क्रिये
ऽकारकोऽद्वयः॥२८॥स्पष्टं॥यस्मादेवमात्मा स्वतो नित्यशुद्धत्वादिस्वभावः शास्त्रन्यायाभ्यामवगतस्तस्मा
१६७ त्तं तथैव जानीयान्नान्यथेत्युपसंहरति॥निर्गुणमिति॥निर्गुणं निःक्रियं नित्यं निर्द्वंद्वं यन्निरामयं शुद्धबु
द्धं तथा मुक्तं तद्ब्रह्मास्मीति धारयेत्॥२९॥नैते श्लोकेऽपुनरुक्तदोषावहं॥यतः प्रतिपाद्यवस्तुनो दुर्बोध
त्वान्मुमुक्षूपकाराय कारुणिक आचार्यः कंचिच्छास्त्रतः कंचित्स्वलक्षणेन च विविधदृष्टांतैरनेन १६७
पुनः पुनः प्रतिपादयति॥न्यायोऽपि पर्यवसन्नमिति न्यायात्॥३०॥उक्तप्रकरणार्थं प्रतिपत्तिसौकर्यार्थं
संक्षिप्य कथयति॥बंधमोक्षमिति॥बंधं मोक्षं च सर्वं यत्तद्द्वंद्वमुत्पन्नं हेयमेकं द्वयं च ज्ञेयं ज्ञेयान्यतोऽतं प

परममधिगतं तत्त्वमेकं विशुद्धम्॥विज्ञायैतद्यथावद्व्युत्पत्तिमुनिगदितं शोकमोहाद्व्यतीतः सर्वज्ञः स्या
ज्जगन्नयरहितो ब्राह्मणो वा कृतार्थः॥३१॥बंधमोक्षं च सर्वं यथावद्विज्ञाय जगन्नयरहितः स्यादित्य
न्वयः॥बंधः प्रमातृत्वकर्तृत्वादि प्रतिभासलक्षणः मोक्षो ब्रह्मस्वरूपावस्थानं सर्वमिति निःशेषं सर्वा
तोऽप्रकारमित्यर्थः॥इदमुक्तं बंधमोक्षं च यतो हेतोरज्ञानात्तज्ज्ञानाच्च भवतः तेऽपि विज्ञायेति सर्व
धः॥तथा एकमनुवृत्तं कारणं द्वयं मानृत्वं कार्यं च यत्तज्ज्ञेयं विषयत्वं तत्सर्वं हेयं बाध्यं विज्ञायेत्यन्वयः॥
ज्ञेयान्यतोऽतं द्वयात्संप्रकृतं परमं निरतिशयं विशुद्धमेकं ब्रह्म यद्वेदांतेष्वधिगतं तत्त्वं परमार्थं तद
पि यथावद्विज्ञायात्मत्वेनोपादाय किं लक्षणं श्रुतिमुनिगदितं श्रुतिवाक्येन मुनिना गुरुणोपदिष्टमित्यर्थः॥
एवमात्मानात्मतत्त्वं ज्ञात्वाऽनात्मापोहेनात्मतत्त्वनिष्ठः शोकमोहाव्यतीतः स्यात् तत्र को मोहः कः शोक एक
त्वमनुपश्यत इति श्रुतेः॥सर्वं हि ब्रह्म तज्ज्ञानात्सर्वज्ञः स्यात्सर्वं स्वात्मन्येक करोतीति सर्वकृत्स्यात् तथा
च मुक्तविषया श्रुतिः अहं विश्वं भुवनमभ्यभवामिति हेर्भगानार्थं अस्मात्वमानकृतवानात्मसात्कृतवानस्मी
ति श्रुत्यर्थः॥जगन्नयरहितं न बिभेति कुतश्चनेति श्रुतेः॥ब्राह्मणो मुख्यया वृत्त्या ब्राह्मणः ऋषिधेयः अमा

नैव निर्विघ्नाय ब्राह्मण इति॥ अथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मण इति श्रुतेः॥ अ-
तत्त्वतः प्राप्तः सर्वक्रियाफल इत्यर्थः। सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति श्रुतेरित्यर्थः॥ एव-
मात्मानं जानतः कृतकृत्यत्वमुक्तं ध्वनयति॥ न स्वयमिति॥ न स्वयं स्वस्य नान्यस्य नान्यस्यात्मा च हेयगः उपादे-
यो न चाप्ययमिति सम्यङ्मतिः स्मृता॥ स्वयमात्मा स्वस्य न हेयगः स्वरूपत्वात् कोऽपि पतितो न चाप्युपादेयः
एकस्मिन्कर्मकर्तृत्वासंभवात्स्वरूपस्य स्थितौ नाशो वा स्वविषयहानोपादानयोरसंभवात्तथान्यस्य
न स्वस्य हेयगोऽद्वैतेऽन्यस्यैवाभावात्तेनाप्युपादेयोऽत एव तथान्यस्यापि स्वयमुपादेयो हेयगो वा न भ-
वत्यात्मांतराभावादनात्मनश्च बाधितत्वाद्द्वैतन्याच्चेति योजना॥ इत्येवं या निष्ठा सा सम्यङ्मतिः स-
१६१ म्यग्ज्ञानमतो ब्रह्मविद्भिरित्यर्थः॥ उक्तरूपस्यैतन्मैकरसपूर्णवस्तुनि हानोपादानयोरसंभवान्निरा-
सं परं ब्रह्मैवास्मीत्येवं विधाया धियः सम्यङ्मतित्वे हेतुमाह॥ आत्मप्रसादिकेति॥ आत्मप्रसादि-
कास्येषा सर्ववेदांतगोचरा॥ ज्ञात्वैतां हि विमुच्यंते सर्वसंसारबंधनैः॥ आत्मानं ब्रह्मत्वेन प्रसादयती-
त्यात्मप्रसादिका हि यस्मादेषा मतिः स्यात् नु न वस्तित्वेति वा॥ सर्ववेदांतगोचरेति प्रमाणमुक्तम्

मस्यान्दर्शयति॥ एतां ज्ञात्वा लब्ध्वा सर्वसंसारबंधनैर्विमुच्यंते मुक्ता भवंतीत्यर्थः॥ तथा च
भगवद्वचनं॥ इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ॥ एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भा-
रतेति॥ प्रकरणोक्तं ज्ञानमिदानीं प्रशंसन्नस्योपादेयत्वं द्योतयति॥ रहस्यमिति॥ रहस्यं सर्ववेदा-
नां देवानां चापि यत्परं॥ पवित्रं परमं ह्येतत्तदेतत्संप्रकाशितं॥ रहस्यमुपदेशव्यतिरेकेण वि-
ज्ञेयं आचार्यवान्पुरुषो वेद सर्वे वेदा यत्पदमामनंतीति च श्रुतेः॥ देवैरत्रापि विचिकित्सितं पुरा न हि
सुविज्ञेयमणुरेष धर्म इति श्रुतेः॥ देवानां चापि रहस्यमित्यर्थः॥ परं सर्वोत्तमं पवित्रं पावनं क्षी-
यंते चास्य कर्माणि एवं विदित्वा पापं कर्म न लिप्यत इत्यादिश्रुतेः॥ हि यस्मात्परमं परमार्थरूपं
निरतिशयानंदप्रकाशमिति यावत्॥ यदेवंरूपं सम्यग्ज्ञानं तदेतत्सम्यक्प्रकाशितं प्रकटीकृत-
मस्मिन्प्रकरण इत्यर्थः॥ एतस्य गोपनीयत्वं सूचयति॥ नैतद्देयमशांताय रहस्यं ज्ञा-
नमुत्तमं॥ विरक्ताय प्रदातव्यं शिष्यायानुगताय च॥ इदं य ~~सौदैवं [illegible]~~ दास्य

BHAU DAJI

दुर्विज्ञेयत्वेन दुर्धरत्वात्तत्कारणसमर्थमधिकारिणं विशिष्य तन्निधिक्रारिणो विवेचयति ॥ नेतद्दृश्यमिति ॥ नद
यस्मादेवं लक्षणज्ञानदश्चाचार्यः कृतकृत्यो न प्रलोभादिना ज्ञानं प्रयच्छति तस्मान्मुमुक्षुरमानित्वादिशि
ष्यगुणयुक्तः स्यात् यथाचार्यः कृपया विद्यां दद्यादित्येतमर्थमाह ॥ इदं तच्छ्रेति ॥ इदं तत्स्यात्मनो ज्ञानं निःश्रे
योऽस्मान्न विद्यते ॥ ज्ञानमिच्छन्स्तरेत्तस्माद्युक्तः शिष्यगुणैः सदा ॥ ८७ ॥ न विद्यते यस्मादिति येऽयं तस्मा
च्छिष्यगुणैः सदा युक्तो ज्ञानमिच्छन्संसारदुःखं तरेत्संसारमिति शेषः ॥ ८७ ॥ आदावेवोपसंहारेऽपि देव
ताचार्यनमस्कारो तत्कृतो विघ्नप्रशांतरं गत्वस्थापनाय कार्यो वृत्तिरित्युपदर्शयति ॥ श्लोकद्वयेन ज्ञान
१६२ मित्यादिना ॥ ज्ञानं ज्ञेयं तथा ज्ञाता यस्मादन्यन्न विद्यते ॥ सर्वज्ञः सर्वशक्तिर्यस्तस्मै ज्ञानात्मने नमः
८८ ज्ञानात्मने चित्स्वरूपायेत्यर्थः ॥ ८८ ॥ विद्येति ॥ विद्यया तारिता स्मो येऽजन्ममृत्यु १६२
महोदधिं ॥ सर्वज्ञेभ्यो नमस्तेभ्यो गुरुभ्योऽज्ञानसंक्षयं ॥ ८९ ॥ इति सम्यङ्मतिप्रकरणं
॥ ॥१०॥ अज्ञानसंक्षयमिति छेदः ॥ ॥८९॥ इति सम्यङ्मतिप्रकरणस्य ब्रह्मचर्मविवृतं ॥१

पूर्वस्मिन्प्रकरणे ब्रह्मात्मविषयमपरोक्षज्ञानं वेदांतेभ्यो भवतीत्युक्तं ॥ तदयुक्तं वेदांतानामपि स्व
र्गकामादिवाक्यवत् परोक्षज्ञानजनकत्वात् ततोऽपरोक्षज्ञानाय प्रसंख्यानमेष्टव्यमिति केचिदाहुस्तेऽपि
द्रिरेतन्मतनिराकरणेन पूर्वोक्तं सर्वं स्वसिद्धांते श्रोतमुपपत्तितः स्फुटमुपपादयितुं प्रकरणांतरं
मारभमाणो देवतानमस्कारमाजनोति ॥ करणहस्तितावां भावसाक्षिणं कूटस्थे विदेकतानमेवाप
त्मानं नित्यापरोक्षे वेदांतास्मस्मेति प्रतिपादयंतो न परोक्षं ब्रह्मसमर्पयंतीति सर्वं स्वानुभवकरणं
तिपादयिष्यति ॥ येनेति ॥ येनात्मना विलीयंते उद्यंति च ह्युत्तयः ॥ नित्यावगतये तस्मै नमो धी
पृ ४ प्रसवात्मने ॥ १ ॥ वृत्तयो धीपरिणामाः स्वात्मात सर्वस्मिन्निवात्मनायेन चैतन्यमूर्तिः स्वरूपेण विलीयं
ति ॥ सुषुप्तिस्वर्गव्यवस्थांतरेऽपि वर्तिव विहारात्मभावात्संस्फूर्तिः ॥ प्रत्ययात्मसात्मनास्वयं तिष्ठतस्तेप्रत्या
त्मने तस्मै आत्मसाक्षिणात्मनाये त्यर्थः ॥ नित्यस्य भासा वावगतिश्चेति विग्रहः ॥ १ ॥ इदानीं खान्यप्य
सेवि विज्ञासा यस्यावाप्त्यंगुलां ग्रह समेतपूर्वकं संकरायशुद्धिं कथयति ॥ प्रमाणं वज्रोपमयुक्ति
संभतोऽहं तेरत्नतीर्थस्य मोक्षव्याप्तिस्तिनिर्मरक्षवेद्यविज्ञानधीनिर्धिनमोबोधदयुपरागरागसे ॥ २

संन्नेते रम्भद्रतयः घटितेः श्रुते वैचोसि निर्वेदांतवाक्यरूपनिर्दिष्टे रोरनानीन्नेरतद्भारणवासिनोः
द्रुतरत्नापहारिणः राञ्जूनः मघ्यसम्यक्समुन्मूल्य योविद्वान्सधीरप्रतिहतदीर्घबुद्धिर्वेदांतमञ्जुषाग
तं निधिं निधीयतेऽस्मिन्निति सर्वमिति नि.धेरद्वयं ब्रह्मात्मतत्त्वं रत्नं तस्मै यती शायगुरोर्गरीय
से परमगुरवे नम इति योजना॥ एवं नमस्कारमाजेन प्रकरणार्थं स्वसंप्रदायप्रसिद्धं वोक्त्वा
तत्त्वमस्यादिवाक्यादेवापरोक्षज्ञानमात्मनीति प्रकरणसिद्धांतं तावदाह॥ नित्यमुक्त इति॥
नित्यमुक्तः सदेवास्मीत्येवं चेन्न न वेन्मतिः॥ किमर्थं श्रावयत्येव मातृवच्छ्रुतिरादरात्॥३ सदेवाहम
स्मि वसदस्मिन्नित्यमुक्त इत्येवं चेत्तदपरोक्षामतिर्वेदांतवाक्यान्न भवेत्तर्ह्येवं सिद्धवन्निर्देशेन
तत्त्वमसीति श्रुतिः किमर्थं कस्मादादरात् आदरवती पुनः पुनर्मातेव पुत्रहिते श्रावयेदित्य
र्थः॥३ नित्यापरोक्षस्वभावात्मस्वरूपत्वाद्ब्रह्मणो वाक्यादेवापरोक्षज्ञानमारोपितानर्थनिवृ
तिफलमुत्पद्यत इत्यतश्चाह॥ सिद्धादेवेति॥ सिद्धादेवाहमित्यस्माद्युष्मद्धर्मो निषिध्यते॥ रज्ज्वामिवा
१५३ हिधीर्युक्त्या तत्त्वमित्यादिशासनैः॥४ अहमित्यस्मादहं ब्रह्मेत्यादपरोक्षतयाऽस्वतः सिद्धादात्मनः सका १५३

शाद्युष्मद्धर्मः परागर्थोऽहंकारादिस्तत्त्वमेमित्यादिशासनैर्युक्त्या सहितैः शोधिताथैरिति
यावन्निषिध्यते॥ अगृहीतपारोक्ष्यसद्वयत्वाकारविलापनेनात्मतत्त्वं प्रतिपाद्यत इत्यर्थः॥ स्व
रूपभातन्निवृत्तिहेतुरित्येतत्क्रमेण दृष्टांताभ्यां साधयति॥ शास्त्रेति॥ शास्त्रप्रामाण्यतो ज्ञेया
धर्मादेरस्तिता यथा॥ विषापोहो यथा ध्यानात्कृतिः स्यात्पापनस्तथा॥ ५ तथा ब्रह्मणएवा
त्मत्वेनास्तिता अनेन जीवेनात्मनानुप्रविश्य तत्त्वमसीति शास्त्रप्रामाण्यतो ज्ञेयेति दार्ष्टां
तिकं योज्यं ध्यानाद्गरुडादिमंत्रबीजस्मरणक्रियायोः हंसयोर्विषनिवृत्तिस्तद्वत्पाप्मनोऽवि
द्याद्यनर्थरूपस्य वाक्यादात्मतत्त्वावगममात्रेण सम्यग्एवाकृतिः ध्वस्तरूपा निवृत्तिः स्यादित्य
र्थः नानुवाक्योऽहं ब्रह्मास्मीति प्रत्ययवदहं करोमि इत्येयोनुभवसिद्धस्तत्र को हेतुरयमेवाप त्वपि सं
रेण बाध्यत इत्यत्रेति दृष्टांतेन॥ सद्ब्रह्माहमिति॥ सद्ब्रह्माहं करोमीति प्रत्ययावात्मसाक्षिकौ॥ तयो
रज्ञानजस्यैव त्यागो युक्ततरो मतः॥ ६ तत्र नियामकं हेतुं वदन्नुत्तरमाह तयोरिति॥ युक्ततरः

तस्यायमर्थः॥ यथा पूर्वप्रवृत्तया विनियोजकश्रुत्या पश्चात्प्रवृत्ता लिंगादयो प्राप्ता एव बाध्यंते
यथा वा पूर्वमेव प्रवृत्ते विकृतावतिदेशप्राप्तानामंगानां विकृतिगतविशेषोपदेशेन पाश्चा
त्येन बाध इति युक्तं वेष्य नियमो बाध्यबाधकयोः पूर्वापरीभावस्य न तथास्य न्यायस्येति युक्त
तर इत्युक्तमिति॥६॥ अत्र कः प्रमाणजः प्रत्ययः को वा ज्ञानज इति वीक्षायां विविच्य दर्शयति॥
सदस्मीति॥ सदस्मीति प्रमाणोत्था धीरन्यात न्निजोद्भवा॥ प्रत्यग्णैकात्म्यादिनिजा वापि बाध्यते
दिग्भ्रमादिवत्॥७॥ सदस्मीति धीस्तत्त्वमसीति निर्दुष्टवाक्यप्रमाणोत्था अन्या कर्ताहमित्या
दिधीस्तन्निजोद्भवा प्रमाणान्नास समुद्भूताः विवेकदोषात्संहितत्वादित्यर्थः॥ वाक्यजन्यज्ञान
स्यापि प्रत्यक्षाभासबाधकत्वं दृष्टं तेन बुद्धिमारोहयति प्रत्यक्षादीति॥७॥ ननु ब्रह्मास्मीति बुद्धि
वत्कर्तृत्वादिबुद्धेरपि सत्त्वं वद धर्मं चर सहितः सर्वो नोक्तेत्याद्युर्मनीषिणस्त्यादिवचनाच्छा
स्त्रसिद्धत्वं तुल्यमिति कथं तस्याः बाध्यत्वमित्याशंक्याह॥ कुरुतेनोक्तेनीति॥ कुरुनोक्तेतियच्छ

२

श्रु ४

स्त्रं लोकबुध्यनुवादित्वात्॥ सदस्मीति श्रुतेर्जाता बाध्यतेऽन्यैतदैव धीः॥८॥ ज्ञातास्त्रान्निज्ञा
नानंदलिङ्गसंगतहीनानामपि कर्तृभोक्ताऽहमस्मीति हृषियः सिद्धत्वात्तु वित्यादिशास्त्रं
लोकसिद्धार्थानुवादिना नधिगतार्थबोधकमित्यर्थः॥ सदस्मीति धीस्तु श्रुतेरनन्यसिद्धा
र्थायाः सकाशाज्जातेत्यर्थः॥ तस्मादेतयैव निरवकाशया सदस्मीति जातया धियैवान्या
सावकाशानुवादवाक्यजन्या बाध्यते बाध्यत एवेति वाक्यार्थः॥८॥ तदेवं वाक्यादेवापरोक्ष
ज्ञानमात्मविषयमुत्पद्यते तच्च निरपेक्षमेवानर्थनिवृत्तिहेतुः॥ इति स्वमतमुपन्यस्य
स्वपूज्यमतमुत्थापयति॥ सदेवेति॥ सदेवहमसीत्युक्तेनात्मनो मुक्तता स्थिरा॥ प्रवर्तते प्र
संचक्षामतो युक्त्यानुचिंतयेत्॥९॥ प्रसंख्यानं प्रसंख्यानेशब्दाद्दृष्टि युक्त्या सहाभ्यसेदित्यर्थः
॥ युक्तमेव साधयति॥ सकृदिति॥ सकृदुक्तेन [illegible] तिनजोनाति [illegible] त्यर्थस्तया॥

धा

ऽत एवान्यस्य हेतोरिन्नूतं वाक्यार्थज्ञोपि योऽनवेत्य। अपेक्षते। अत एवान्यदेवोच्यामव
यं हित ॥१७ योपि वाक्यार्थज्ञो वाक्यार्थं सहेतुकं न गृह्णाति न जानाति न सम्यक् प्रति
पद्यते यतोऽत एवान्यस्य हेतोरिन्नूतमपेक्षते यदपेक्षते तद्यं वाक्यानुचिंतनं युक्त्या
लोचनं च सर्वं श्लोके वयमवोचाम इत्यर्थः॥१८ न तु तत्र मस्याष्टिदिवाक्येषु विधिं नोपल
भामहे। ब्रह्मात्मनावस्थानं च स्वत एव सिद्धं मुमुक्षोर्नियोगोपि न घटत इत्युक्तत्वादाह॥ निये
गो इति॥ नियोगोऽप्रतिपन्नत्वात्सिद्धेत्वेतरेत्वानो वा कुर्मणः स यथा न वेत्य। अत्र विस्त
नवेद्यौत्ताव धावस्संवेद्यत्वाऽहहं॥१९ वाक्यमात्राद्वैकात्म्यस्याप्रतिपन्नत्वात्साम्प्रतं
नत्वान्नावान्नावन्नियोगोऽविरुद्धो नवेत्य। वस्संवेद्यत्वाब्रह्मात्मैकत्वाऽद्दष्टाद्दष्टा न प्रती
यत इति योजना। स नियोगः कर्मणामग्निष्टोमादीनां यथा नवेद्यावाक्यादवगत्तानामपिप्र ५८।

ठा३

३

ऽनश्रावय इति दृष्टांतार्थः॥२१ किंच विधिमंतरेणैव ब्रह्मात्मैक्यं वाक्यात्स्वयमेव प्रतिप
न्नतद्ध्यानमनियमादिकमनुष्ठीयमानं मिथ्या स्यादुपकार्याभावादित्याह॥ चेष्टितमिति॥ चे
ष्टितं च तथा मिथ्या स्वच्छंदं प्रतिपद्यते॥ प्रसंख्यानमतः कार्यं यावद्धात्मानुभूयते॥२२ चेष्टि
तमनुष्ठितं यमादि स्वच्छंदं स्वेच्छाचारं न नियुक्त इति यावत्। प्रतिपद्यते चेदित्यध्याहारः। आ
त्मानुभूयते। साक्षात्क्रियत इत्यर्थः॥२३ इतोपि प्रसंख्यानं विधितोऽनुष्ठेयमित्याह॥ सदसी
ति॥ सदसीति च विज्ञानमकृजो बाधते ध्रुवं॥ अज्ञोत्थं दृढसंस्कारो दोषश्चाकृष्यते बा
२४ विज्ञानमकृजः प्रत्ययः कर्त्राजोक्ते तेव मायाकारो बाधते ध्रुवं निश्चितमेतत्। अत्रेदंत
स्य प्राबल्ये हेतुगर्भं विशेषणं। दृढसंस्कार इति। किंच तेन हि मुमुक्षुर्देहे रागादिनिश्चवाहृ
कृष्यते बहिर्मुखो क्रियतेऽतः प्रसंख्यानं दोषनिवृत्तये च कार्यमित्यर्थः॥२५ न केवलं विरंते
ऽरूढवासनाघटितत्वेन प्रत्यक्षप्राबल्यमपि तु विशेषविषयत्वाच्चेत्याह॥ आदेति॥ आत्मानु

मानजन्मानो सामान्यविषयो यतः। प्रत्यग्यथावद्वस्तुनो ऽवरूपं विज्ञोपार्थो निवारयेत्॥१४॥ अतःअ
बो ऽनुमानं लिंगज्ञानं। विप्रलिप्सान्त्रांतो ऽस्यपि तत्र संजाम्रमानत्वा ऽक्षसंतरसंनवाच्च प्रत्यक्
स्पत इन्नाबाधुत्तं बाधकत्वमित्यर्थः॥१४ यदि वाक्यार्थज्ञानमात्रात्कृत्स्नतात्पत्यस्य विद्वद्रूपे तत्
हा प्रसंख्यानकृत्स्नमनर्थकं स्यान्नतु तथा कश्चिद्दृश्यते अतः प्रसंख्यानमावश्यकमित्याह।
वाक्यार्थप्रत्ययात्कश्चिन्निर्दुःखो नोपलभ्यते। यदि दृश्येत कश्चिद्वाक्यार्थश्रुतिमात्रतः॥१५॥
तर्हि तस्यैव न स्यादृषिर्वामदेवः प्रतिपेदे तद्वा स्यविजिज्ञासितश्चैवा वाक्यार्थज्ञानमात्राद्वामदेवो
हि: कृतकृत्यो दृश्यत इति चेत्तत्राह। यदि वेत्ति दृश्यते निर्दुःख इत्युत्तरश्लोकगतेनान्वयः॥१५॥ नि
र्दुःखो ऽतीतदेहेषु कृतभावो ऽनुमीयते॥ चर्यानो ऽन्यस्य संवेद्या स्यादनिष्टं तथा सति॥१६॥ वाक्या
र्थश्रवणमात्रात्कश्चिद्यदि निर्दुःखो दृश्यते श्रुतिपुराणेषु सो ऽतीतदेहेषु कृतभावो ऽनुष्ठि
तप्रसंख्यानो ऽनुमीयते निर्दुःखत्वलिंगेनेत्यर्थः। किंच सकृद्विज्ञातवाक्यार्थस्य विधान २५५

४

प्युपगमनो ऽस्मात् कंचन यथापरमहंसाश्रमाचारो ऽन्यस्य संवेद्यः स्यात् तथा ऽस्य विहितानस्यात्
तथा सति अनिष्टं स्यात् यस्माश्रम... चर्यापरित्यागे प्रायश्चित्ततो न भवेदिति अनिष्टप्रसं
ग इत्यर्थः॥१६॥ ननु तर्हि प्रसंख्यानविधिपक्षे सिद्धब्रह्मोपदेशस्यार्थः स्यादित्यत आह। फलसं
ति। फलदर्शीति फलं चात्मा विधेयं साधनं यत्तथा नत्वन्यत् प्रसंख्यानात्त्र सिद्धार्थमिदिष्यते॥१७
त्वं सत्पुमाहो सोतिवर्तमानायदेशेन फलमिदं साधनविधानार्थमुच्यते यतो यस्मात्सर्वत्र फ
लमुत्क्वा साधनं विधेयमतो ब्रह्मैकत्वकामः प्रसंचक्षीतेति सार्थको विधिर्भवेदित्यर्थः। प्रसं
ख्यानमेव स्वर्गमिति विधीयते ज्योतिष्टोमादिकं साक्षात्कुर्वन्नावायनं विधीयते इत्यत आह।
नेतदस्यादिति। प्रसंख्यानादन्यदिह वेदान्तेषु प्रसिद्धार्थं सिद्धार्थावित्यंजनं समर्थं साधनं यत्
न्ने ष्यते। ज्योतिष्टोमादेर्यजनत्वसामर्थ्यमिवाधिकार्थः॥१७ इत्यर्थमुपसंहरति। तस्मादि
ति। तस्मादनुभवार्थेव प्रसंचक्षीत यत्नतः। स्वजन्मसाधनं तत्स्यात् विकल्पं ज्ञानमनादिमान्॥१८

किंतु वेदैकसाधनं तत्साध्यविलक्षणं स्वजन्यसाध्यं तंश्च संख्यानं तत्साध्यं तत्फलं मा. तैमेकवसात्ताद्या
रभ्यत इत्यर्थः क्रमनिष्ठत्वं क्रमनिष्ठान्मनः आदिपदाद्दमो परस्यादिग्रहः तामादिषु क्रमश्च सन्निरस्यर्थः
र्यसिद्धांतमुपक्रमते नेति इत्थमिति नेतदेवं रहस्या नेति नेस्य वसानतः क्रियासाध्यं पुराश्चर्य व्यं ३
तः४ नमोन्हो निस्त्य सिद्धः ॥२८॥ किं चेदं तेषु श्रसंख्यानं साक्षा क्षिप्यते किं वा वर्त्तमाना पदद्वारेण फलश्च
नानुपपत्या कल्प्यत इति ॥ तत्र नाद्य इत्याह ॥ रहस्यानामिति ॥ अपनिषद्वाक्यानामित्यर्थः ॥ नेति
नेति इत्यस्य निषेधद्वारा तद्वधिमात्रेब्रह्मात्मस्वरूपे पर्यवसानैर्हमादेहादीनां न विध्यर्थत्वमित्यर्थः
द्वितीयं प्रत्याह ॥ क्रियासाध्यमिति ॥ क्रियासाध्यं फलं तत्पुराणं सर्वश्चाद्यंतोपनिषत्सु श्र
यमाणं मोक्षो न क्रियासाध्यः कुतो नित्यसिद्धत्वेन साध्यत्वादित्यर्थः ॥२९॥ तत्त्वमस्यादिवाक्य
मवरोक्षद्वितीयब्रह्मात्मज्ञानद्वारा तद्ज्ञानं तत्कार्यं च दुःखित्वादिसंसारं निवर्त्तयतीति च
२८१ त्तेषु महावाक्येषु पतं दुःखादीत्यत्र दृष्टांतमाह ॥ पुत्रेति ॥ पुत्रदुःखं यथाध्यस्तं पित्रा दुःखेरनान् २८१

त्मनि ॥ अहं कर्त्तेति तथाध्यस्तो नित्यादुःखे स्वआत्मनि ॥२९॥ अदुःखे ज्वरादिदुःखरहित इत्यर्थः
दृष्टांतिकमाह ॥ अहं कर्तेति ॥ नित्यादुःखे सदुःखादिसंसाररहिते स्वस्वरूपे आत्मनि नि
यामिके ऽहं कर्त्ता साक्षात्संतः करणविवर्त्तो दुःखादिधर्मको ऽविवेकेनान्येनाध्यासेन तथा
ऽध्यस्त इत्यर्थः अहं कर्त्रेति पाठे स्वआत्मनीत्यत्र दुःखादिरिति शेषः ॥ स्वआत्मनो ब्रह्मत्वेना
वाज्ञानेनाध्यस्तः संसारस्तत्त्वज्ञानमात्रान्नेति नेति तत्त्वमसीति चेद्शास्त्रोत्यान्निवर्त्त
तांतद्वात्मनः सर्वक्रियाधिकारनिवृत्तेः मुमुक्षुणा विवपुनरध्यासबीजानाभावात्तत्कृतत्तत्कृत्स्यानप
संख्यानविधेरवसर इति फलितमाह ॥ सोध्यास इति ॥ सोध्यासो नेति नेतीति शास्त्रवस्तुतिषिध्यते
न्नूयोध्यासविक्षिपः कश्चित्कुतश्चित्त्रोपपद्यते ॥२२॥ आत्मवदिति वर्त्तिप्रयोगाद्दृष्टांतस्ताश्च
स्यात्मना वादारोपितत्वं दृष्टयति ॥२२॥ नन्वेवं विषये ब्रह्मात्मनि विषयधर्माणां दुःखित्वादीनां
प्यमध्यासः संज्ञायतेयतः पुरोवस्थिते विषयमन्तत्त्सुक्तिकादौ रजताध्यासो दृष्ट इत्याशं

स्यमित्त्वाशंक्यैवं नियमइत्याह । आत्मनीति । आत्मनीहयथादौ सः प्रतिषेधस्तथैवस्वामसाध्यास
निषेधो रवेक्रियेते च तथाऽनुधैः स्वयथादेहव्यतिरिक्तात्मवादिनामात्मनीहपुरस्थितदेहजराम
रणाद्यध्यासस्तत्प्रतिषेधश्चयथावेदिया विषयेपि रवेमसाध्यासनिषेधावनुधैः क्रियेते तथैव च
प्रसंगात्मनिःश्रेयसएवमविषयेसंसाराध्यासनिषेधोस्यात्तामित्यर्थः । आत्मनीहतथाध्यासइतिप
देहशांतदृष्टांतिकयरतयोत्तरार्धपूर्वार्द्धैस्पष्टार्थौ । अधिष्ठानस्वरूपमात्रस्फुरणमध्यासेऽपेक्षते
नविषयत्वेनस्फुरणं तत्तीहस्वप्रकाशात्मनिस्वतःसिद्धमितिनानुपपत्तिरिति भावः । स्वप्राश्व
त्प्रतिषिध्यत्तईस्तुत्कंप्रयंवयति । प्राप्तस्यैवहि ति । प्राप्तस्यैवप्रतिषिध्येतमोहो नित्योभवेत्तथ्यवंध
तोप्राप्तनिषेधोयंहिमध्येवयनाद्विवत्तत्प्रमाणसिद्धश्चेत्संसारः प्रतिषिध्येत तर्हि संसारबंधनि
वृत्तिरूपस्यमोक्षस्यागंतुकत्वाद्ध्रुवंनिश्चितंमोक्षोऽनित्योभवेत्परमार्थदेश्यात्मगतस्यबंधस्य
२५८ परमार्थतएवनिवृत्तौतिस्यात्मनोऽवस्थांतरायत्त्वाविकारित्वादनित्यत्वमावश्यकं । तथानादिभावस्य २५८

तृ२

६ ६

यस्य बंधस्य परमार्थत्वेतन्निवृत्तिरेवासंभाविनी । सादित्वाभ्युपगमेतुतस्यात्मनेवहतत्वा
न्निवृत्तस्यसजातीयस्यपुनः । स्तस्मिन्पूर्ववदुत्पत्त्युपपत्तेरनित्योमोक्षः प्रसज्येतेवेतिबंधस्यापि
घत्वमवश्यमेष्टव्यं । तस्यचज्ञानाद्देवनिवृत्तेर्निरर्थकं प्रसंख्याननमित्यभिप्रेत्योपसंहरति । अत
इतिस्यथानीतसिद्धेः पितृगणेस्वेतव्यइति तथा यामिवाग्निचयनमंतरिक्षाद्वारावारोप्यप्राप्तमेवप्र
तिषिध्यते । तथा संसारबंधरहितएवात्मनि तत्साध्यनिषेधाविति दृष्टांतेनाद्यादिकं ग्रीतिप
श्रादित्यहाहाज्ञाज्ञामालिन्यंलोकिकेगृह्यते । स्वश्रात्मनि बंधसंबंधबोधकप्रमाणाभावादपि
नितत्रबंधस्यसत्ताशास्तिरस्तीत्याह । संभाव्यइति । संज्ञाञोगोचरेज्ञाकः प्रत्ययोवानवान्य
यानसंज्ञाञोतहात्मत्वाद्देहंकर्तुस्तथैव च वाक्यश्रयमर्थः । आत्मनिबंधसंबंधबोधकंप्रमाणंज्ञा
बः प्रमाणांतरं वासर्वथापिनोपपद्यत इत्याह । शब्दः प्रत्ययो वेति । प्रत्ययः प्रमाणांतरजन्यज्ञा
वाप्रत्ययो वालोकेगोचरे विषये संज्ञाव्यः संज्ञावनायोग्योनवान्यथाविषयत्वायोग्यात्तथा च

शरीजातिगुणक्रियाशिष्टव्यवहारनिमित्तरहितस्यात्मनो नञ्शाब्दगोचरत्वं संभाव्यते येनायमा
त्मा संसारीति बोध्यः शब्दप्रवृत्तेस्तथा रूपादिहीनत्वाच्च बाह्येंद्रियवर्गस्तस्मिन्न क्रमते। अंत
राचरत्तस्य च रूपसंबंधस्य लिंगविशेषाग्रहणादनुमानाद्यपि नातस्मिन्संभवेत्। तोऽवयवाद्य
भावाच्चोपमानं। अभावरूपत्वादेव नानुपलब्धिरपीति प्रतीतिमात्रं परिशिष्यते इति न प्रमाणसिद्धि
र्बंधसंबंध इति चेत्। नसंभावनामात्रमपि शब्दप्रत्ययावितिः। किं च शब्दप्रत्यययोः प्रमाणत्वाभि
मतयोस्तदपेक्षवादहंकर्तुः प्रमातृत्वाभिमतस्य चेतनात्मत्वाद्बुद्ध्यात्मत्वान्नतद्गोचरत्वमुपपद्य
ते॥ नह्यागंतुकयोः शब्दप्रत्यययोरहंकर्तुर्वा चिदात्मनः पृथक्स्वरूपमस्ति स्वात्मनि तु क्रियानुपपत्ति
रित्यर्थः॥२५॥ तस्मादध्यस्तनिषेध एव वक्तव्य इति सिद्धमित्याह॥ अहंकर्त्रेति॥ अहंकर्त्रात्मनि नित्यसं
२५८ चेतन्ये कर्तृताद्यध्यस्तं नेतिनेतीति तत्सर्वं साहंकर्त्रा निषिध्यते॥२६॥ चैतन्ये चित्स्वरूपत्र्यात्म २५८
नि यदहंकर्त्रा साभासांतःकरणाविवेकेन कर्तृत्वादिन्यस्तमारोपितं तत्सर्वं नेतिनेतीति निषिध्य

ते साहंकर्त्रा अहंकर्त्रा सहेत्यर्थः॥२७॥ अध्यस्तनिषेध एव चेच्छास्त्रेण क्रियते कथं तर्ह्यात्मनः स्वरू
पोपलब्धिरित्यत आह॥ उपलब्धिरिति॥ उपलब्धिः स्वयंज्योतिर्दृशिः प्रत्यगसदृक्रियः। साक्षात्सर्वां
तरः साक्षी चेता नित्योऽगुणोऽद्वयः॥२८॥ अनुपलब्ध्यादिस्वरूपत्वे प्रमाणाभावादित्यत आह साक्षादि
त्यादिनोत्तरार्द्धेन स्वचितत्त्वान्नाप्रमाणत्वात्स्वप्रकाश एवात्मा सदा स्वतः सिद्ध इत्यर्थः॥२८॥ ननु आ
त्मात्मीयमिति च द्वयमहंममप्रत्ययगोचरत्वेन प्रसिद्धं तथा सति कथमात्मा स्वतः सिद्ध इत्याशंक्यो
पाधिवशात्तथाप्रसिद्धिरित्याह॥ सन्निधाविति॥ सन्निधौ सर्वदा तस्य स्यात्त्वदात्मेति मानतः। आ
त्मात्मीयं द्वयं चातः स्यादहंममगोचरः॥२९॥ अभिमानहेतुरहंकारस्तस्य चिदात्मनः सर्वदा सन्निधौ
सति तदात्मत्वेन तस्य प्रकाश्ययुक्तेः तयात्तदाकारः स्यात्ततो हेतोरात्मात्मीयं द्वंद्वं च स्यादहं ममेतिव्य
वहारगोचर इत्यर्थः॥ तथा च साभासांतःकरणत्तदस्य विवेकादात्माहमिति ममेति च भासमानो
पि स्वतः सिद्ध एव स्वभावतः इति भावः॥२९॥ एवमहंप्रत्ययादेरन्यविषयत्वोपपादनेन संभावयोगेव

रिशाब्द इति श्लोकोक्तं प्रत्ययागोचरत्वमात्मनः प्रतिपादितमिदानीं शब्दस्यापि विषयान्तरं दर्शयं
स्तद्गोचरत्वमुपपादयति॥ जातीति॥ जातिकर्मादिमत्वाद्धि तस्मिन्शब्दस्त्वहंकृतिनप्रव
र्त्तते शब्दस्तदभावात्स्वआत्मनि॥ १८॥ तस्मिन्नहंकृत्यहंकारे साभासे हि निश्चितं जातिकर्मादि
शब्दप्रवृत्तिनिमित्तवत्वाच्छब्दः प्रवर्त्तते तदभावात्प्रवृत्तिनिमित्तजात्याद्यभावात्स्वे स्वरूप
भूते आत्मनि निरुपाधिके कश्चिदपि शब्दो न प्रवर्त्तते तं विषयीकुर्वन्नित्यर्थः। अत आत्मा स्व
तः सिद्ध इति भावः॥ १८॥ स्वतःसिद्धस्वरूपआत्मनि प्रवृत्तिनिमित्तजात्याद्यभावात्कश्चिदपि श
ब्दो न प्रवर्त्तते चेत्कथं तस्य वेदान्तवेद्यत्वोपनिषदत्वमुद्घुष्यत इत्यत आह॥ आभास इति॥
आभासो यत्र तत्रैव शब्दाः प्रत्यग्दृशि स्थिताः लक्षयेयुर्न साक्षात्तमभिदध्युः कथंचन॥ १९॥
यत्राहंकारादावाभासश्चैतन्यप्रतिबिंबोदयस्तत्रैवाभासाविविक्तेंतःकरणादावेव कत्वेन स्थि
ता आत्मादिशब्दाः प्रत्यग्दृशि प्रत्यक्तयाभासमानं दृशिमात्मानं शुद्धं लक्षयेयुर्लक्षणया ज्ञाप

येयुर्नतु तं साक्षादभिदध्युः। कथंचन विशेषणादिप्रकारेणापीत्यर्थः। श्रुतौ नौपनिषदत्व
प्रसिद्धिविरोध इति भावः॥ १९॥ कथं नाभिदध्युरित्यत्र हेतुमाह॥ न हीति॥ नह्यजात्यादिमा
न्कश्चिदर्थः शब्दैर्निरूप्यते॥ २०॥ यन्नु लक्षणयापि यत्र शब्दस्य तात्पर्यं स एव शब्दार्थस्तथा चात्मा
दिशब्दानामहंकारातिरिक्तप्रत्यगात्मनि चेद्वृत्तिः कथं तर्हि लोकात्राहंकारादावात्मशब्दः प्रयुज्य
ते इत्यपेक्षायामुपचारादिति सदृष्टान्तमाह॥ आत्माभास इति श्लोकेन॥ आत्माभासो यथाऽहंकृदा
त्मशब्दैस्तथोच्यते॥ २१॥ उल्मुकादेर्यथाग्न्यर्थाः परार्थत्वान्नचांजसा॥ २२॥ अहंकृदहंकारो वस्तुतोऽना
त्माप्यात्माभासश्चात्मवदस्मत्प्रत्ययालंबनो भासते यथा तथात्मादिशब्दैरपि यथाप्रतिभास
मुक्ते वस्तुगत्या तु शब्दप्रत्यययोः शुद्ध एवात्मनि पर्यवसानं यथाग्न्यर्थाः शब्दा दहनादय उ
ल्मुकं दहतीत्ययो दहतीत्युल्मुकादौ प्रयुज्यमाना अंजसा साक्षादुल्मुकादौ न च पर्यवस्यन्तीति पा
दाहाद्याश्रयत्वानुपपत्तेर्दहनस्यादिशब्दानां परमार्थत्वात्तदन्निमत्त्वात्स्वार्थत्वात्तेऽग्नावेव पर्य

२१२

स्यं॥ तथाहंकारस्यात्मान्निमज्जनपर्यंत्वात्तस्मिन्जडे परिछिन्ने पराधीनप्रकाशे आत्मादिशब्दः
प्रसिद्धानंदानंतायर्थाश्च नुपपद्यमाना विचार्यमाणेशुद्धएव पर्यवस्यंतीति सर्वमुपपन्नमिस्थं॥
२९॥ आत्मा सोऽयंत्रेति श्लोके सिद्धांतिनाऽऽत्मासंगी हृतः सत्वेन इति विपर्यासविशिष्टतयात्मा
मानः परमार्थो वाऽपरमार्थो वा इति वा इति विप्रतिपत्ता संशयेन परमार्थ इति स्वसिद्धांतं वक्तुं
दृष्टांतमाह॥ मुखाद्भन्य इति॥ मुखाद्भन्यो मुखाभासो यथादर्शानुकारतः आत्माभासान्मुखमप्येवम
दर्शाननुवर्तनात्॥२४॥ यथा मुखाभासो मुखप्रतिबिंबं आदर्शानुकारतः आदर्शनीवाभावयोर
नुकारादादर्शान्वयव्यतिरेकानुविधायित्वादितियावत्॥ मुखाद्भीवास्थादनागमापायित्त्वादि
त्यादन्यो न पुनः स्वरूपेणेतियोज्यं॥ तथा सति बिंबचेष्टया बिना प्रतिबिंबे चेष्टेते सर्थः॥ आत्मा
भासान्मुखमप्येवमन्यदेव उत आदर्शाननुवर्तनात् आदर्शनिरपेक्षसत्तास्फुरणयोगादित्यर्थः॥ तथा
चग्रीवास्थस्यैव मुखस्यादर्शे प्रतिबिंबितस्यादर्शस्थत्वे तावेशिष्ट्येनाऽऽसमानत्वेमेवाभासत्वं न

२१२

डाक्टर भाऊ दाजी
Dr BHAU DAJI

स्वेन सत्यं मुखविशुद्धादर्शेतिर्यक्स्थिरादिप्रमाणे वा तस्मिन्नदर्शेनात्मनाप्यसदपरोक्षप्रतिभा
सात्तस्मादनिर्वचनीय एवाभासस्तस्माद्भान्यन्मुखमिति भावः॥२५॥ दार्ष्टांतिकमाह॥ अहंकृतीति॥
अहंकृत्यात्मनिर्भासो मुखाभासवदिष्यते॥ मुखवत्स्मृतः आत्मान्योविविक्तोनो तथैव च॥२६॥ अहं
त्यहंकारे आत्मनिर्भासश्चैतन्याभासो मुखाभासवन्मुखप्रतिबिंबवद्बुद्ध्यात्मनोऽनिर्वचनीयः
आत्मा शुद्ध आभासादन्यः स्मृतो ज्ञातः प्रतिबिंबान्मुखवदित्यर्थः॥ मुखस्य मुखाभासस्यादर्शस्य
वाभासाश्रयस्य प्रतीतित्रोत्रेदेपि वस्तुतो नेन्नावेवेत्याभासतदाश्रयांतःकरणहीनोऽप्रतिभा
सतोत्रेदेपि वस्तुतोनात्मातिरिक्तं किंचिदस्तीति नूपरमार्थेत्रिद इत्यभिप्रेत्याह॥ तथेति विविक्तो निर
पेक्ष वचेति॥ तावात्माभासोतथैव मुखमुखाभासाविव वस्तुतो विविक्तौ परमार्थभेदरहितावित्य
र्थः॥ वचाराद्भासाश्रयांतःकरणं च न तद्विविक्तमिति योज्यं॥२७॥ एवं चिन्मात्रं तज्ज्ञानाद्य विघ्नयो
तत्कार्ये चाहंकारोहे प्रतिबिंबितं तदेव चिदात्मस्वरूपमुपाधिस्थतावेशिष्ट्याभासव्याससंसारी

स्वमतमुक्त्वा तद्दृढीकरणाय केचिदेकदेशिमतं दूषयन्नुत्थापयति। संसारीति। संसारी च स इत्येकदेशि
नासो यस्त्वहंकृति। वस्तुछायास्मृतेरन्यन्माधुर्यादि च कारणं॥ अथ यस्त्वहंकृत्या नासोऽस्माच्छिष्ट
पगुणः स एव संसारी स एकमन्यं तेऽस्यार्थः। नन्वाभासस्यावस्तुत्वात्कथं तस्य बंधमोक्षभागितया सं
सारित्वमित्याशंक्याभासश्च बदेन विच्छायाश्रयेतत्वात्रस्याश्च वस्तुत्वान्नानुपपत्तिरित्यभिप्रेत्याह।
वस्तुछायेति। छाया वस्तु परमार्था। नाक्रमेल्लक्षमतमस्मच्छायां गुर्वादिरिति च स्मृतेरिति योजना। तथा च
याज्ञवल्क्यः। देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियः। नाक्रमेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनादिक
मिति। न केवलं स्मृतिवचनादेव छायाया वस्तुत्वावगमोऽस्त्यन्यदपि कारणं माधुर्यादि छायायामासी
नस्य सुखमाधुर्योपलब्धेः। सोपलब्धेश्चेत्यर्थः॥ अथ पुनरेकदेशिमतत्रयमाहान्ये केचिदिति।
केचिदेकदेशिनो विकारो वा तस्य नासाश्रयः परात्माहंकर्त्रैव संसारी स्वतंत्र इति केचन। तदपरे तस्य चित्स्व
नं द्र परमात्मनः एकदेशाः संसारी समेवांशो जीवलोके जीवभूतः सनातन इति स्मृतेरित्येकदेशि

११२ १० ११२ १०

विस्फुलिंगदृष्टांतेन सर्व एत आत्मनो व्युच्चरंतीति श्रुतेः। परमात्मनो विकारः संसारीत्यपरे। अप
रे तु तदाभासाश्रयप्रसिद्ध उपात्ताभासविशिष्टोऽहंकार एव संसारी तन्मनो दीर्घं दीर्घं पत्तिवेति श्रुतेः।
परमात्मनो विकारः इत्याद्युक्तस्यार्थः। सोऽपि मतमाहाश्रयेऽहंकर्त्रैवेति। स्वतंत्रो न परमात्मवशादिरू
प इत्यर्थः। अपवौ मतमाह। अहंकारादीति। अहंकारादिसंतानः संसारी नान्य इति घटाद्यस्येव सौ
गताद्याकृतस्तत्र न्यायो विचार्यते। अहंसंतानोऽविरलोदयतयाऽविच्छिन्नानिरूप्यणिकज्ञानान्येवात्म
संसारी न ततः पृथगन्योऽस्ति विज्ञानोत्पत्तिविनाशइत्यास्तीत्येवं सौगताद्याकृतिरित्यर्थः। ऽपरे तु
केषु पक्षेषु विषयत्वाद्विरोधाच्च विकल्पसमुच्चयोरसंभवात्मतमस्येव कस्यचिदुपादेयत्व
मथवा सर्वदुष्टत्वे वा विधयाऽहंकारादिगताभासा विवेकान्संसारीत्येतस्येति निर्धारणे न्यायो विचा
र्यत इत्याह तत्रेति। इदं प्रसंगात्किं संसारिचिंतां हित्वा प्रकृतमाभासनिरूपणं प्रतिजानीते॥
संसारिणामिति। संसारिणां कथा वास्तां प्रकृतं त्वधुनोच्यते॥ इदं स्पष्टं। प्रकृतमाभासमेव निरूप

बस्त.४

यत्तावदेतन्मुखाभासदृष्टान्तत्वेनापरमार्थमुक्तं विशदयति। मुखाभास इति। मुखाभासो यत्रादर्शे
धर्मो नान्यतरस्य सः। द्वयोरेकस्य चेद्धर्मो वियुक्तेऽन्यतरेण वर्त्तते। यथायमादर्शे मुखाभासो दृश्यते
स किं मुखादर्शयोरन्यतरस्य यस्य कस्य चिद्धर्मः किं वा मुखस्यैव धर्मः। अथवा द्वयोरपि धर्मो वस्त्वं
तरं वा किंचिदिति विकल्प्याद्यं निराकरोति। धर्मो नान्यतरस्य स इति। एतदेव स्पष्टयति। द्वयोरिति। द्व
योर्मध्ये एकस्यान्यतरस्य चेदाभासो धर्मः स्यात्तदा वियुक्तेऽन्यतरे सति दर्पणवियुक्ते मुखे नज्ञतल
प्राप्तिवद्दर्शनगोचरो न वर्तेत। मुखवियुक्ते वा दर्पणे दृश्येत न वेत्त्वेवमस्मत्तो नान्यतरस्य धर्म इत्यर्थः। वि
कल्प्यान्तरमुत्थापयति। मुखेनेति। मुखेन व्यपदेशात्स मुखस्यैवेति चेन्मतं। नादर्शानुविधाना
त्वमुखे सत्त्वविनावृत्तेः। एतद्दूषयति। नेति। यद्यपि मुखाभास इति मुखेन व्यपदिश्यते तथापि न मु
१७३ खधर्म आभासः। आदर्शानुविधानात्। मुखैकधर्मत्वे तदयोगात्। किं च सत्यपि मुखे दर्पणवियु [illegible]
क्तेऽविनावतोऽदर्शनादित्यर्थः। एतद्द्वितीयकल्पमनूद्य प्रत्याह। द्वयोरेवेति चेदिति। द्वयोरेवेति चे

११ ११

त्तं द्वयोरेवाप्यदर्शनात्। आदर्शस्य सत्तो दृष्टिः स्याद्राहोश्चेंद्रसूर्ययोः॥ एवं द्वयोरप्यदर्शनादि
ति। संबंधः। न हि मुखादर्शयोर्वियुक्तयोराभासो दृश्यते नापि संयुक्तयोरयं धर्मोऽपि यथाकथंचन
संयुक्तयोरपि तद्दर्शनप्रसंगान्न तथा दृश्यते तस्मान्न द्वयोर्धर्म इत्यर्थः। तर्हि वस्तु परमार्थवस्त्वन्तरमे
वाभास इति चतुर्थं पक्षं दृष्टान्तेन निराकरोति। आदर्शस्येति। सतो विद्यमानस्यैव सर्वैः करणैरदृश्यस्य
राहोश्चंद्रे सूर्ये चोपाधौ कदाचिद्दृष्टिर्दर्शनं तथा मुखाभासस्यापि वस्तुत्वे तस्य सतो मुखसन्मुख
दर्पणोपाधौ दर्शनं स्यादित्यर्थः। वैषम्येण दूषयति। राहोरिति। राहोः प्रागेव वस्तुत्वे सिद्धे
शास्त्रप्रमाणतः। छायापक्षे तत्त्व वस्तुत्वे सिद्धे निश्चिते नेह तथा निश्चायकं तस्य स्यात्सर्वयुक्तितः॥
धध्वन्द्रादुपरागात्प्रागेव ज्योतिःशास्त्रप्रमाणतः पुराणादिशास्त्रप्रमाणतो वा राहोः सिद्धे ह्येकस्य व
स्तुत्वे सिद्धे निश्चिते नेह तथा निश्चायकं प्रमाणमस्तीति शेषः। न हि मुखदर्पणयोः संबंधात्पूर्व
मूर्ध्वं वा तदतीतस्यापि नास्ति वस्तुत्वमिति साभासस्य व्यतिरिक्तवस्तुता मुखाभासस्य केनचित्प्रमा

णे न क्वापि संभावितेत्यर्थः॥ राहोर्वस्तुत्वमंगीकृत्य दार्ष्टान्तिकानानुगुण्यमुक्तमिदानीं तस्यापि
नास्ति वस्तुत्वमित्याभासस्य वस्तुत्वे नायं दृष्टांत इत्याह॥ छायापक्षेऽपीति॥ तस्माद्धि छाया राहोरित्ये
षां विस्पष्टः। तस्मिन् छायापक्षेऽपि तस्य राहोरवस्तुत्वं स्यात् मुखाभासो यथा दर्श इत्याद्युक्तयुक्तितो युक्ति
संचारादित्यर्थः॥ अथ वस्तुच्छायास्मृतेरित्यत्र छायाया वस्तुत्वे स्मृतिः प्रमाणमित्युक्तं तत्राह॥ छायाक्रांतेरिति॥
छायाक्रांते निषेधोऽयं न तु वस्तुत्वसाधकः। न ह्यर्थांतरनिष्ठं सद्वाक्यमर्थांतरं वदेत्॥ अथ नत्वित्यत्र छायाया
इति शेषः। ननु छायालंघनप्रतिषेधपरमपि वचनं तस्याः वस्तुत्वमपि बोधयिष्यतीति चेत्तत्र वक्त
मं साक्षाद्वेदोक्तार्थादिति॥ नाद्य इत्याह॥ न हीति॥ एकवाक्यस्यानेकार्थत्वे वाक्यभेदप्रसंगादित्यर्थः॥ द्वि
तीयो निषेधस्य प्राप्तिमात्रसापेक्षत्वान्निषेधविषयादेर्वस्तुत्वाभावेऽपि निषेधानुपपत्तिरित्यत्र नियामका
२१४ भावादिति द्रष्टव्यं॥ अथ यदप्युक्तं माधुर्यादिकार्यदर्शनादर्थक्रियाकारित्वेन छायायाः वस्तुत्वमिति तदप्यन्यथा २१४
सिद्धमित्याह॥ माधुर्यादीति॥ माधुर्यादि च यत्कार्यमुक्तं इत्याद्युसेवनात्॥ छायायाः न त्वदृष्टत्वाद्यामेव च

१२ १२

श्चेत्यतेत्रयो व्यवहारदृष्ट्याविज्ञाश्रवणात्संतेन परमार्थदृष्ट्या तथात्मा तदाभासस्तदाश्रय ४

दर्शनात्॥ अधरछायायामुपविष्टस्य यन्माधुर्यादिकार्यं दृश्यते तदुक्तमित्याद्युसेवनान्नमित्यन्तु छा
याया हेतुत्वं न तु तायास्तन्माधुर्यादिकार्यं तु तोऽदृष्टत्वात्तात्प्यमानशिलाकूटछायायां माधुर्यादेरदर्शना
द्यामेव च दर्शनादयं धर्मस्तास्त्वेवाव्यभिचारादतश्छायायामुपविष्टस्य निर्वृत्तातपसंसर्गस्य स्वात्मा
विकोद्रेकमाधुर्याभिव्यक्तौ छाया मधुरेति विभ्रम इत्यर्थः॥ अस्तु देवं यथा मुखे तदाभासस्तदाश्रयं श्चेत्य
र्थं त्रयं मिथो विलक्षणं गम्यते॥ व्यवहारदृष्ट्येति दार्ष्टान्तिकमाह॥ आत्मानात्माभासाश्रयाश्चैवमिति॥ आत्मा
भासाश्रयाश्चैव मुखाभासाश्रया यथा॥ गम्यते शास्त्रयुक्तिभ्यामाभासासत्त्वमेव च॥ अत्रात्मत्वं पर
स्येत्यस्थिद्ध्यानुस्तस्यानाद्यविद्यान्तःकार्यप्रतिबिंबिततया तदुपाधिस्थत्वे वैशिष्ट्यं जीवत्वमाभासो
ऽविद्यान्तःकार्योपाधिराश्रय इति विवेकः। शास्त्रयुक्तिभ्यामिति॥ रूपं रूपं प्रतिरूपो बभूव इंद्रो मा
याभिः पुरुरूप ईयते॥ अनीशया शोचति मुह्यमान इत्यादिश्रुतेः एको वशी सर्वभूतांतरात्मा एकं रूपं ब
हुधा यः करोतीत्यादिस्मृतेश्चातथानुभवादेर्विषयांतस्यागमापायिनो दृश्यस्यानित्यसिद्धसाक्षात्मन

ध्यासव्यतिरेकेण सत्त्वयोरनुपपत्तेरित्याद्युक्तेः अस्यात्मन एकस्यैव सत्त्वमानात्वादेरसत्त्वं पर
मार्थसत्त्वाभावश्च गम्यते निश्चीयत इत्यर्थः॥ ध्वनन्वेवं सति त्वन्मते संसारमोक्षयोराश्रयाभावादनुपपत्तिर
वन्ध्यात्मतत्त्वाभासतत्त्वाश्रयाणामन्यतमस्यामिलितानां वा संसाराद्याश्रयत्वं घटत इति शंकते॥ नद्वयोरिति॥
नद्वयोरविकारित्वादाभासस्याप्यवस्तुतः॥ नास्तीति स्वाद्दहंकर्तुर्वस्य संसारिता न वेत्॥ ध्वसंसारो नाम
र्तृत्वकर्तृत्वप्रोक्तत्वादि स्वरूपेण विकारस्वरूप उपचयस्तद्वास्ति कापचयश्च मोक्षस्तथा च ताभ्यां क्रमेण
संबध्यमानो विकारी स्यात्तत्र द्वयोः अतन्यैकरसस्यापि न संसारिता न वेत्ति संबंधः॥ तत्र द्वयोरविकारित्वा
दिति कूटस्थत्वादित्यर्थः॥ तथाभासस्यापि न संसारिता न वेत्ति॥ इत्वनेकारमाह यान्वयः॥ तत्र हेतुरवस्तु
त इति॥ इत्वेवोक्तियुक्त्याभासस्यावस्तुत्वं निश्चयादवस्तुनः शून्यस्य नक्वोप्यतिशयसंभव इत्यर्थः॥ अहंकर्तु
रहंकारस्याभासाश्रयत्वेनातिमतस्यापि नित्यानुत्वा न संसारिता न वेत्ति इत्याह त्वसुखदुःखादि
भोक्तृत्वस्वरूपस्य संसारस्य जडाश्रयत्वसंभवोऽतस्त्वन्मते कस्य संसारिता न वेन्मोक्षो वेति चेयो

यं न कस्यापीति वदतोऽनुभवविरोध इत्यभिप्रायः॥ ध्वसिद्धांतीयद्येवमनिरूपिताश्रयो संसा
रमोक्षौ तर्हि मा भूतां परमार्थो कस्यापीति परिहरति॥ अविद्येति॥ अविद्यामात्र एवातः संसारोऽस्त्ववि
वेकतः॥ कूटस्थेनात्मनानित्यमात्मवानात्मनीवसः॥ ध्वप्यत एव मतः संसारोऽविद्यामात्र एवेत्तीति
मात्र एव स्वप्नवद्वस्तु अविवेकतः आत्मस्वरूपाविवेकात्संसार आत्मनोऽनात्मधर्म इवावभासत इति
योजना॥ अवस्तुभूतस्यात्मन्यपरोक्षतयासदिति प्रतिभासे निमित्तमाह॥ कूटस्थेनेति॥ तेनाध्य
स्तत्वात्तत्सत्तया सत्तावानित्यर्थः॥ नित्यमित्यस्याधीनात्मवत्तस्तत्रापीतौ सूचयति॥ ध्वपैरज्जुसर्पो स्पष्टार्थः॥
यथेति॥ रज्जुसर्पो यथा आत्मसत्तया सत्तावाननात्मधर्म इवाभासते संसार इत्येतद्दृष्टांतेन स्पष्टयति॥
रज्जुसर्पो यथेति॥ रज्जुसर्पो यथा रज्ज्वासात्मकः प्राग्विवेकतः॥ अवस्तुसन्नपि स एव कूटस्थेनात्मना
तथा स्पष्टार्थः॥ ध्वहमतांतरमाश्रित्य कल्पनालाघवेन शंकते॥ आत्माभासाश्रय इति॥ आत्माभासा
श्रयश्चात्माभासः स्तो विकारवान्॥ सुखदुःखी च संसारी नित्य एवेति केचन॥ ध्व रएवकारा

र्थः॥आत्मैवात्माभासाश्रयः।आत्माभासत्वात्मितस्यजीवत्वस्याश्रयोऽतःसएवस्वैःस्वधर्मैर्नैः
दृश्यैर्विकारवान्सुखीदुःखीचेत्येवंसंसारीभवति।तथापिनित्यएवतरंगादिभिर्विक्रियमाणोऽप्य
पिसमुद्रस्यस्थैर्यदर्शनादतः।आ त्मासततः।अयमात्मानंमेदकल्पनातदविवेककल्पनातद्गृहा
त्मनिसंसारकल्पनाचगुर्वी।आत्मैवसंसारीतिकल्पनालघीयसीतिकेचनमन्यंतइत्यर्थः॥४७
उक्तंपुरस्तादस्माभिःसंज्ञामोगोचरेशास्त्र इत्यत्रात्मनिसंसारित्वग्राहकंप्रमाणंनास्तीतितत्रावि
स्मर्तव्यंत्वयेत्यभिप्रेत्याहेहमात्रमूले वैषाकल्पनानप्रमाणमूलेतिप्रदर्शयति॥आत्मानासा
परिज्ञानादिति॥आत्मनामसापरिज्ञानादयाथात्म्येनविमोहितः।अहंकर्तारिमात्मेतिमन्यमा
निरागमाः॥४८॥आत्मापरमार्थःकूटस्थोनित्यःआत्मासत्त्वच्छायारूपोऽमत्रसंक्रांतोमिथ्या
इसात्मात्मासयोर्याथात्म्येनापरिज्ञानान्मोहिताःसंतोऽहंकर्तारंसात्मासंततःकरणमेवात्मे
तितेमन्यंतेयतोनिरागमाः।आगमरहस्यपंचयश्रन्यादस्यर्थः।निष्कलंनिष्क्रियंशांतंनिरवद्यं

२४ २४

DR BHAU DAJI

निरंजनं॥साक्षीकेवलोनिर्गुणश्च।।इत्स्नःप्रज्ञानघनएवात्मायंपुरुषःस्वयंज्योतिरित्यादिनित्य
शुद्धत्वादिपरश्रुतिसंदर्भंतथाश्रुतीनांयात्मोचतिमुह्यमानः।अविद्यायामंतरेवर्तमानान्ते
नहिप्रसूद्धाइत्यादिश्रुतिसंदर्भंचात्मनआविद्यसंसारित्वानुपरंतेनपश्यंत्यतःस्वात्मेहृदयायात्मेवि
देववेदंतीत्यभिप्रायः॥४८॥मोहोऽप्येषांदुर्लभइत्याह॥संसारइति॥संसारोवस्तुसंस्तेषांकर्दमोस्थूल
ग्रहणः।आत्मानासाश्रयाज्ञानात्संसरंस्वविवेकतः॥४९॥तेषांमतेसंसारोवस्तुसन्परमार्थसन्नेवेत
याचनासतोविद्यतेभावोनाभावोविद्यतेसतः॥ इतिनियमस्मातेविनाशीसंसारइतितेषांमतेमोहो २५
स्थिरइत्यर्थः।यदिमोहात्प्रतीतत्वात्संसारस्यावस्तुत्वंतेऽपिमन्येरन्तर्हिसदुक्तप्रकारएवसइत्यनु
जानातिश्रोत्मात्मासाश्रयाज्ञानादिति।आत्माहित्रयाणांतदाज्ञानादविवेकतोनेहाग्रहात्संसरंतो
तियोजना॥४९॥परपक्षेमोहहानिंहोषमुक्त्वास्वपक्षेत्वात्मासात्सुपगमेनात्नविशेषमाहत्वेतन्मे
ति।चेतन्यात्मासतात्तुदरात्मनस्तत्त्वरूपता॥स्यात्चेत्ज्ञानश्रबेध्यवेदःशास्त्रोतियुज्यते॥५०॥

बुद्धेरंतःकरणस्यचैतन्याभासताआत्मनश्चैतन्यस्वरूपताचचेत्स्यात्तदैवेत्तदावेदस्त्वमात्मानंज्ञान
शब्दैर्ज्ञानसंतानंतानंदात्मादितिशब्दैःशास्त्रिप्रतिपादयतीतियुज्यतेयतइत्यस्याक्षरार्थःअयंभावः
प्रकाशस्वभावंवस्तुयत्रप्रतिबिंबतेतत्रप्रकाशाभासोदयहेतुर्भवतियथाजलेप्रतिबिंबितःसवि
तातथाबुद्धौप्रतिबिंबितंचैतन्यंतत्रचित्प्रकाशोदयहेतुर्भवतिततःसाभासायांबुद्धौयदात्मसंबं
धिज्ञानादिशब्दैर्वेदआत्मानंलक्षणयाबोधयतिइतिसंगच्छतेऽन्यथानिर्धर्मकस्यात्मनिशब्दप्रवृ
त्त्यनुपपत्तेर्वेदांतवेद्यतातस्यनसिध्येन्मानांतरंचतत्रनक्रमतइतिप्रसिद्धेरात्मनःस्यात्तर्हिसा
भासाभ्युपगमश्रुतिस्मृतिन्यायविज्ञैःकर्तव्यइति।।५५यद्यप्येवमाभासाभ्युपगमेवेदप्रवृत्तिरात्म
न्युपपद्यतेतथाप्यस्मिन्नज्ञानात्मादिशब्दानुप्रवृत्तेरनुइतिव्यवहारासिद्धिःप्रसज्येतेतिशंकते।।
ननुज्ञानशब्दोऽनुत्पाद्यमानआत्मनिमुख्यांवृत्तिंलभतएवअतःकथंसाभासबुद्धिवाचकसन्नस
आत्मनिलक्षणयावर्तिष्यतइतिकल्प्यतइतिवाशंक्य।।प्रज्ञातीति।।प्रकृतिप्रत्ययार्थौयौभिन्नावेक

२५

277

श्रयौयथा।।करोतिगच्छतीत्यादौदृष्टौलोकेप्रसिद्धितः।।५६प्रकृत्यर्थःक्रियाप्रत्ययार्थःकर्तृत्वंता
वुभौस्वरूपतोभिन्नावेकस्मिन्नाश्रयेस्थितौकरोतीगच्छतीत्यादौलोकेदृष्टौयथातथालोकप्रसिद्धि
तएवजानातिकरोतीत्यादेरप्यात्मैकाश्रयत्वंयुक्तमित्यर्थः।।परयद्येकाश्रयत्वमनयोर्दृष्टंतथाभि
न्नाश्रयत्वमपिक्वचित्किंनस्यादित्यतआह।।नानयोरिति।।नानयोर्भिन्नाश्रयत्वंचलोकेदृष्टंस्मृतौ
तथा।।जानात्यर्थेप्येकोहेतुर्भिन्नाश्रयत्वेनिगद्यताम्।।५७अनयोःप्रकृतिप्रत्यययोर्भिन्नाश्रयत्वंनलो
कप्रयोगेषुदृष्टंतथास्मृतौव्याकरणरूपायामपिनदृष्टमतोजानात्यर्थेपिभिन्नाश्रयत्वेआत्माप्र
त्ययार्थाश्रयःबुद्धिःप्रकृत्यर्थाश्रयइतिभिन्नाश्रयत्वाभ्युपगमेकोहेतुःसनिगद्यतामित्यर्थः।।५८
प्रकृतिप्रत्यययोरेकाश्रयत्वमात्रमस्मन्मतेनसंगच्छतइत्युच्यतेकिंवापरमार्थतस्तयोरेकाश्र
यत्वंतत्रनाद्यतइत्याहसिद्धांती।।आत्माभासइति।।आत्माभासस्तुतिङ्वाच्योधात्वर्थश्चधियःक्रि
या।।उभयंचाविवेकेनजानातीत्युच्यतेमृषा।।५९तुशब्दःशंकानिषेधार्थः।।आत्माभासोबुद्धि

२५

277

तास्तिज्ञाद्यः प्रत्ययवाच्यः धियो बुद्धेः क्रियावृत्तिरूपा धात्वर्थः प्रकृत्यर्थः। तथा चात्मा नासौ बुद्धिस्थो
स्तु नयं चाविवेकेन परमार्थात्माविवेकेन मृषैव जानातीत्युच्यते। तथा चात्मा नास्मात् क्रियावत्
धैक्याध्यासादात्मा जानातीत्येकाश्रयत्वाद् नासः प्रकृतिप्रत्यययोरिहापि नानुपपन्नं इत्यर्थः
॥५२॥ द्वितीयं प्रत्याह। न बुद्धेरिति। न बुद्धेरवबोधोऽस्ति नात्मनो विद्यते क्रिया। अतो नान्यतरस्यापि
जानातीति च युज्यते॥५३॥ सम्यग्विचार्यमाणे क्रियावत्या बुद्धेरवबोधश्चित्प्रकाशो नास्ति ना
त्मनोऽवबोधस्वभावस्य क्रिया विद्यतेऽतो नान्यतरस्यापि जानात्यवगच्छतीति निर्देशो युज्यते॥
तथा च प्रतीतिमात्रशरणेऽरोपितं तत्तदैक्यविषयत्वं जानात्यादेराश्रयणीयमिति न लोकव्यव
हारविरोधः स्मृतिविरोधो वा भवतीत्यर्थः॥५४॥ यथा जानातीति ज्ञ इति कर्तृमुखस्य बुद्ध्यात्मनो
१९८ रेकैकस्मिन् जानात्यर्थानुपपत्तिर्नापि मिलितयोस्तदुपपत्तिः परमार्थतो जडाजडयोरैक्यायो १९८
गात्। नाप्यन्यतरसंनिधिनिमित्तान्यतरस्मिन्नुभयाश्रयते इति घटते अध्यासमतिरेकेण सन्नि

२६ २६

धेरनिरूपणात्तथा ज्ञप्तिर्ज्ञानमिति भावमुखस्यापि ज्ञानशब्दप्रयोग आत्मनि न घटत इत्या
ह। नाप्यत इति॥ नाप्यतो भावशब्देन ज्ञप्तिरित्युपयुज्यते। न ह्यात्मा विक्रियामात्रो नित्य आत्मेति शा
सनात्॥५५॥ भावशब्देन धात्वर्थसामान्यवचनेन ज्ञप्तिर्ज्ञानमिति मुखस्यापि ज्ञानशब्दप्रयोग आ
त्मनि न युज्यते। तत्र हेतुं वक्ति न हीति। विक्रियामात्रत्वे पारतन्त्र्येणात्मनोऽनित्यत्वप्रसंगस्
त्वात् नित्य आत्मेति श्रुतिशासनादित्यर्थः॥५६॥ यथा जानातीति ज्ञ इति कर्तृमुखस्य ज्ञप्तिर्ज्ञान
मिति भावमुखस्य चात्मनि ज्ञानशब्दानुपपत्तिस्तथा ज्ञायतेऽनेनेति करणमुखस्य ज्ञायत इति
ज्ञानमिति कर्ममुखस्य चात्मनि ज्ञानशब्दप्रवृत्तिर्न युज्यत इत्याह। न बुद्धेरिति। न बुद्धेर्बुद्धिवाच्य
त्वं करणं न च कर्तृकं। नापि ज्ञाप्यत इत्येवं कर्मशब्दैर्निरूप्यते॥५७॥ बुध्यतेऽनयेति बुद्धिरिति
मुखस्य बुद्धिशब्दवाच्यत्वं बुद्धेरन्तःकरणस्य स्यान्नात्मन इति योजना। तत्र हेतुः करणमिति। करण
मुखस्य तिष्ठे बुद्धिशब्दवाच्यस्यात्मनः करणत्वापत्तौ कर्त्रन्तराभावात् कर्तृकं करणं स्यान्न हि

रणमकर्तृकं च विदृष्टमित्यर्थः। तथा ज्ञायतेऽनेनेति ज्ञानमिति कर्मशब्देऽप्यात्मा न निरूप्यते न स
म्युच्यते स्वस्य स्ववेद्यत्वानुपपत्तेर्ज्ञात्रन्तरस्याभावाच्च न कर्मव्युत्पत्तिरपीत्यर्थः। ज्ञायतेऽस्मि
न्निति ज्ञानमिति व्युत्पत्त्यन्तरमस्तीति चेत्तत्र वक्तव्यं ज्ञेयाधारत्वमात्रं ज्ञानशब्देनेह्यते ज्ञातृत्वे
सति ज्ञेयाधारत्वं वा नाद्यः। ज्ञेयघटाद्याधारभूतलादेरपि व्युत्पत्तियोगात् ज्ञानशब्दाभिधेय
त्वप्रसंगात्। न द्वितीयः। आत्मनो ज्ञातृत्वस्य निराकृतत्वादित्ययं पक्षोऽतिस्थूल इत्याचार्यैरु
पेक्षित इति द्रष्टव्यं॥५६॥ एवं मुख्ययाऽस्याज्ञानादिशब्दवाच्यत्वमात्मनो नोपपद्यत इति प्रति
पादिते तेन वाच्येन तुल्यमित्याशङ्क्येष्टापत्त्या परिहरति। न येषामिति। न येषामेक एवात्मा निर्दु
ःखोऽविक्रियः सदा॥ तेषां स्याच्छब्दवाच्यत्वं ज्ञेयत्वं वात्मनः सदा॥५७॥ येषां मते एक एवात्मा सदा
११८ निर्दुःखादिलक्षणोऽभ्युपगतस्तेषामात्मनः सदा शब्दवाच्यत्वं ज्ञेयत्वं च न स्यात्परमार्थत इति ११८
योजना। यद्वात्मनि मुख्यशब्दप्रवृत्त्यभावमुक्त्वा मतिरेव मुखेनोपपादयति। न येषामिति। येषां मते

२ २

एक एव यथा निर्दिष्ट आत्मा न भवति तेषां शब्दवाच्यत्वं ज्ञेयत्वं वात्मनः सदा स्यादस्त्विति यो
जना। तत्र कर्त्रादिप्रसक्तेः संभवात् न त्वेकात्मवादे श्रोते तत्संभव इत्यर्थात् सिद्धमित्यर्थः॥५७॥
तर्हि वस्तुशब्दार्थमुख्यत्वाय सविकार एवात्मेति शंकते॥ यदेति। यदाहं कर्तुरात्मत्वं न हा शब्दार्थमु
ख्यता॥ नाज्ञानाद्यादिमत्त्वात्तु श्रुतौ तस्यात्मतेष्यते॥५८॥ अहंकर्तुस्तावदिति मन्यमानाकारस्यात्म
त्वमेव नास्तीति परिहरति। नेति। योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येत्येतं वै तमात्मानं वि
दित्वेति श्रुतावात्मनोऽशनायाद्यतीतत्वस्याम्नानात् अशनायादिधर्मवत्त्वादहंकर्तुर्नास्त्यात्मता
नेष्यत इति योजना। श्रुतोऽज्ञानादिशब्दः आत्मनि न संभवत्येव तेन इत्यात्मसद्भावेऽस्मादुक्तात्ते वृं
सिद्धेति नो वः॥५९॥ नन्वेवमुक्तरीत्या यदिज्ञानाद्यात्मन्यप्यमुख्यता न संभवेत्तर्हि हि स्यात्
णाप्यात्मनि प्रवृत्तिरनुपपन्ना न हि क्वाप्यमुख्यं केचिदुपचर्यत इति संभवतीति शंकते। हंत तर्हि
इति चतुर्भिः। हंत तर्हि न मुख्यार्थेनापि गौणः कथं च न। जानातीत्यादिशब्दस्य गतिर्वाऽऽत्मा तथापि

नु॥१५८॥ स्यहं॥ मास्तु मुख्या नावाज्ञोणोपि तथापि किमिति गतिर्वाच्येति चेत्तत्राह॥ शाब्दानामिति
शाब्दानामयथार्थत्वे वेदस्याप्यप्रमाणता॥ सा च नेष्टा ततो ग्राह्या गतिरस्य प्रसिद्धितः॥१५९॥ न केवलं
लौकिकशाब्दानामेव ज्ञानानां शाब्दानामप्रमाणता किंतु वेदस्यापीत्यपि शब्दयोजना॥ लोकप्रसिद्धमु
त्यस्यपेक्षत्वाद्देदे बोधकत्वस्येत्यभिप्रायः॥ सा वेदस्याप्रमाणता नेष्टा चकाराद्वेदस्यैवात्मनि प्रमाण
त्वेति समुच्चीयते अतो वेदप्रमाण्यांगीकारस्तोतादेव गतिर्वाच्येत्यर्थः॥ तर्हि प्रसिद्धैव गतिः॥ कि
मिह वक्तव्यमिति सिद्धांतिनः शंकां गृह्णातीति ततो ग्राह्येति प्रसिद्धित इति चेद्दितिदोषः॥१६०॥ तत्र
वक्तव्यं प्राक्तनप्रसिद्धा गतिराश्रीयते पाणिन्याद्यत्ति युक्तप्रसिद्धा वा तत्राद्यमनूद्य दूषयति
प्रसिद्धिर्मूढलोकस्येति॥ प्रसिद्धिर्मूढलोकस्य यदि ग्राह्या निरात्मता॥ लोकायतप्रसिद्धांतः सर्वानि
१८० ष्टः प्रसज्यते॥१६१॥ प्राकृतप्रसिद्ध्यभ्युपगमे देहात्मप्रसिद्धेरप्यभ्युपगमान्निरात्मवादापत्तिरनि
ष्टाप्रसंगेत्यर्थः॥१६२॥ द्वितीयमनूद्य प्रत्याह॥ अस्ति युक्तेति॥ अस्ति युक्तप्रसिद्धिश्चेत्सर्वत्र दुर्विवेकता॥ १८

१८

गते शून्यं न वेदोयं प्रमाणं संवदत्यतः॥१६२॥ सर्वं वदतीति बुद्धेरात्मनो ज्ञातृत्वं दुर्निरूपमिति प्रा
युक्तदोषप्रसंग इत्यर्थः॥ यद्येवं तर्ह्यात्मनो गतिः शून्यमेव ज्ञातृत्वं वेदेनुवदिष्यतीति तत्राह॥ गती
ति॥ प्रमाणमिति हेतुगर्भं वेदविशेषणं॥१६३॥ चिदात्मन्येवौपाधिकं ज्ञानानां तादृशप्रयोगस्संभव
तीत्यभिप्रेत्य सिद्धांती दृष्टांतमाह॥ आदर्शेति॥ आदर्शे मुखसामान्यं मुखस्येष्टं हि मानवैः॥ मुखस्य
प्रतिबिंबो हि मुखाकारेण दृश्यते॥१६४॥ आदर्शे दृश्यमानं यन्मुखं तेन सामान्यं मुखस्येष्टं समानत्व
मेकत्वं मुखस्यादर्शांतर्हितस्येष्टतोमानवैरिष्टं हि प्रसिद्धमित्यर्थः॥ आदर्शे मुखमस्तीति तदाहंतु
पपत्तिसहकृततया मदीयं मुखमिति प्रत्यभिज्ञया बिंबप्रतिबिंबतावेनोपाधितो भेदेनासंपि मु
खैक्यं मानवैरिष्यत इत्युक्तं तत्र युक्तिमेवैकत्वं स्फुटयति मुखस्येति॥१६५॥ यथाकल्पितमुखस्य प
रमार्थमुखस्य चान्योन्यविवेकाभावलिनं मे मुखमस्त्यं वक्रमित्यादिव्यपदेश उपाधिनिबंधनस्तथात्मा
न्यपि ज्ञातृत्वादिव्यपदेश उपाधिनिबंधन इत्युपपन्नमिति दार्ष्टांतिकमाह॥ यत्रेति॥ यत्र स्थोयेपन

सस्तुतयोरेवाविवेकतः ॥ जानातीति त्रियांसः लोको वक्ति स्वभावतः ॥ ॥ अवसासः आत्मासः इति
विंभावः इति यावत् ॥ ७ ॥ यच्छब्द्या मुक्तमर्थं स्पष्टयति ॥ बुद्धेरिति ॥ बुद्धेः कर्तृत्वमध्यस्य जानाती
ति प्रउच्यते ॥ तथा च तन्मध्यस्य कर्तृत्वं बुद्धेरीहोच्यते ॥ ८ ॥ बुध्यात्मनोस्तादात्म्याध्यासे सत्यन्यान्य
धर्मसंकरादात्मा जानात्यहं जानामीति ॥ इउच्यते ॥ तथा च तन्मध्यस्य ज्ञत्वं बुद्धेश्च [illegible] भवतीति
समुदायार्थः ॥ ९ ॥ स्वरूपं चात्मनो ज्ञानं ननु बुध्या हि निरात्मनि ज्ञानमुत्पाद्यते ततः कथमिह मुच्यते
आत्मैव तन्न बुद्ध्या वध्यस्य तदिति तत्राह स्वरूपं चेति ॥ स्वरूपं चात्मनो ज्ञानं नित्यं ज्योतिः श्रुतेर्यतः
न बुध्या क्रियते तस्मान्नात्मनान्येन वा सह ॥ १० ॥ ज्ञानमात्मनः स्वरूपं तदेव ज्योतिः ज्योतिरात्मै
वास्य ज्योतिरत्रायं पुरुषः स्वयंज्योतिः साक्षी चेता [illegible] इति श्रुतेः ॥ अतश्च नित्यमेव यतस्तस्मान्न बुध्या ज्ञा
१८१ नं क्रियते ॥ आत्मना वान्येन वा चक्षुरादिना ज्ञानं सहकारिणा न क्रियत इत्यर्थः ॥ ११ ॥ बुध्यात्मनोरन्यो १८१
न्यधर्माध्यासेन व्यवहार इत्युक्तेऽर्थे दृष्टांतमाहाहमिति ॥ देहेऽहं प्रत्ययो यद्वज्जानातीति च लौकिकः ॥

१९ १९

प ५

वदंति ज्ञानकर्तृत्वं तद्वद्बुद्धेस्तथात्मनः ॥ देहस्य रूपादिमत्त्वेन घटादिवदहंप्रत्ययायोग्येऽपि देहे देव
त्तनामधस्य यथाहं मनुष्यः कृशः स्थूल इत्यादिरहंप्रत्ययो दृश्यते तथा बुद्धेर्जडत्वेन ज्ञातृत्वायोग्यत्वेऽपि
विदाभासस्याध्यासाज्ज्ञातृत्वमारोप्य जानातीति लौकिका वदंति व्यवहरंति ॥ दार्ष्टांतिकमाह तथा
त्मन इति ॥ विकाररहितस्याप्यात्मनो विकारिचित्ताविवेकादिकारित्वादिर्म्मैः [illegible] इत्यर्थः ॥
२८५ यथा स्थूले देहे यद्वदहं प्रत्ययो मनुष्योऽहमित्येवमादिरहंप्रत्ययायोग्येऽपि अवक्रियते सर्वै
र्लौकिकैः शास्त्रसंस्काररहितैः देवदत्तो जानाति मनुत इति च देहस्येव ज्ञातृत्वं वदंति तद्वद्बु
द्धेर्न कर्तृत्वं तथात्मनो ज्ञानाश्रयत्वं विकारवत्त्वं च व्यवहारास्पदं न वतीत्यर्थः ॥ १२ ॥ ननु लौकि
कज्ञानस्योत्पत्तिविनाशोपलब्धेर्न ज्ञानमात्मना क्रियत इत्याशंक्य तत्कथं नित्यं ज्ञानमात्मस्वरू
पमित्युक्तमित्यत आह ॥ बोद्धेत्विति ॥ बोद्धेस्तु प्रत्ययैरेवं क्रियमाणैश्च चित्रितैः ॥ प्रतिभाताः क्रियंते
ज्ञानमिव सादृश्यात् लौकिकाज्ञाना ॥ १३ ॥ एवं सर्वलौकिकप्रकारेण तं बुध्यात्मनोरध्यासाच्चित्तेऽर्थः

प्रमाण ४

याप्त्या विदिच नासमाने बौद्धैर्बुद्धिप्रतनेः क्रियमाणेः प्रत्ययैर्दलि विशेषेर्मोहितास्तास्ताः क्रिया
जनाज्ञानं क्रियते जायत इत्याद्युर्वदंति तेषां बुध्यात्माऽविवेककृत एवापराधो न तु ज्ञानं क्रियते तथा
स्तित्प्रत्यययोस्तलि विना ग्राह्ययोरसाहित्यकृतयाऽसिद्धिप्रसंगादिति भावः॥ नन्वयस्मादेवं विचार्यमा
णोऽसिद्धकोटस्थस्यात्मनो न विकारित्वं प्रमाणिकं यस्माद्बुद्ध्यनमात्मस्वरूपत्वं श्रवणान्नि
त्यमेवेति न केनापि क्रियते यस्माद्बुद्धिसंसर्गं विनात्मनो नग्नरत्वमुपलभ्यते सुषुप्ता
वदर्शनात् बुद्धिश्चनात्मनः पृथग्भूतोऽरत्वाद्याकारोपलभ्यते तस्मादात्मबुद्ध्योस्तस्यात्मा
सानामविवेकाद्यथाप्रसिद्धमेव व्यावहारिकं बुध्यात्मनोरेकत्वं गृहीत्वा जानासीत्यपदे
शउपपद्यते न पारमार्थतो मुख्यमन्यदा संबंधनमस्तीति प्रकृतमुपसंहरति॥ तस्मादिति॥ त
१८२ स्मात् ज्ञानासंबुद्धीनामविवेकात्प्रवर्तिता॥ जानातीत्यादिशब्दाश्चप्रत्ययायावत् प्रमतिः॥ तद् १८२
जानातीत्यादिशब्दश्चतदनंतरभावीतद्विषयः प्रत्ययश्चयाचतत्संस्कारजास्मृतिः साचेति

२० २०

त्रयोर्थाः ज्ञानासंबुद्धीनामविवेकात्प्रवर्तिता इति योजना॥ ननु ज्ञानासंबुद्धीनामविवेक
मूलः सर्वो व्यवहारो न पारमार्थिक इत्युक्तमयुक्तं दृष्टांतेन स्पष्टयति॥ आदर्शेति॥ आदर्शानुविधा
त्वं छायायामुपलभ्यते मुखे बुद्धिधर्मानुकारित्वं ज्ञानासमप्युपलभ्यते॥७॥ छायायाः मुखानास्य
यदादर्शानुविधायित्वं तन्मुखेऽप्युपलभ्यते यथेति शेषः॥ तथास्मत्स्वविदानामसम्य
बुद्धिधर्मानुकारित्वं ज्ञेऽप्यात्मनो व्यपते इत्यर्थः॥७॥ यस्मादेवं स्वविदनासावि
विक्ता बुद्धिस्तस्मात्तस्याग्रणामेव ग्राहकत्वप्रतिभासस्सिद्धिरित्याह॥ बुद्धेरिति॥ बुद्धेरत्पु
प्रत्ययास्तस्माद्भानाभासेन दीपिता॥ ग्राहकाइवभासंते दहंती वोल्मुकादयः॥७॥ एवमात्मास
विकेपदार्थस्वरूपाज्ञानादपाता किं कारणं व्यामोहो ज्ञानं क्रियत इति॥ तथा बौद्धानामपि बुद्धि
व्यतिरिक्तो ग्राहको नास्तीति व्यामोह एवेत्याह॥ स्वयमेवेति॥ स्वयमेवात्मनात्मानं ग्राहकोऽस्व
यमेव च॥ इत्येवं ग्राहकास्तीत्वं प्रतिषेधंति सौगताः॥७॥ स्वयमेव च प्रत्यया इति शेषः॥८॥

यद्येवंप्रत्ययानांग्राहकमन्यंस्थिरमनादृत्यप्रत्ययमेवग्राह्यग्राहकाकारंबौद्धमन्यंतेतद्धेतु
न्मतस्यानुभवानुसारित्वाद्धानासानभ्युपगमेकथंतेनिराकर्तव्याइत्याशङ्क्यायेनस्वरूपंप्रच्छति
यद्येवमिति॥यद्येवंनान्यद्रूपास्तेकिंतत्कारणमुच्यतां॥नावान्नावौद्धितेषांयेनान्यग्राह्योसत्ताय
द्विध्यतेप्रत्ययानान्यद्रूपाःअन्येनसाक्षिणानित्यसिद्धेननग्राह्याइतियद्येवंबौद्धावृत्ति
॥तन्मतखारणंकिमस्तितदुच्यतांइत्युक्तेस्वरूपस्यप्रत्याहत्नावान्नावावित्तितेषांप्रत्यया
नांयौनावान्नावौनस्तिविनाशौसत्तास्वतःसिद्धेनसाक्षिणान्येननग्राह्यौयद्यपितद्यपि
यस्मिन्प्रत्ययानांनावान्नावौसोहमितिप्रत्यभिज्ञाबलात्तेषांग्राहकोन्योधीस्थाय्यात्मा
सिध्यतीतिकिमात्मासकृत्स्ननयेतियोजना॥७२॥एवंस्वरूपेणोक्तेनेतावताबौद्धोवारयितुं
१८२ क्यतइतिद्रूपयति॥एतदपीति॥अन्वयीग्राहकस्तावासितपेतदपितत्समं॥अवित्तित्वस्यतु
स्यत्वादन्यस्मिन्ग्राहकेसति॥७४॥एतदप्यप्रत्यभिज्ञानसिद्धमपिग्राहकरूपंतत्समंप्रत्यय १८२

२१ २१

ज्ञा ४

समंजउमेवेत्यत्रहेतुमाह॥अवित्तित्वस्येति॥अयमर्थः॥प्रत्ययग्राहकप्रत्यभिज्ञासिद्धोपिग्रा
हकःअप्रकाशःस्वप्रकाशोवा॥आद्यंप्रत्याह॥अवित्तित्वस्येति॥अन्यस्मिन्ग्राहकेऽसतिग्राह्य
कोटिपतितत्वेनजाड्यापरिहारात्स्वयमप्यसिद्धःकथंप्रत्ययानांग्राहकःइत्यर्थः॥अथवाअन्यस्मि
न्ग्राहकेऽसतिस्वतःसिद्धेसाक्षिण्यविद्यमानेप्रत्ययस्यापिअवित्तित्वस्यतुल्यत्वाद्ग्राहक
त्वासिद्धिरित्यर्थः॥द्वितीयेस्वप्रकाशस्यसाक्षिणोनिर्विकारत्वादान्नासमसिद्धिरिति॥६९॥अ
स्वप्रकाशसाक्षिण्यसतिप्रत्ययानांनावान्नावासिद्धिश्चेत्तर्हिसाक्षिसान्निध्यमात्रेणैवतत्सिद्धे
कृतमात्मासाभ्युपगमेनेतिशंकते॥अध्यक्षस्येति॥अध्यक्षस्यसमीपेतुसिद्धिःस्यादितिचेन्म
तं॥नाध्यक्षेऽनुपकारित्वादन्यत्रापिप्रसंगतः॥७५॥तत्रस्वतन्त्रंकिंसाक्षिसन्निधानमात्रंप्रत्यय
सिद्धिहेतुःकिंवातत्कृतविशेषयोगोवापीतितत्रद्वितीयंतावद्दूषयति॥नेति॥निर्विकारेध्यक्षेउ

DR BHAU DAJI

पकारित्वानिरूपणादित्यर्थः॥ पागंतरे अध्यस्ते साक्ष्येऽहंकारादावनुपकारित्वादुपकारपरत्वा
त्यात्तिशयाजनकत्वादित्यर्थः। प्रथमं दूषयति। अन्यत्रापीति साक्षिणः सर्त्तया सर्वत्र सदासा
न्निधाविशेषात्कष्टलोष्टादीनामपि सिद्धिप्रसंगादित्यर्थः॥७५ एवमाभासानभ्युपगमे वोऽन्या
रिमतसाम्यदोषपरिहारानुपपत्तिं स्वयूथ्यं प्रत्युक्त्वाहाग स्वीयो बंधमोक्षव्यवहारोपि तेषां न सि
ध्यतीति वक्तुं विकल्पयति॥ अर्थीति॥ अर्थी दुःखी च यः श्रोता सत्वध्यस्तोऽथवेतरः। अध्यस्तस
स्य दुःखित्वमर्थित्वं च न ते मतं॥७६ यो दुःखित्वेन मोक्षार्थित्वेन च प्रसिद्धोऽनुरूपदेशश्रोता स एवा
ध्यस्तो मतस्ततोऽन्यो वेति विकल्पार्थः। आद्ये निरनुग्रहाध्यस्तवादिनः तवायं सिद्धांतप्रसंग इति दूष
यत्यध्यस्तस्येति। आत्माभासानंगीकारवादिनस्ते द्वारान्तावादविघातस्तत्कार्यसंबंधासिद्धेस्तेन च वि २८४ २२
नार्थित्वाद्यसिद्धेरात्माभासाभ्युपगमप्रसंग इत्यर्थः॥७६ द्वितीयं दूषयति। कर्त्रेति। कर्त्ताध्यस्तः स इस्मी

तिनैव सङ्ग्रहमर्हति। सदैवासीति मिथ्योक्तिः श्रुतेरपि न युज्यते॥७७ श्रोतुरर्थिनोऽध्यस्तस्य
चेन्नेदंपक्षे कर्त्रो कर्तृत्वादिधर्मको विकारी श्रोता जडवर्गपतितत्वात् सदहमध्यस्तोऽस्मीति स
ङ्ग्रहं सदादिशब्दनिर्दिष्टब्रह्मात्मग्रहं नार्हतीति विरोधादित्यर्थः। यद्वा सदध्यस्तो निर्विकार आत्मा द
मस्मीति सङ्ग्रहं यथार्थबोधं नार्हतीति न सन्तत इत्यर्थः। श्रुतिबाधप्रसंगाच्चायं पक्षो न युक्त इत्याह
सदेवेति॥ चिदाभासानभ्युपगमपक्षे बंधमोक्षानुपपत्तिमुपपाद्य स्वपक्षे तदुपपत्तिमाह। अविवि
क्तेति। अविविक्तोऽन्ययं वक्ति श्रुतिश्चेत्स्यादग्रहस्तथा॥ अस्मरस्तु विविक्तैव त्वमेवेति वदेद्यदि॥७८
प्रत्यस्यान्वयि निष्कृष्टमुक्तदोषः प्रसज्यते। अन्वयमात्मनिमहंकारं च दृश्यमानाभासद्वारेण विवेकापन्न
मविविक्तमविवक्षमहंत्वाय यथाप्राप्तमर्थित्वाद्युपादाय श्रोतृत्वेन स्थितं प्रति तत्त्वमसीति श्रुतिर्व
त्यात्मतत्त्वमिति चेत्सदृशः तदा तथा। यथाश्रुतमुक्तस्याग्रहोऽग्रहणं स्यादित्यिति योजना। अथ मतिप्राय

ऽर्थं तच्छरणाहो विद्यानाशोदये सति तज्जत्वविकाराध्यासाद्विविक्ताहंकारः आत्माऽपि त्वादिसंप
न्नो मुमुक्षुत्वं प्रतिपद्यते। तत्तथैवाविवेकावस्थं त्वमित्यनूद्याज्ञानासद्वारा नासा सांतश्छरणसाहि
तयालक्षयित्वा तेजोवन्नादिकारणत्वेनोपलक्षितं सद्ब्रह्म वाच्यं ब्रह्म तदित्यनूद्य जीवेनात्मनाऽना
मरूपसंघातानुप्रविष्टत्वेनापरोक्षप्रत्यक्षया लक्षयित्वा त्वं तदसीति श्रुतिरुपदिशतीति आत्मतत्त्व
मिति तत्पायग्रहणमुपपद्यते इति। अहंकार एव श्रोता स्यात् किमात्मनाऽऽत्माभ्युपगमेनेति संभव
मतं मनूद्य दूषयति। अस्मदस्त्विति॥ प्रत्ययान्वय्यहंकारः यदि वाक्यमस्मदः प्रत्यक्षैतस्मादहंका
रं विविच्यैव त्वमेवेति। प्रत्ययान्वयिनिष्ठत्वं वेदेन दोषो दोषः श्रुतेर्मिथ्योक्तित्वप्रसंगरूपः।
प्रसज्यत इत्यर्थः॥७८॥ तर्ह्यहंकर्तृविषयोऽप्युपदेशोऽध्यक्षे पर्यवस्यतीत्याशंक्यात्मनाऽनभ्युपग
मे तदपि दुर्घटमित्याह। त्वमिति॥ त्वमित्यध्यक्षनिष्ठस्यैवेदमध्यक्षयोः कथं॥७९॥ संबंधो वाच्य
एवात्रयेन त्वमिति लक्षयेत्॥ दृष्टृदृश्यत्वसंबंधोऽयं यदध्यक्षेऽक्रिये कथं॥८०॥ त्वमिति पदं अहंका

२८५

२२

प२

रवाचि सदध्यक्षं बोधयति चेदहंकाराध्यक्षयोः संबंधग्रहणमंतरेण वाक्यार्थबोधानुपपत्तेरहमध्यक्षयोः
संबंधोऽत्र वाच्य एव स कथमुपपद्यते येन संबंधेन त्वमिति पदमध्यक्षं लक्षयेदित्यर्थः॥७९॥ अस्ति संबंध इ
त्याशंक्य परिहरति। दृष्टृदृश्यत्वेति॥ यदि दृष्टृदृश्यसंबंधोऽभ्युपगम्यते तदापि संबंधग्रहणमनुपपन्नं
अहंकारस्य जडत्वात्संबंधग्रहणायोगादध्यक्षस्य तद्ग्रहणमिति वृत्त्यभावमक्रिये निर्विकारेऽध्यक्षे कथं सं
बंधग्रहणकर्तृत्वमित्यर्थः॥८०॥ मास्तु संबंधग्रहणं तथापि तादात्म्योपदेशोऽत्र विद्यतीति शंकामनूद्य
दृष्टविरोधान्नैवमिति परिहरति॥ अक्रियत्वेपीति। अक्रियत्वेपि तादात्म्यमध्यक्षस्यान्वेषादि। आत्मा
ऽध्यक्षो ममास्तीति संबंधग्रहणे न धीः॥८१॥ यथा लोके घटस्यैवाज्ञानमिति घटज्ञानयोः संबंध
ग्रहणेऽस्तु ज्ञो घट इति वाक्यात्तादात्म्यधीर्नेति तथा ममात्माध्यक्षोऽस्तीति संबंधग्रहणे सति न तादा
त्म्यधीः श्रुतितो जायत इत्यर्थः॥८१॥ एवमत्रात्मा तन्नैदृश्य एतद्द्धेति शास्त्रार्थस्याहंकाराध्यक्षयोः सं
बंधग्रहण इति शंकामुत्थाप्य निराकरोति। संबंधग्रहणमिति। संबंधग्रहणं शास्त्रादिति चेन्नान्योऽन्यसेनहि

॥ पूर्वोक्ताः स्युस्त्रिधा दोषा ग्रहो वा स्यान्ममेति च॥८२॥ न हि स्युक्तं मनसि पूर्वोक्ता इति। अहंकारस्य ज-
डत्वात्संबंधग्रहीतृत्वं न घटते नाप्यध्यात्मस्य निर्विकारत्वादिति। दोषा दोषा जडं प्रति अतो बोधकत्वा-
संभवस्तृतीयो दोष इति त्रिधा दोषाः स्युः। यदि कथंचित्संबंधग्रहणं कल्प्येत तत्रापि ममाध्यात्मोऽस्ती-
ति संबंधग्रहणं स्यान्नत्वहमेवाध्यात्मोऽस्मीति तादात्म्याध्यासानंगीकारात्। चकारान्ममाध्यात्मोऽस्तीत्य-
पि न घटते ऽहंकारस्य जडत्वादित्यनुच्चयः॥८२॥ एवमात्मानात्मनोः परपक्षे संबंधासिद्धिमुक्त्वा स्वप-
क्षे मिथ्यातादात्म्यसंबंध इति दर्शयति॥ अदग्धिरिति। अदग्धिर्दग्धृरूपेण जाति बुद्धिर्यदा तदा प्र-
त्यया अपि तस्याः स्युस्तप्तायो विस्फुलिंगवत्॥८३॥ यदाऽदग्धिरचेतना बुद्धिर्दग्धृरूपेण सह जाती-
त्यनुपगम्यते तदा तस्या बुद्धेः प्रत्यया हंत्वयोऽपि तप्तायो विस्फुलिंगानामग्न्यात्मत्ववत् दग्धृरूपाः
१८६ स्युरित्यर्थः॥८३॥ अस्मिन्पक्षे लौकिकवैदिकव्यवहारसिद्धिरपि स्युसंपादयत्याह॥ आभास इति। आ- १८५
भासस्तदभावश्च दग्धुः सोऽज्ञो न वान्यथा॥ लोकस्य युक्तितः स्यात्तां तदृश्यतथा सति॥८४॥ सोऽज्ञो

२४ २४

उप २

ऽवधिभूताया दग्धुश्चिदात्मनः सकाशादेव लोकस्याभासस्तदभावश्च प्रत्ययश्च तदभावश्च स्यात्तां यु-
क्तितो युक्तेरुपपत्तेर्न वान्यथा तथा सति आभासानभ्युपगमे सति प्रत्ययभावाभावयोः प्रत्यययाथात्वायो-
गात्ततोऽसंतमेव विवक्षुस्य चात्मनस्तद्ग्राहकत्वानुपपत्तेराभासद्वारानुसंबंधादात्मनो बुद्धिवृत्तिभावा-
भावसाक्षित्वमुपपद्यते॥ बुद्धेश्च तद्ग्रहणात्मग्राहोऽहमस्मीत्युपपन्नः स्यादित्यर्थः॥८४॥ तप्तायो विस्फुलिं-
गवदिति दृष्टांताभिधानादात्मनो विकारप्राप्तिं शंकते॥ नन्वेवमिति॥ नन्वेवं दग्धिसंक्रांतिरयः पिंडेऽग्निव-
द्भवेत्॥ मुखाभासवदित्येतदादर्शेति निराकृतं॥८५॥ अयः पिंडेऽग्निसंक्रांतिवद्रूपे दग्धिसंक्रांतिर्विकारो
भवेदित्यर्थः॥ परिहरति॥ मुखाभासवदिति॥ तदेतच्चोद्यमादर्शे मुखाभासवदिति दृष्टांतप्रबंधेन नि-
राकृतमित्यर्थः॥ यथा मुखस्यादर्शे प्रतिबिंबितस्य तत्त्वेन रूपेण मिथ्यात्वं तथा बुद्धौ प्रतिबिंबित-
स्य चिदात्मनो बुद्धिधर्मत्वेनावभासो मृषेति पूर्वमुक्तं सर्वमिहानुसंधेयमिति भावः॥८५॥ तर्हि कथं त-
प्तायो विस्फुलिंगदृष्टांत उक्तस्तत्र विकारप्रसिद्धेर्दार्ष्टांतिकाननुरूपत्वादित्याशंक्य विवक्षितांशस्य
हापि संभवान्नैवमित्याह॥ हस्तायइति॥ हस्तायो रोहिताभासमित्येतद्दृष्टमुच्यते॥ दृष्टादार्ष्टांतितु

सूक्ष्मवर्ण मयो लोहितानामं लोहितवर्णमिव नाम तद्वत्येतद्देतावद्देवदृष्टं दृष्टांतमभ्युपेते जडायाबुद्धेश्चैतन्याभास
इत्यर्थः सर्वांशेनाप्यमनुपपन्नमित्याह दृष्टदार्ष्टांतेति। प्रप्रकाशादात्मनो मुखादेर्दृष्टांतान्वयः संगादिति
पि॰ स्यत्वं न तु सर्वात्मनाऽचित्त॥८०॥ दृष्टांते विवक्षितमंशमुक्त्वा दार्ष्टांतिके तथाविधमंशं दर्शयति तथे वर्दृ॥१॥
वेति॥ तथैव चेतनाभासं चित्तं चेतन्यवन्नवेत्यमुखाभासो यथा दर्पणे आभासश्चोदितो मृषा॥८१॥ चेतना
याश्चाभासो यस्मिंस्तच्चेतनाभासं चित्तं चैतन्यवच्चेतनमिव न चेत् सचाभासो यथा दर्पणे मुखाभासो
विद्वत एवमेवेहापि दृष्टः॥ आभासश्चोपाधिस्थतया दर्पणमानो मृषा मिथ्यास्तु दितउक्त एवेत्यर्थः॥८२॥
कस्माच्चिदाभासमात्रश्चित्तस्य चेतनता वनाभासोऽभ्युपगम्यते न स्वत इति शंकां न कार्या तत्र प्रमाणम्भा
ययोरभावादित्याह॥ चित्तमिति॥ चित्तं चेतनमित्येतच्छास्त्रयुक्तिविवर्जितं। देहस्यापि प्रसंगः स्यात्चेतु
रादेस्तथैव च॥८३॥ स्यत्तिविनाशवत्तयाऽन्यदेहस्यापि चित्तस्य चेतनता स्वभावस्यात्तदातिप्रसंग
श्चदुष्परिहरस्स्यादाह॥ देहस्येति॥८४॥ दृष्टापत्तिमाशंक्य परिहरति॥ तदपीति तदप्यस्त्विति चेन्न
न लोकायतिकसंगते॥ न च धीदेहिरस्मीति यथाभासो न चेतसि॥८५॥ अचेदिनामसंगादित्यर्थः।
(९८) किंचाभासानभ्युपगमेऽहमाकारावृत्तेर्ब्रह्मास्मीतिश्रोगे चेकाक्यजन्यमैक्यज्ञानं न सिध्येदित्याह॥ (८)
न च धीरिति। चेतसि यथाभासो न न वेत्तदा दृश्ये ब्रह्मास्मीति धीर्न न वेत्केवलस्य चित्तस्य जडत्वाच्चिन्मा

२५ हि॰ २५

व्य॰

त्रस्य च कूटस्थत्वादित्यर्थः॥८६॥ ब्रह्मास्मीति धियोऽभावे कात्रहतिरित्यत आह। सद्ब्रह्मास्मीति सद्ब्रह्मे
ति धियोऽभावे ऽर्थं स्यात्तत्त्वमस्यपि। सुषुप्तवदस्मादिनागच्छे स्यादर्थवदिदं वचः॥८७॥ अपिरवधारणार्थः
तत्त्वमसि वाक्यमैक्यमाह केऽमुक्त धियोऽभावे अपार्थमेवाप्रमाणमेव स्यादित्यर्थः॥ अस्तु वैयर्थ्यं तद्वाक्य
श्रोतॄणां सर्वेषां जटितिब्रह्मास्मीति बुद्ध्युत्पत्त्यदर्शनादित्याशंक्याह॥ सुषुप्तवदस्मादिति॥ अविकारिणमनि
ज्ञनक्रोवेदइति। न्यायात्तस्य कूटस्थचैतन्यवतएव वाक्यार्थबोधेऽधिकारादात्मानात्मविनागज्ञानव
सेवनुसारं वाक्यमर्थवत्सर्वान्प्रति जटिति इत्यर्थः॥८८॥ एतमेव सुषुप्तदृष्टान्तं विवेकं दर्शयितुमुपक्रमते॥ ममे
दमिसादिना॥ ममेदं प्रत्यययोर्ज्ञेयो सुषुप्तेऽ वनसंक्षयः॥ अहमित्यस्मादिष्टः स्यादयमस्मीति चोन्नयो॥८९॥ स्मा॰
इदं पुत्रादि ममेति प्रत्यययोः सुषुप्त घनात्मन्येव ज्ञेयो पुत्रादि बाह्यार्थस्य देहाध्यासप्रणालिकयैवास्मदर्थेऽवे
शात् स्वार्थं बंधस्य नात्मधर्मएवेति युक्तमुक्तं ममेदमिति प्रत्यययोः सुषुप्ते वेति। न संक्षय इति सर्वोत्सुषुप्त
ता॥ अहमिति प्रत्ययस्याभासद्वारात्मन्यहमावहारिके स्मदात्मनि अहंकर्तरीष्टः स्यादहमित्येवोल्लेखवदरा
पं॰ नात्मा देहादिरस्मीति चोन्नयोरात्मानात्मनो प्रत्ययः इत्यर्थः॥९०॥ आत्मानात्मविषयाणां प्रत्ययानाम॰

१८८ कीर्णतया च विषयानुत्कोत्कर्षं विवेकसिद्ध्यर्थं तेषां गुणप्रधानभावेन विशेषणविशेष्यभावो यथा स्यात्
इत्याह ॥ अन्योन्येति ॥ अन्योन्यापेक्षया तेषां प्रधानगुणतेष्यते । विशेषणविशेष्यत्वं तथा ग्राह्यं हि युक्ति-
तः ॥ एतदस्पष्टं ॥ विशेषणविशेष्यत्वं युक्तितो ग्राह्यमित्युक्तमेव विविच्य दर्शयति ॥ ममेदं धनमिति ॥ ममेदं
धनमप्येतन्मध्यमस्य विशेषणं ॥ धनी गोमान्यथा तद्वद्देहो हं कर्तुरेव च ॥ एवं मध्यमस्य शब्दस्योक्तमध्येति ।
दृष्टस्यास्मदर्थस्यात्मनो विशेषणं ममेदं ममेति च इदं मनुष्योहमिति शरीरापेक्षयेत्यर्थः ॥ तत्रोदाहरणं
धनी गोमान्यथेति ॥ यथा धनादीदं त्वास्पदं तद्देहापेक्षया ममत्वास्पदं महं कर्तुः सिद्धं तद्वत्स्थूलदेहो दं क
र्तुरात्मनो बाह्यधनाद्यपेक्षयाहं त्वास्पदतया विशेषणमेवेत्यर्थः ॥ चकाराद्रात्मनोपि सोहं ज्ञातेत्यादौ बुद्धे
रेव स्थूलदेहमपेक्ष्य प्रधानभूतोप्यहं कर्त्ता विशेषणमिति योज्यं ॥ एवं सर्ग तत्सर्वं अप्रधानसत्तां प्रका
शकं तत्रारोपितं सत्तस्य सदा विशेषणं भवेदपि तेन साक्षिणा न संस्पृश्यते इत्याह गुणयोर्निरपेक्षसि
द्धः सन्नुक्तमेत्सेति शुद्धस्य सदा द्विनाग्रस्य भवेद् वाक्याद्वाक्यार्थज्ञानमिति प्रमाणमेव वेदांतवाक्य
मिस्यान्निप्रेत्योपसंहरति ॥ बुद्ध्यारूढमिति ॥ बुद्ध्यारूढं सदा सर्वं साक्षिकं तेन च साक्षिणा तस्मात्सर्वविज्ञा १८८

२६ २६

सोज्ञः किंचिदप्यस्पृश्यन्सदा ॥ एधा ॥ बुद्ध्यारूढं बुद्धिद्वृत्तिकोडीकृतं सर्वं देहतत्संबंधि विषयजा
तं साक्षिणो विशेषणं गुणभूतमिति योजना । न केवलमेतावत् किंच साहंकर्त्रादिकं तत्साक्षिणा सम
न्सास हितः सूक्ष्मोपि संघातः साक्षिणो विशेषणं तस्मिन्नध्यस्ततया तद्भावास्पत्वात्तादात्म्य ॥ यस्मा
देवं परमार्थतः किंचिदप्यस्पृशन्सदा सर्वं स्वाभासद्वारा भासयति । तिस्र ... विना स स्तस्मात् ज्ञो ज्ञान
स्वरूप एव सदात्मेति विवेको युक्त इत्यर्थः ॥ एवमेषविवेकिनां मार्गो विपरीतं त्वविवेकिनां हेत्वा राज
प्यात्मनो विशेषणत्वप्रतीतेरित्याह ॥ प्रतिलोममिति ॥ प्रतिलोममिदं सर्वं तथोक्तं लोकबुद्धितः अत्र
विवेकधियामस्ति नास्ति सर्वं विवेकिनां ॥ एवं बाह्याद्यपि हृतं देता लोकस्तस्य बुद्धिर्लोकबुद्धिस्तस्या इ
ति वाख्यार्थ . सत्वप्रधानं लोकबुद्धिमपेक्ष्येति यावत् तथा च बाह्यार्थप्रधानो हस्तं यदिदं यथोक्तं विशे
षणविशेष्यादि सर्वं प्रतिलोममनात्मत्वं तत्तद्विवेकधियां विवेकज्ञानशून्यानां दृष्ट्यास्ति वर्त्तते विवेकि
नां तु दृष्ट्या सर्वमेतद्विशेषणादिकं द्रूपरूपं नास्ति न वर्त्तते ऽतो ऽविवेकिनां बुद्धिमात्मन्यवतारयितुं
विशेषणविशेष्यादिप्रबंधकल्पना यथाप्रतीति सत्तामादाय क्रियते ऽध्यारोपापवादन्यायेनेति भावः ॥ १

नन्वयव्यतिरेकाभ्यामेवं सर्वसंसारविनिर्मुक्तात्मावगमात्किं वाक्येनेत्याशंक्याह। अन्वयव्यतिरेकौ हि
ति॥ अन्वयव्यतिरेकौ हि पदार्थस्य पदस्य वा। स्यादेतदहमित्यत्र युक्तिरेवावधारणे॥ ५५॥ पदार्थस्या
न्वयव्यतिरेकौ नाम आत्मपदार्थो द्रष्टा साक्षी न कदापि दृश्यः साक्षी वा न वर्तितस्यात्तु स्वप्रकाशसन्मात्र
तया स्वतःसिद्धत्वादत्तानन्याश्रयत्वान्न कदापि कस्यापि विशेषणमात्मायदृश्यं चाहंकारादि विषयांत
तदन्याधीनप्रकाशसत्ताकतयाऽन्याश्रयं सत्तु सदा विशेषणतावं न व्यभिचरति तस्मादनागमापायि
दृगात्मस्वरूपं सत्यं शुद्धत्वादिवत्तद्विपरीतमसत्यं जडत्वादिवदिति सन्दर्तं जडं परिछिन्नं पराधीनं परागर्थ
म्यादृत्तं सत्यज्ञानानंतप्रत्यगानंदरूपं आत्मेति विवेचनं। पदस्यान्वयव्यतिरेकौ नाम आत्मा चेत्‌
प्रज्ञानं ब्रह्मसहित्यादिपदनिकृत्तैस्ताद्युपपदविधुराणि केवलं सैवात्मनः समर्पकाणि न विशेषणांत
विशिष्टविषयाणि अभ्यासामर्थ्यात्कर्ता भोक्ता ज्ञाता द्रष्टा श्रोता वक्ता गंता हर्षः स्थूलः संसारी नित्यं न केव
लदृश्यात्मविषयाणि अन्याधीनक्रियाद्युपरागदशायामेव प्रयुज्यमानत्वादिति विवेचनं एवं पद
स्यपदार्थस्य चान्वयव्यतिरेकावितिरैतदहमित्यत्रास्मदर्थविषयेऽवधारणे युक्तिरेव स्याद्विवेका

१८२ २१ १८२ २७ सू

वधारणोपायमात्रं स्यान्न तु वाक्यार्थपदार्थैक्ये व्यापारोऽस्येत्यर्थः। तस्मादेतावतापि विवेकेन देह
दिवैलक्षण्येऽवधारितेऽपि कोऽहं तदाहीति जिज्ञासायामनुदत्तं तत्त्वमसीति वाक्यं जिज्ञासितस्वरूपवि
शेषसमर्पकमवश्यमपेक्षितमेवेति भावः॥ ५६॥ किं चावस्थात्रयं परस्परव्यभिचारि चैतन्यात्मतु
न कदापि व्यभिचारीति प्रकारांतरेणात्मानात्मविवेकं दर्शयति॥ नाहमिति॥ नाहमहमस्मि स
स्मिन्सुषुप्तेऽन्यन्मनागपि न वारयति दृष्टिं स्वां प्रत्ययं तु निषेधति॥ ५७॥ अस्मिन्सुषुप्तेऽत्रात्मनि
त्रस्थाने वा मनागपि द्रष्टृत्वस्वरूपातिरिक्तमहं नाहमहं न द्रष्टा वा नास्मीति परामृशन्नज्ञो
न स्वात्मनो दृष्टिं चैतन्यं वारयति। स्वयं तु पुनर्निषेधति। प्रतीयत इति प्रत्यय इति मुसत्ता
प्रमातृप्रमाणप्रमेयात्मकरूपः सर्व एव विशेषो गृह्यते॥ तस्मात्परस्परव्यभिचारितया दृष्टस्वजा
ग्रभ्योऽवस्थाभ्यो मिथ्याभूताभ्योऽव्यभिचारी चिद्रूपः साक्षी सत्य आत्मेति विवेकः सिध्यतीत्यर्थः॥ ५८॥
एवमुक्तावन्वयव्यतिरेकौ शास्त्रसंमतौ न स्वबुद्ध्युत्प्रेक्षामात्रेणकृताविति विश्वासाय शास्त्रमुदाह
रति॥ स्वयंज्योतिरितिसाद्वैना॥ स्वयंज्योतिर्न हि द्रष्टुरित्येवं स विशेषितो॥ कौटस्थ्यं च तथा तस्य

DR BHAU DAJI

१८०
२८

प्रत्ययस्य तु लुप्ततां॥९५॥ स्वयमेवाब्रवीच्छास्त्रं प्रत्ययावगती पृथक्॥ अत्रायं पुरुषः स्वयं
ज्योतिः॥ न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इत्येवमादिशास्त्रं संविदश्चेतनाया अस्तितां सद्भावं
तस्याः संविदः कौटस्थ्यं निर्विकारतां च स्वयमेवाब्रवीदिति संबंधः॥ तथा प्रत्ययस्य प्रमात्रादिभे
दस्य लुप्ततामसत्तां च न तु तद्द्वितीयमस्ति न ततोऽन्यद्विजानातीत्यादिशास्त्रं स्वयमेवाब्रवीदिति
पुनरेवान्वयः॥ एवं प्रत्ययावगती पृथक्संबंधी शास्त्रेणैव विवेचिते इति शेषः॥ प्रत्ययो मा ख्या
तः॥ अवगतिश्चैतन्यं॥९६॥ एवमवांतरवाक्यकृतं युष्मदस्मद्विवेकमुपपत्तितश्च तत्त्वा विज्ञातप
दार्थतत्त्वे पुरुषे महावाक्यं फलवद्विज्ञानं जनयतीत्याह॥ एवमिति॥ एवं विज्ञातवाक्यार्थस्य श्रु
तिलोकप्रसिद्धितः॥ श्रुतिस्तत्त्वमसीत्याद्या श्रोतुर्मोहापनुत्तये॥९७॥ एवमुक्तप्रकारेण श्रुतिप्र
सिद्धितो लोकप्रसिद्धितोऽन्वयव्यतिरेकतश्च विज्ञातावांतरवाक्यार्थे पुंसि सति महावाक्या
र्थत्वेन श्रुतिः श्रोतुर्जिज्ञासोर्मोहापनुत्तये सकार्याविद्यानिवृत्तिप्रयोजनाय सत्त्वमसीत्याद्या ब्र
ह्मत्वमसीत्याद्यापरिश्रुतीत्यर्थः॥९७॥ वाक्यश्रवणमात्रान्मोहापोहे दृष्टांतं पुराणसिद्धमाह ब्रह्मे

स्ता।५

ति॥ ब्रह्मा दाशरथेर्यद्वदुक्त्यैवापानुदत्तमः॥ तस्य विष्णुत्वसंबोधेन यत्नांतरमृच्छिवान्॥९८॥
दाशरथिना रामेण देवकार्यसिद्धये मनुष्यावतारेणाद्येन स्वमाहात्म्याच्छादनं संकल्पपूर्वकं यत्कृतं तदिदं त
मः॥ ब्रह्मणोऽनंतेनत्वीश्वरस्य संमोहः संजनितः तदुक्तं संक्षेपशारीरके॥ संकल्पपूर्वकमनन्यद्युनरेनस्यन
ह विजानत इति कं च न कालमेतत्॥ ब्रह्मोपदेशमुपलंभनिमित्तमात्रं तज्जीवत्समसृजे सद्भूतमस्ति देवकार्यमिति
हि रामस्त्वं विष्णुरसि न स्मार यथा तु नमात्रे इत्युक्ते व ब्रह्मा दाशरथेः संकल्पमात्रकृतं तमो विष्णुत्वाच्छादनरूप
मपानुदत्॥ एवकारार्थमाह स्मेति॥ यत्नांतरं वाक्योपदेश... यदहमानतिरिक्तमित्यर्थः॥९९॥ दार्ष्टांतिकमा
ह॥ अहं ब्रह्मास्मीति॥ अहं ब्रह्मास्मि या निष्ठा ज्योतिषि प्रत्यगात्मनि॥ सैवोक्ता सदसीत्येवं फलं तत्र विमुक्तता॥१॥
एवं शब्दः प्रथमं योज्यः यथायं दृष्टांत एवं सदसीति वाक्येन सा निष्ठा केवलं नानुष्ठापितेति योजना॥
सा का निष्ठेति तामाह॥ अहं ब्रह्मास्मीति॥ प्रत्यगात्मनि परागर्थमीमांसादृते ज्ञाधितेऽत्मनि॥ निरूपाधिकज्यो
तिषि सा हि स्वप्रकाशे स्वभावे अहं ब्रह्मास्मीति निष्ठा लक्षणपर्यवसिता वृत्तिः सैवेत्यर्थः॥ तत्र त्वं तदसी
त्युपदेशमात्रादहं सद्ब्रह्मास्मीति वाक्यार्थज्ञानोदयमात्रे सति विमुक्तता मोहापोहरूपा फलं भवतीत्यर्थः॥

२७१
२८

यद्वा दृष्टान्तस्य दार्ष्टान्तिकमेव विज्ञातवाक्यार्थ इति पूर्वश्लोकः एवं स्थिते दृष्टमं अयं त्वन्यथोस्याप्य
ते॥ ननु दशरथेनैव देव विष्णुत्वोपदेशमात्राद्विष्णुरहमस्मीति ज्ञरीति बोधोदयस्तस्य महामहिमसं
पन्नत्वात्कुपमितनीतनस्य कर्त्तानोक्तस्यादिप्रत्यहा निमित्तमिथ्याप्रत्ययग्रहीतस्योपदेशमात्राद्ब्रह्म
मास्मीति निर्विचिकित्सं ज्ञानं संजायते इत्याशंक्य शोधितत्वंपदार्थस्य पुंसः कृतार्थिसाहित्य एवा
हमादि ज्ञाबलत्वाहित तस्य तत्त्वोपदेशान्नानुपपत्तिरत्रापीति परिहरति॥ अहं ब्रह्मस्येति सदसीत्ये
ववाक्येन सैव निष्ठोक्तेति संबंधः॥ अन्यत्तमानं॥१९॥ एवमवगतपदार्थतत्त्वस्य वाक्यादेव समूलसंसा
रनिवृत्तिफलं ज्ञानं जायत एवेति स्थिते श्रुतेः प्रामाण्यसिद्ध्यर्थं कार्यपरत्वं कस्मिंश्चिदाग्रहो निरर्थ
को विवृद्दनुभवविरोधादित्यभिप्रेत्याह॥ श्रुतमात्रेणेति॥ श्रुतमात्रेण चेन्नस्यात्कार्यं तत्र नवेऽर्बुवं॥
व्यवहारास्तु रागपीष्टः स ज्ञानः स्वयमात्मनः॥२॥ यथोक्तन्यायेन वाक्यस्य श्रुतमात्रेण चेदुक्तफलं विज्ञा
नस्यात्तत्र तदाकार्यं कल्प्यं कुर्वमवश्यं जवेदन्यथाऽर्थवादादिवाक्यवत्प्रामाण्यानुपपत्तेः इह तु
न तथाकल्प्यमस्ति फलस्य सद्य एवानुभवसिद्धत्वादित्यर्थः॥ स्वयंज्योतिर्न हि दृष्टुरिति श्लोके दर्वम

हश ४
२७१
२८

र्द्ध श्लोकेऽधिकं स्थितं॥ इहत्वायमर्द्ध एव श्लोक इति संग्रहणनाय॥२४॥ किंच सिद्धे ब्रह्मात्मनिश्च
यस्य प्रामाण्यं नाम विपर्यासग्रहणं वा निष्फलत्वं वा संशयग्रहणं वाऽनुत्पत्तिलक्षणं चेति
विकल्प्याक्षेपेण दूषयति॥ व्यवहारादित्यादिना॥ नाद्यः अस्माद्व्यवहारादहं ब्रह्मास्मीति ज्ञानस्योप
देशाद्व्यवहारास्तु रागोऽर्थमप्यात्मनः स्वयमेव सद्भाव इष्टो बाध्यत्वात् वास्त्यस्माद्यथावस्थितात्मस्वरूप
स्य वस्तुत्वान्निवेदनान्न शुक्तिरूप्यज्ञानवदप्रामाण्यमित्यर्थः॥२॥ न द्वितीयोऽनुभवविरोधादित्याह॥ अ
शनायादीति॥ अशनायादि निर्मुक्त्यै तत्काला जायते प्रमा॥ तत्त्वमस्यादिवाक्यार्थ त्रिषु कालेष्वसंशय
॥३॥ तत्कालात्तवाक्यश्रवणकाल एव कालो यस्याः सा तत्काला प्रमा अशनायाद्युपलक्षितसंसारस्य
निर्मुक्त्यै निवृत्त्यर्थं जायते विदुषां प्रत्यहमेवैतदित्यतो न निष्फलत्वशंकावकाश इत्यर्थः॥ तृतीयमप्य
नुभवविरोधेन निराकरोति॥ तत्त्वमसीति॥ असंशयः संशयो नास्तीत्यर्थः॥ स्वतंत्रप्रसादात्प्रतिबंधेति
प्रतिबंधविहीनत्वात्स्वयं चानुभवात्मनः॥ जायेतैव प्रमा तत्र स्यात्तन्नैव न संशयः॥४॥ पदार्थज्ञाने हि
वाक्यार्थज्ञानोत्पत्तिप्रतिबंधस्तद्विहीनत्वादवगतपदार्थस्य पुंसस्तत्र तस्मिन्नेव वाक्यश्रवणका

आत्मन्येव प्रमाजायेतेत्येवं न संशय इति योजना॥ अहं ब्रह्मास्मीत्यादिवाक्यार्थवदनुभवायोग्या-
र्थत्वशंकां वारयति। स्वयं चेति। अनुभवस्वरूपत्वात्स्वयमात्मनः प्रत्यक्षानुमशाक्यत्वादित्यर्थः।
अतो दुष्कलादित्याद्यवदनुत्पत्तिलक्षणमप्रामाण्यं नास्तीति सिद्धं सिद्धे प्रमात्मनि वाक्यस्य प्रामाण्य-
मित्यर्थः।४। एवं प्रमाणस्वरूपनिरूपणेनाहं ब्रह्मास्मीति ज्ञानमुपपाद्येदानीं प्रतिपत्त्यर्थस्यता-
वन्निरूपणेनाप्युपपादयितुं विकल्पयति॥ किं स देवेति। किं स देवाहमस्मीति किं वान्यत्प्रतिपद्य-
ते॥ सदेव चेदहं ब्रह्मः सत्तामुख्यार्थ इष्यताम्॥५॥ तत्त्वमसीतिवाक्यश्रवणसमनंतरं प्रतिपत्ता वदम-
स्मीति किं सदेव प्रतिपद्यते किं वान्यदिति विकल्पार्थः। आद्यमनूद्य तत्र परस्यानिष्टापत्तिरित्याह
॥ सदेव चेदिति। सत्तासत्त्वब्दार्थेनाहं शब्दो मुख्यार्थ इष्यताम्। तदा च सच्छब्दाहंशब्दयोरेकार्थप-
र्यवसानादैक्यात्त्वमेव वाक्यार्थो न संसर्ग इत्यपरोक्षज्ञानसिद्धिरित्यर्थः॥५। द्वितीये दोषमाह॥ अन्य-
च्चेदिति॥ अन्यच्चेत्सदहं ग्राहप्रतिपत्तिर्मृषैव सा॥ तस्मान्मुख्यग्रहे नास्ति वारणं वगतेमिदा॥६॥ प्रत्य- २८२
गात्मनोन्यच्चेत्सत्तदा ग्राहग्राहप्रतिपत्तिरहंग्राह रूपाया प्रतिपत्तिर्मृषैव स्यान्न वेत्तंसंपदादिज्ञानवत्

२० २०

तत्र वाक्यस्याप्रामाण्यमेव प्रसज्येतेत्यर्थः। प्रमाणप्रमेयस्यनाव पर्यालोचनया वाक्यादेवापरो-
क्षं फलवदात्मतत्त्वविज्ञानमुत्पद्यत इत्युपपन्नमित्युपसंहरति। तस्मादिति। इह वाक्ये मुख्यग्रहे स-
ति अवगतेर्यथार्थानुभवस्य वारणं निवारणं नास्तीत्यर्थः। ननु चात्मनः कूटस्थत्वेन प्रतिपत्ते-
त्वानुपपत्तेः फलसंबंधो नोपपद्यत इत्यस्तात्मग्रहे निवारणे साशंक्याह॥ प्रत्यगिति। प्रत्ययी प्रत्यय-
श्चैव यदानाशौ तदर्थता। तत्पोरवितिमत्तार्थेवेत्यन्ये कल्प्यते फलं॥७॥ प्रत्ययी परिणामं तं ऋरणप्र-
त्ययस्तत्सरिणामस्थ यदानाशौ यस्य विदात्मनश्चानाशौ यथा याः स्त्री यदानाशौ तयोस्तदर्थता तच्छेष-
त्वं ततेति यावत्। तस्मिन्नेवेतस्मे विदात्मनि तदानाशकारापलं कल्प्यते किंच तयोः प्रत्ययिप्रत्य-
ययोरवितिमत्वाजडत्वादपि फलसंबंधायोगात्फलस्यात्मसंबंधस्यादित्यर्थः॥७। निर्व्यापारस्यापि
फलसंबंधे दृष्टांतमाह॥ कूटस्थ इति। कूटस्थेपि फलं योग्यं राजनीव जयादिकं॥ तदनात्मत्वहेतुत्वं
क्रियायाः प्रत्ययस्य च॥८॥ ननु राजतद्भृत्ययोः स्वस्वामिभावसंबंधोस्ति राजनि जयादिसंबंधनिमि-
त्तमिह त्वध्यत्ताध्यत्त्ययोस्तादृशस्यादृष्टिनात्कथमयं दृष्टांतः प्रकृते संगतः स्यादित्याशंक्यात्रा प्यस्त्य-

पे५८

धिष्ठानाधिष्ठेयभावः फलसंबंधहेतुरित्याह ॥ तदिति ॥ हेतुभ्यामित्यत्र हेतुत्वाभ्यामिति ॥ भावप्रधा
नतायोज्या ॥ क्रियाह्मात्मिकावृत्तिः प्रसर्थमयतीति व्युत्पत्तेः प्रस्यांतःकरणं साभाससमुत्पत्ते सा
भासवृत्तिवृत्तिमत्तोरिति यावत् ॥ आत्मत्वं हेतुत्वं चात्महेतुत्वे तस्य फलस्यानात्मत्वहेतुत्वे तद्दना
त्महेतुत्वे ताभ्यां तद्दनात्मत्वहेतुभ्यामिति योजना ॥ तथा च क्रियायाः प्रसरणयोर्द्वयोः फलस्वरूपत्वा
भावात् फलोपादानत्वाभावाच्च तद्व्यापारनिबंधनं फलं ॥ अधिष्ठानस्यैव निर्व्यापारेपि कूटस्थे योज्य
मित्यस्ति दृष्टांतदार्ष्टांतिकसंगतिरित्यर्थः ॥ ननु कूटस्थात्मनः प्रमातृत्वं नास्तीत्युक्तिप्रत्येहं विशि
ष्टप्रमातृकृतं फलं कूटस्थेनुपचर्यत इति राजदृष्टांतेनोक्तं वस्तुतस्तु चित्प्रतिबिंबस्यैव स्वोपाधि
व्यापारेण स्वात्मन्यध्यस्तेन विद्यत एव प्रमातृत्वमिति ॥ चिदात्मन एवाविकृतस्य प्रतिबिंबभावनि
बंधनः फलसंबंधप्रतीतौ दृष्टांतमाह ॥ आदर्शस्त्विति ॥ आदर्शस्तु यदाभासो मुखाकारस एव समाय
ये वं प्रस्ययादर्शोपि दाभाससत्तदाप्यहं ॥ व्यायेन मुखाकारेण विशिष्टतयाभासत इति यदाभासः स
आदर्शो मुखाकारः स एव यथावास्तव एव सन्नततोन्यो यथा बिंबप्रतिबिंबयोरेकत्वे कत्वेप्रसिद्धमि

म३ २८३ ३२ — २८३ ३२

म३ तत्वमिति ॥ त्वमर्थानुवादद्वारेण किं तदर्थस्याकउपदेशः स्यात्तस्यानुद्ध
मानस्य चित्प्रतिबिंबस्याभावे तदर्थोपदेशो निरालंबनो ऽनर्थकः स्यादित्येतदाह ९

स्यार्थः ॥ एवं प्रस्ययादर्शोदहंकारो यदाभासो येन चित्प्रतिबिंबेनाभासत इति यदाभासः स चि
त्प्रतिबिंबः परमात्मेव नन्नतोऽन्यो हंकारे द्वमवभासगोचरः ॥ तथा सत्यहं ब्रह्मेति वाक्यार्थधीरेतेते
ऽध्यस्तांशापोहमात्रेण विनात्मनः कर्मत्वमित्यर्थः ॥ ननु अयमेव पक्ष आदरणीय इत्याह ॥ इत्येवमि
ति ॥ इत्येवं प्रतिपत्तिः स्यादहमस्मीति चनान्यथा ॥ तत्त्वमित्युपदेशोपि चाराभावादनर्थकः ॥ २० एवं सति चिदाभास
स्युपगमे सतीसदहमस्मीचकारादहंसदस्मीत्याकारा प्रतिपत्तिः स्यान्नान्यथा आत्मन एवाहंप्रत्ययस्यैव ग
प्रमातृत्वाभ्युपगमे इति यतो यमेव मार्गो निश्चिन्तः स्यादादरणीय इति योजना ॥ एवमनभ्युपगमे न केवलं प्रति
पत्त्यनुपपत्तिरपितूपदेशस्यानुपपत्तिरित्याह ॥ विचाराभावादिति ॥ २० एतदेव विशदयति ॥ श्रोतुरिति ॥ श्रोतुः स्या
दुपदेशस्तदर्थवत्त्वं तथा न वेत्त्यध्यस्तस्य न चेदिदं श्रोतृत्वं कस्य वक्तव्यता ॥ २१ तथा सतीत्यर्थः ॥ तत्त्वश्रोतृत्व
मध्यस्ताद्रन्यत्र न संभवीत्याह ॥ अध्यस्तस्येति ॥ न कस्यापीत्यर्थः ॥ २२ यद्यप्यध्यस्तस्य नोपदेशस्तथापि न वैयर्थ्य
मिति शंकते ॥ अध्यस्तस्येति ॥ अध्यस्तसमीपेस्याकुड्ये वेतिवेन्मतं ॥ न तत्कृतोपकारोस्ति काष्ठायदन्नकुड्यस्य
ते ॥ २२ तत्र कुड्यः श्रोतृत्वं किमध्यस्तसंनिधिसत्तामात्रायेदमाहोस्वित्तत्कृतोपकारायेदमिति विकल्प्याद्यं प्रत्या

हा॥ नतदितातत्कृतः सन्निहितोऽप्यहङ्कृत्तोपकारोतिन्यायो बुद्धेर्नास्येव॥ यद्वत्काष्ठादिं धनादेः संनिहिता
द्युद्भाव तिन्यायो नकल्प्यते तद्वदित्यर्थः॥१२॥ द्वितीयमुत्थाप्य दूषयति बुद्धौ चेदिति। बुद्धौ चैतन्यकृतः कश्चिन्न
न्वैवं परिणामितामः॥ आभासेपि च वको दोषः स तिष्ठत्यादनुग्रहे॥१३॥ एवं सति आभासानभ्युपगमेऽहङ्का
रस्य परिणामितानतुनिश्चितं प्रसज्येते त्यर्थः। अतो रूपं रूपं प्रतिरूपो बभूव। एकधा बहुधा चैव दृश्यते
जलचंद्रवदित्यादिश्रुतिस्मृत्यनुगृहीतआभासपक्षो निर्दुष्ट उपादेय इत्यभिप्रेत्याह। आभासेपि चेति
यद्वस्तु परिणामितारहङ्कारस्येति। चेत्तर्ह्याभासेपि च प्रमाणसिद्धेऽभ्युपगम्यमाने तत्र को दोषो न विष्यतीत्य
र्थः। आभासेपीति॥१४॥ आभासपक्षे चिदात्मनः परिणामप्रसंगाभावं वक्तुं शंकामुत्थापयति। आभासेप
 रिणामश्चेतिती। आभासे परिणामश्चेन्न रज्ज्वादिनिजत्ववत्॥ सर्पादेरत्तथा बोधमादर्शेच मुखत्ववत्॥१५॥ नै
चमाभासस्य मृषात्वोपपत्तेरिति परिहारमाह। न रज्ज्वादीति॥ अज्ञानकल्पितस्य सर्पादेः रज्ज्वादिनिजत्वव
 दिनिदमात्मकस्य रजतादेरिदमात्मकत्ववच्च चिदात्मा अज्ञानकल्पितस्य बुद्ध्यादेर्मृषैव चिन्निजत्वं च कारा २२४
दर्शोचितस्वरूपस्यात्मनो भोक्तृत्वाभासो मृषैवेति सूच्यते। यद्येवं मृषात्वं तथा दर्शमवोचमादर्शेच मुख

वन्मुखाकारत्ववदिति दृष्टांतप्रणयनेनेत्यर्थः। चकारान्मुखस्येवात्मनोऽविकृतत्वमप्यवोचमि
त्यर्थः॥१७॥ अहंकृते रेवा...त्मत्वमितिमन्यमानस्तस्य चिन्निजत्वमाक्षिपति। नात्मेति। नात्माभासत्वसि
द्धिश्चेदात्मनो ग्रहणात्स्वयंभु॥ मुखादेः पृथगसिद्धिरिदंत्वमोन्यसंश्रयः॥१८॥ आत्मनः केवलस्य ग्रहणाद
भासनात्पृथगेवात्माभासत्वस्य सिद्धिश्चेन्न नैव दर्शनाभासवत्सर्वनैवात्मनाभासो नवेत्तदा इदंत्वसिन्मतोऽ
न्योन्यसंश्रयश्चेतियोजना। दृष्टांतश्च विषमइत्याह। मुखादेरिति। दर्पणादिगतात्माभासव्यतिरेकेण ग्रीवा
स्थत्वेन मुखस्य सदासिद्धेरसीतिन तत्रान्योऽन्यसापेक्षत्वेत्यर्थः॥१९॥ आमोन्याश्रयमेवस्पष्टयति। अ
हंकृते स्मेति। अहंकृतस्पष्टत्वसिद्धावाभासस्यतदीयता। आभासस्य तदीयत्वे ह्यहङ्कृतेमतिरिक्तता
॥२०॥ तथा चाहं प्रतीयमानोऽहंकृत्साक्षात्मक एव च तत्र आत्मेति युक्तमित्यतिप्रायः॥२१॥ अहंकृत्साक्ष्यम
न्यात्तः करणस्य स्वप्नादित्वे चैव अवस्थित्वात् तदाभासनिरपेक्षत्व एवात्मा तत्र सिद्ध इति नोक्तदृष्टांता
संगतिरिति परिहरति। नैवं स्वप्नइति॥ नैवं स्वप्ने पृथक्सिद्धेः प्रत्ययस्य स्पष्टहेतुस्तथा॥२२॥ व्याहेस्तत्र स्वल्पता
त्त्रसयस्यात्मनाग्रहः॥२३॥ प्रत्ययस्यान्तःकरणस्य दर्शनात्मनश्च स्वभावस्थयां तथा मुखत्वं स्थितिर्बिं

वस्तुत्वगम्योन्यनिरपेक्षत्वेनैव सिद्धेरित्यर्थः॥कुत एतदित्यपेक्षायामाह॥रथादेरिति॥न तत्र रथान
रथयोगान पंथानो न वंतीत्यादिना स्वप्ने रथादिदृश्यराहित्यस्य श्रूयमाणत्वात्तत्प्रत्ययस्यैव रथाद्याकार
मापन्नस्य तत्रात्मना स्वप्रकाशचैतन्येन ग्रहणस्तथा चात्माप्रत्ययसंवलनविनिर्मुक्तः स्वप्रकाशत्वस
समान एव स्वप्ने विषयाकाराकारितप्रत्ययसाक्षी सिद्ध इत्यर्थः॥१७ स्वप्नपर्यालोचनया विहितात्मनः प्रत
याद्विवेकं दर्शयित्वा जाग्रत्त्वप्नावालोचनयापि तमाह॥अवगत्याहीत्यादिना॥अवगत्यादिसंज्ञप्र
त्ययो विषयाकृतिः जायते स यदाकारस्स बाह्यो विषयो मतः॥१८ विषयस्याकृतिरिवाकृतिर्यस्याः प्रत्य
याकृतिर्यस्य स विषयाकृतिरिति विग्रहः॥आत्मचैतन्यमात्रे विषयाकारे प्रत्यये जायमाने तस्मिन्प्रत्यये
विषयाकारः स बाह्यो विषय इत्यर्थः॥१८ किं चाकर्मेप्सिततमत्वात्कर्म नैव तित्सत्तदान्वकायेन निर्युज्य
ते॥आकारो यत्रचार्प्यते करणे तदिहोच्यते॥१९ स बाह्यो विषय ईप्सिततमत्वात्कर्तुः साध्यतयोद्देशा
२८४ नेष्टतमत्वात्कर्म नैव तित्तद्धीस्तद्विषये छावान्वकायेन निर्युज्यते उर्वितिप्रेर्यते यत इत्यध्याहारः॥आका २८४
रसमर्पस्य कस्य कर्मकारकतया विषयत्वमुक्त्वा प्रत्ययस्य करणत्वमाह॥आकारो यत्रेति॥यत्र बुद्धिपरि

डाक्टर भाऊ दाजी इत्याख्यस्य पुस्तकम्
DR BHAU DAJI

परिणामे विषये आकारोऽर्प्यते अर्प्यते तद्धि विषयात्मिका करणमुच्यते तत्र कार्येन्द्रियवि
शेषितात्तत्तद्विषयाकारा बुद्धिरेव विषयप्रमितिप्रतिकरणमित्यर्थः॥२० विषयकरणे अनुसाधकर्तृ
रं अनुसाधयति॥यदाभासेनेति॥यदाभासेन संभाश्च स ज्ञातेति निगद्यते त्रयमेतद्धि विज्ञात्र यो जाना
ति स आत्मा॥२१ यस्य चित्प्रतिबिंबस्याभासेन संभाश्रोऽहंकारः परिणमते स चिदात्मा प्रतिबिंबो
ज्ञातेति निगद्यते कथ्यते॥एवं साक्षिणं निर्दिश्य ततः साक्षिणं पृथगुपलंभयति॥त्रयमिति॥एतत्त्रयं ज्ञा
ता ज्ञानं ज्ञेयं चेति॥विविच्य साधारणेनावगम्य तत्र ये परस्परापेक्षसिद्धिके आगमापायिनि वर्त
मानं स्वतः सिद्धं तद्वक्षित्वेन आगमापायि साक्षिणं यो जानाति सम्यगवगच्छति स आत्मवित्तत्त्वं
पदलक्ष्यप्रत्यगात्मवित् इति योजना॥२२ उक्तमर्थमनागवते क्रमेकृतरान्नावेयदानोपलभ्यामहेतावि
स्वा०३ तयं तत्र यो वेद स आत्मा आश्रयाश्रय इति॥२३ विवेकप्रकारमेव विशदयति॥सम्यगिति॥सम्यक्संश
यमिथ्याज्ञानप्रत्ययाभ्यन्तिचारिणो॥एकैवावगतिस्तस्तु नेहस्तप्रत्ययापि तथा २४ नेदस्तुप्रत्यपा
र्पितइत्येतद्दृष्टांतेन स्पष्टयत्साक्षिणेहादीति॥आदिनेहाद्यर्थानेहोमणेरवगतेस्तथा॥अनुष्टि

परिणामश्च सर्वप्रत्ययसंश्रयात्॥२२॥ मणेः स्फुटिकादेः प्रत्ययसंश्रयादहंकारप्रतिबिंबजनता
भाससंश्रयान्निमित्तात्॥ इत्यर्थः॥२२॥ ननु ग्राह्यग्रहणग्राहकातिरिक्तात्मसिद्धौ किं प्रमाणमुक्तमेताव
तानवत्तीत्यपेक्षायां तदाह॥ प्रथनमिति॥ प्रथनं ग्रहणे सिद्धिः प्रत्ययानामिहान्यतः॥ स्वपरोत्पाद
दिवोक्तमनुमानं प्रदीपवत्॥२३॥ प्रत्ययानां विषयाकाराणां जाग्रतत्स्वभावस्थानां प्रथनं स्फुरणं ग्र
हणमुपादानं स्थितिर्वा व्यवहारो वा सिद्धिः स्वरूपलाभश्चेह व्यवहारजन्मो अन्यतोऽन्यस्मा
हापरोक्षात्स्वपरोक्षस्वभावाद्भवितुमर्हति॥ अचित्स्वभावत्वादचित्स्वभावत्वं चागमापायित्वात्स्व
ह्यपवदित्येतदेवानुमानमिहोक्तमित्यर्थः॥ विमताः प्रत्ययाः स्वविलक्षणान्याधीनप्रथमग्रहण
सिद्धिकाश्च अचित्स्वभावत्वात्प्रदीपादिवदिति प्रयोगः॥ एवं सामान्यतो दृष्टानुमानेनात्मा यं तु रूपः
स्वयं ज्योतिरात्मैवास्य ज्योतिः सत्स्य भासा सर्वमिदं विभाति इत्यादिश्रुतिप्रसिद्धस्वप्रकाशात्मे
ति संभावनाद्दर्शितेति द्रष्टव्यं॥२३॥ एवमनुमानमात्मन्यप्यन्यस्य विधिमुखेन प्रमाणेनात्मसि
२८५ द्धिरुक्ता॥ तत्र केचिन्निषेधमुखेनैव प्रमाणेनात्मसिद्धिर्न विधिमुखेनापीति मन्यंते तन्मत २८५

३४ ३४

निराकरणाय विकल्पयति॥ किमन्यदिति॥ किमन्यद्ग्राह्यते त्वच्छिष्टं प्रमाणेन तु केन चित्॥ विनै
व तु प्रमाणेन निवृत्त्यान्यस्य शिष्यते॥२४॥ प्रथमस्तु शब्द एवकारार्थः॥ द्वितीयस्तु वाशब्दार्थः॥ किं त्वच्छि
ष्टो केन चित्प्रमाणेनैव देहादिभ्योऽन्यदात्मतत्त्वं ग्राह्यते किं वा प्रमाणेन विनैवान्यस्य निहत्या परिशे
ष्यत इति विकल्पार्थः॥२४॥ प्रथमपक्षे विधिमुखेनैव प्रमाणप्रवृत्तिः सिध्यतीतीष्टहानिः स्पष्टैव नि
ष्प द्वितीयं प्रत्याह॥ शब्देनैवेति॥ शब्देनैव प्रमाणेन निवृत्तिश्चेदिहोच्यते॥ अधस्य स्याप्रसिद्धत्वा
न्यत्तेव प्रसज्यते॥२५॥ शब्देन प्रमाणेनानात्मनिवृत्तिरेव चेदिहोच्यत इति संबंधः॥ तदा तदिहस्य अधस् धर्म
सद्भावस्यान्यतोऽप्रसिद्धत्वात्परिशेषासिद्धेः शून्यतैवावशिष्येत नात्मेत्यर्थः॥२५॥ ननु चेतनाचेत
नयोर्विरुद्धरूपत्वकथनेनान्यनिवृत्तिः शब्देन क्रियते॥ तथा चाचेतनविरुद्धश्चेतनः परिशिष्यत इ
ति न शून्यताप्रसंग इत्याशंक्य परिहरति॥ चेतनस्त्वमिति॥ चेतनस्त्वं कथं देह इति चेन्नाऽप्रसिद्धितः
चेतनस्यान्यतः सिद्धावेवं स्यादन्यहानतः॥२६॥ अप्रसिद्धितो नैवमित्यन्वयः साधयति चेतनस्येति स्व
यमर्थः सिद्धे हि धर्मिणि प्रतियोगिनि चायमयं न भवतीति तादात्म्यनिषेधेन विरुद्धरूपत्वोपदे

श्रः स्यान्नचायापि चेतनपदार्थस्य पङ्क्तिसिद्धस्त्वनेनैव तत्साधनेऽन्योन्याश्रयः स्यादितिः परहृप
श्यात्मानात्यंतमप्रसिद्धस्तास्य स्वतः सिद्धत्वादित्याशंक्ते॥ अध्यक्ष इति। अध्यक्षः स्वयमस्येव
चेतनस्यापरोक्षतः। तुल्य एव प्रबोधः स्यादन्यस्यासत्त्वादिना॥२७॥ चेतनस्य स्वतोऽपरोक्षत्वादित्य
र्थः॥ दूषयति। तुल्य इति। एवं सत्यन्यस्यासत्त्वादिनाऽन्यत्वादिना तुल्यः समः प्रबोधः स्याद्यथाश्
न्यवादिनः प्रमाणं विना स्वतः सिद्धश्शून्यमात्मेति न प्रबोधसिद्धिस्तथाध्यक्षस्यापि तवेत्यर्थः॥२८॥ स्व
नोभ्युपगमबलेन स्वतःसिद्धाध्यक्षसिद्धिं शंकते॥ अहमज्ञाशिषमिति॥ अहमज्ञाशिषं चेदमिति लोक
स्मृते विद्याकरणं कर्म कर्त्ता च सिद्धास्त्वेकहणे किल॥२९॥ अहमिदमज्ञाशिषमिति व्यवहारे लोक
स्य युगपत्स्मृतिदर्शनादननुभूतेस्मृत्यसंभवात्करणकर्मकर्त्तारस्त्रयोऽप्येकहणेऽभ्यगेन सिद्धाः
सोऽस्याध्यक्षः स्वतः सिद्ध इति गम्यते किलेत्यनभिमतत्वद्योतनार्थः स्ववंपहात्ताद्योतितेत्यर्थः॥ ग्र
२८७ एतन्निराकरोति॥ प्रामाण्येपीति॥ प्रामाण्येपि स्मृतेः शैघ्र्याद्यौगपद्यं विभाव्यते॥ क्रमेण ग्रहणं २८७
एवं स्मृतेः पश्चात्तथैव च॥३०॥ स्मृतेः पूर्वानुभवगमकत्वेन प्रामाण्येपि युगपत्प्रतीतेः सिद्धि

३५ नं१ ३५

या५ नं५

मकत्वं यतः पूर्वं क्रमेण कर्त्रादीनां ग्रहणमनुभूतथैव च पश्चादुत्तरकाले स्मृतेः संभवोऽ
तः शैघ्र्यान्नैरंतर्येण विलंबाद्यौगपद्यं विभाव्यते मृषैवेत्यहरार्थः॥ अर्थत्रयस्यैकस्मृत्यवभासत्वे निश्चिते सत्ये
वं स्यान्नेतु तन्निश्चेतुं शक्यते यतोऽहमिदं जानामीति क्रमेण व्यपदिश्यतेऽतो ग्राह्यस्फुरणस्य ग्राहकग्रहण
कारतोऽसंभवात्तत्काले तयोर्न ज्ञानं संभवति। एवं ग्राहकस्य प्रतीचः स्फुरणसमये ग्राह्यस्य पराचो नास्ति स्फु
रणं विरुद्धाकारद्वयस्यैकस्मिन्प्रमाणज्ञाने स्फुरणासंभवात्तथा ज्ञानस्यापि विषयैकाकारत्वात्स्फुरणे न ज्ञा
तृस्फूर्तिरिति क्रमेणैव ज्ञात्रादिसिद्धिः आशुत्वात्तस्मादुत्पलपत्रशतभेदनयौगपद्याभिमानवद्युगपत्स्मृ
तिरित्यभिमानः शैघ्र्यनिबंधन इति भावः॥ स्मृतेर्यौगपद्याभावे कारणांतरमाह। अज्ञाशिषमिति। अज्ञा
शिषमिदं मां चेत्यपेक्षा जायते ध्रुवं॥ विशेषापेक्षते यत्र तत्रनैवैककालता॥३०॥ इदमित्याकारो द्विप्रत्यगपेक्ष
याहित्रिरव्यते तथा मामिति परागपेक्षयाधीजायते। तथा च यत्र विशेषोऽन्यप्रतियोगिकोऽपेक्षते तत्रैकका
लता यौगपद्यं नैव घटत इत्यर्थः॥३१॥ स्मृतेर्विषयतः स्वरूपतश्च यौगपद्यासंभवात्कर्त्रादिसिद्धये कयानुमाप
नु१ कत्वा यपत्तिरित्युक्तं संप्रति कर्त्रादीनां युगपदनुभवसाधनाभावादपि न युगपत्तत्सिद्धिसंभवो न स्यादि॥

आत्मन इति। आत्मनो ग्रहणे वापि त्रयाणामिह संभवात्॥ आत्मन्यासक्ते कर्तृत्वं न स्यात्करणकर्मणोः स्व
अयमर्थः॥ यथा विषयस्य ग्रहणे कर्तृकरणं कर्म चेति त्रितयमपेक्षते। एवमस्येकं कर्त्रादिग्रहणे त्रित-
यमपेक्षणीयं तथा चात्मनः प्रमातुर्ग्राह्यकारात्मप्रमेयस्य प्रमाणज्ञानस्य च ग्रहणे पि त्रयाणां कर्त्रादीनामि-
हापेक्षासंभवात् तत्र कर्त्रादिस्फुरणमंतरेण तत्तदर्थदर्पस्य तदनुकृतस्य त्वनियमासिद्धेः कर्त्राद्यनवस्था-
प्रसज्येतेत्यर्थः। तैरेव कर्त्रादिभिः स्वस्वरूपसिद्धिसंभवात् किमित्यनवस्थेति शंकां वारयत्यात्मनीति
आत्मन्येकस्मिन्नेव स्वसिद्धावासक्ते उपहीणे यत्कर्तृत्वं तदेव करणकर्मणोः सिद्धौ तन्न स्यादित्यर्थः।
तथा चैकस्मिन्नवभासे कर्त्रादिभावेनान्वीयमानानां तदेवावभासांतरसाधनत्वान्वयायोगान्नैक-
र्त्रादित्रितयस्य युगपदनुभवसाधनसंभावनेति तदसिद्धिरनवस्थेत्यर्थः॥३१॥ कर्त्रादीनां युगपत्त्रि-
भ्युपगमे व्याकर्तृविरोधोपि स्यादित्याह॥ व्याप्तुमिति॥ व्याप्तुमिष्टं च यत्कर्म कर्तुः क्रियया कर्म तत्स्मृतं
२ ए ॥ अतो हि कर्तृतंत्रत्वं तस्येष्टं नान्यतंत्रता॥३२॥ कर्तुः क्रियया यथाव्याप्तुमिष्टतमं तत्कर्म स्मृतं। कर्तुरि-
२५८ प्सिततमं कर्मेति पाणिनिना स्मृतमित्यर्थः। हि यस्मादेवमतः तस्य कर्मणः सकलकारकप्रयोक्तुः स्वतंत्र- २५८
३६ ३६

कर्तृतंत्रत्वमिष्टं न तद्व्यतिरिक्ताध्यक्षतंत्रता अन्यायेन तत्साधकासिद्धेरित्यर्थः॥३२॥ तस्माद्वि-
रूपेण प्रवृत्तादेव प्रमाणादिति मतं वस्तुसिद्धि नान्यनिषेधमात्रावसानादिति निर्णीतमित्युपसंहरति त-
स्मादिति। प्रत्यक्षादनुमितेर्वापि प्रमाणाद्वा ततोन्यतः। सिद्धिः सर्वपदार्थानां स्याद्दृष्टप्रतीतिनान्यथा॥३३॥ अन्य-
तोन्यस्मात्प्रत्यक्षादेवेत्यर्थः॥३३॥ जडानां प्रकृतप्रमाणादेव सिद्धिरस्तु न स्वयं चेतनस्येत्याशंक्याह॥ अध्यक्ष-
स्यापीति। अध्यक्षस्यापि सिद्धिः स्यात्प्रमाणेन विनैव वा॥ विना स्वस्य प्रसिद्धिस्तु नाज्ञं ~~भजौसि~~ उच्यते॥ अध्य-
येयमध्यक्षस्य सिद्धिरज्ञस्य सा प्रमाणाधीनानवेति विकल्प्यां त्ये स्वरूपप्रकाशमात्रस्य विना प्रमाणेन सि-
द्धावपि नाज्ञं प्रत्यध्यक्षत्वात्तस्य सिध्यतीति दूषयति विना स्वस्येति॥३४॥ अध्यक्षस्वरूपमपि विकल्प्य प्रमा-
णाधीनसिद्धिकतां तस्य दर्शयन्नाद्यं पक्षमभ्यनुजानाति॥ तस्यैवेति। तस्यैवाज्ञत्वमिष्टं चेत् ज्ञानत्वेना-
मतिर्नवित्तः॥ अन्यस्यैवाज्ञतायां च तद्विज्ञाने ध्रुवा नवेत्॥३५॥ तस्यैव ज्ञानस्वरूपस्य चेतनस्यैवाज्ञत्वमि-
ष्टं चेत्तदा तस्य ज्ञानत्वे चेतनत्वे स्यात्प्रमाणजन्या मतिरपेक्षणीया न वेत्॥ अन्यस्यैवाचेतनस्याहंकारस्यै-
वाज्ञतायां तद्विज्ञाने ध्यक्षविज्ञाने चान्या मतिर्ध्रुवा न वेदिति योजना। न यथापि विधिमुखप्रमाणाधीना

नं ४

ध्यहासिद्धिरित्यर्थः॥२५॥अध्यहस्यसिद्धस्वरूपत्वान्मानापेक्षानास्तीत्याशंक्यसिद्धिशब्दार्थमेकतरि
वक्तव्य इत्याह॥ज्ञाततेति॥ज्ञाततास्यात्मलाभोवासिद्धिःस्यादन्यदेववा॥ज्ञातत्वेनंतरोक्तोत्वं पक्षोसंस्म
र्तुमर्हसि॥२६॥किंज्ञानं सिद्धिःस्वरूपलाभो वास्तीदन्यदेववोनयान्यप्रकारोवेतिविकल्पार्थः॥तत्राद्येदोषमाह
॥ज्ञातत्वेति॥अनंतरोक्तोतस्येवाज्ञत्वमिष्टंचेदित्यादिनापूर्वश्लोकोक्तोदर्शितस्येकस्यदूषणप्रसारणाद्यःक
र्णःसाधुरित्यर्थः॥२७॥द्वितीयमनूद्यदूषयति॥सिद्धिःस्यादिति॥सिद्धिःस्यात्स्वात्मलाभश्चेद्यत्नस्तत्रनिर
र्थकः॥सर्वलोकप्रसिद्धत्वात्स्वहेतुभ्यस्तुवस्तुनः॥२८॥निरर्थकत्वेहेतुमाह सर्वलोकेति॥वस्तुनःसर्वस्यस्वहे
तुभ्यःस्वात्मलाभरूपासिद्धिरितिसर्वलोकप्रसिद्धत्वात्तत्रप्रमातृप्रमाणप्रयासोव्यर्थःस्यादित्यर्थः॥२८
तृतीयंपक्षमप्रसिद्धिपराहृत्तं मत्वा दूषमाणःपक्षविशेषज्ञापनार्थमुक्तंपक्षंनिगमयति॥ज्ञानज्ञेयादिति
ज्ञानज्ञेयादिवादेतःसिद्धिर्ज्ञातत्वमुच्यते॥अध्यक्षाध्यक्षयोःसिद्धिर्ज्ञेयत्वंनात्मलाभता॥२९॥ज्ञानंज्ञेयंज्ञाता
चास्तीतियस्यवादस्तस्मिन्वादेज्ञातत्वमेवसिद्धिरुच्यते॥अध्यक्षाध्यक्षयोस्तुपुनर्ज्ञेयत्वमेवसिद्धिर्नत्वात्म
लाभतेत्यर्थः॥अध्यक्षस्यापीत्यादेरपरायोजना॥अहमज्ञाशिषंचेदमित्यारभ्येयतायंथेनकरणमंकरणानां

विषिमुखेनप्रवृत्तप्रमाणादेवसिद्धिर्नान्यथेति॥प्रासंगिकमुपपादितमुपसंहृत्याध्यक्षस्यापिवस्तुत्वा
विशेषात्प्रवृत्तप्रमाणादेवसिद्धिरितिप्रकृतमनुसरन्नाह॥अध्यक्षस्यापीति॥वाशब्दःकेवलार्थः॥अध्यक्षस्यापि
दृष्टुरपिप्रमाणेनैवसिद्धिःस्यादितियोजना॥नैवस्यादित्यर्थः॥चेतनत्वादध्यक्षस्यप्रतीमनुसरन्नाह॥प्रमाणे
नविनाकथंनसिद्धिरित्यतआह विनेति॥प्रमाणेनविनास्वस्यवस्तुनप्रसिद्धिस्तुज्ञानंप्रतीति॥वस्तुपद्युज्यते॥
ज्ञानस्यैवस्वरूपस्फुरणेप्रमाणैर्नपेक्षानज्ञातुरध्यक्षस्येत्यर्थः॥कथमितिचेत्तेनवक्ष्यमाणेअध्यक्षएवाज्ञःसन्प्रमा
णेनविनार्थसिद्धिंसाधयिष्यति॥किंवान्यांतःकरणादिरिति॥तत्राद्यमनूद्यदूषयति॥तस्यैवेति॥चेतनस्याध्यक्ष
स्यैवेत्यर्थः॥ज्ञानत्वेहमध्यक्षइतिज्ञानवत्त्वेन्यामतिःप्रवृत्तप्रमाणजन्यामतिरपेक्षितानवेदागंतुकसिद्धेर
न्यनिमित्तत्वादित्यर्थः॥द्वितीयमनूद्यदूषयति॥अन्यस्यैवेति॥तद्धिज्ञानइतितस्यानन्यांतःकरणादेरध्यक्ष
विषयविज्ञानेन्याप्रमाणजन्यामतिर्भवान्नवेदितियोजना॥अन्ययापितुखेनप्रवृत्तप्रमाणादेवाध्यक्ष
सिद्धिरित्यर्थः॥ज्ञातवेति॥ज्ञातेज्ञानवत्तासिद्धिरितिपक्षेतस्येवाज्ञत्वमिष्टंचेदितिपूर्वश्लोकोक्तविकल्पद्
षणप्रसरणमनिवारणंस्यादित्याह॥ज्ञातत्वेनंतरोक्तोवितीयपाख्यातोस्वपक्षोविस्यर्थः॥अन्यस्मा

नं। ५३ ननु ज्ञाततात्मसाम्नातिरिक्ताप्यस्ति स्पृष्टतानाम सिद्धिरतो नाप्रसिद्धं ॥ ५४ ज्ञांतरमिति नहमत
मात्रं कथं परिहरति । स्पृष्टत्वमिति ॥ स्पृष्टत्वं कर्मत्रादेः सिद्धिता यद्विकस्यते । स्पृष्टता स्पृष्टते स्पातामसि
स्यैव न चात्मनः ॥ ५५ स्पृष्टत्वं प्राकट्यं कर्मकर्त्रादेः स्पृष्टता स्पृष्टतेऽप्यन्यस्यैव कर्त्रादि हि विलक्षणस्य साक्षिणो
श्चिदाभासजननेनेस्यात्तां न चात्मनः कर्त्रादिस्वरूपस्य जडत्वादित्यर्थः ॥ ५६ एतदेव व्यतिरेके दर्शय
न स्पृष्टयति ॥ अदृष्टुरिति । अदृष्टुर्नैव चांधस्य स्पृष्टता बोधटस्य तु । कर्त्रादेः स्पृष्टता दृष्टे चेदृष्टताधियः
कर्तृका ॥ ५७ ॥ अंधस्य दर्शनहत्निरहितस्य ज्ञातुर्विषयीभूतस्य घटस्य यः स्पृष्टीभावः स नैव ज्ञानविष
यतातिरिक्तो नदमते संभवतीत्यर्थः ॥ एवं सति नहमतानुसारिणा कर्त्रादेः स्पृष्टताप्राकट्यरूपेष्ट
चेत्तदादृष्टतातद्विलक्षणाध्यक्षकर्तृकावश्यमेष्टव्यात स्मात्कर्मादेर्जडस्य स्पृष्टतायाः प्रकाशपरपर्या
याया असंभवान्न स्पृष्टतासिद्धिरित्यर्थः । किंतु ज्ञानविषयतैवेति कर्त्रादिगतचिदाभासनद्वारात
दधिष्ठानभूतश्चिदात्मा विधिमुखेनैव प्रसिद्ध्यादिदृष्टान्तानुमानादिना प्रमाणेनावगंतव्य इति भावः ॥ ५८
अत्र केचित्कर्मविहीन एवं प्रत्ययः स्वमहिम्नाभासत इति वदन्विज्ञानवादी बौद्धः प्रत्यवतिष्ठते ॥ अनु

DR BHAU DAJI

भूतेरिति ॥ अनुभूतेः किमन्यस्मिन्स्यात्तवापेक्षया वद ॥ अनुभवीतरीष्टा स्यात्सोऽप्यनुभूतिरेव
नः ॥ ५९ अनुभूतेः संवेदनस्य कर्त्रादावपेक्षया तव किं फलं स्यात्तद्वै हन किंचित्फलं तस्मात्स्वप्र
काशत्वादित्यर्थः ॥ अनुभवितरिच्छा अथ भूते सेष्टा स्यात्स्यात्तस्मात्तदधीनत्वदर्शनादिति चेत्त्वं ब्रूयास्त
र्हि सोऽप्यनुभविता नोस्माकं मतेऽनुभूतिरेव न ततः पृथक् तस्य त्वप्रमाणत्वादित्यर्थः ॥ ६० कथं
तर्ह्यनुभूतिरनुभविताऽनुज्ञात्व इति भेददर्शनमित्यत आह ॥ अनित्यो यादिति ॥ अनित्योपि हि बुद्ध्या
त्मा विपर्यासितदर्शनैः ॥ ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ ६१ बुद्ध्यात्मा बुद्धिस्वभावोऽनित्योप्येको
पि विपर्यासितदर्शनैः भ्रांतबुद्धिभिः पुरुषैर्ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते प्रतीयते संवित्तिरा
ब्दोग्रहणशब्दपर्यायः ॥ ६२ बुद्धेः कारकत्वानंगीकारात्स्वेन कर्त्राद्यपेक्षेत्याह ॥ भूतिरिति ॥ भूतिर्येषां क्रिया
सैव कारकं सैव चोच्यते ॥ ६३ येषां मते याभूतिरनुभूतिः सैव क्रियाकारकमुच्यते हि क्षणभंगुरत्वेन विरम्य व्या
पाराभावात्तेषां मते वस्तुस्यान्यव्यतिरिक्तापेक्षणीयस्यादित्यर्थः ॥ ६४ अथ यमनुभूतेरन्यानपेक्षत्वं निराकरो
ति सिद्धान्ती सत्यमिति ॥ सत्यं नास्ति त्वमस्याश्चेत्स कर्तृत्वं तथेष्यते ॥ न कश्चिद्वेष्यते धर्म इति चेत्सहतानता ॥ ६५

ऽननुभूतेरस्याः सत्वं स्वरूपसत्वं नाशित्वं हुणेनैगुरत्वं इष्टं चेत्तावता हि तथा सकर्तृत्वमपीष्यतां अनुभव
स्यानाशापि सज्ञावादिरित्यर्थः। अथ सत्वादिरपि धर्मो निष्यते इति मतं तत्राह लोकपक्षस्याप्यसिद्धिरित्याह य
न कश्चिदिति॥ ९८ ननु नास्माकं विज्ञानस्य हि लौकिकत्वादयो धर्मा इष्यन्ते किं त्वहलौकिकत्वाद्यपोहरूप एव तु ह
लौकिकत्वादिरिष्यते तेनोक्तदोष इति शंकते नन्विति। नन्वस्ति त्वादयो धर्मा नास्तित्वादिनिवृत्तयो न त्वहते
तद्धि नाशित्वं स्वालक्षण्यं मतं हि ते॥ निराकरोति नेति। एवं चेत्तर्हि भूतेरनुभूतेर्नाशित्वं न सिद्ध्यति तद्धि यस्मा
त्तेन वेभूतेः स्वालक्षण्यं मतं स्वेनेव लक्ष्यते॥ ज्ञायते इति स्वलक्षणं तस्य भावः स्वालक्षण्यं निर्विकल्पकमात्र
मिति यावत्। ततः सविकल्पत्वाद्धि लौकिकत्वासत्वानाशित्वाशत्वादिभ्यावृत्तेरनुभूतेश्च सविकल्पकज्ञान
गोचरत्वान्न सत्वनाशित्वादिधर्मसिद्धिरित्यर्थः॥ ९९॥ एतदेव स्फुटयति। स्वलक्षण इति। स्वलक्षणे चावि
नाशोऽनाशो नाशनिवृत्तिः॥ अंगोऽसत्वं गोत्वं तेन तु तज्जो त्वलक्षणं॥ १००॥ अथ मतः आर्थं विनश्यन्न
२०१ भिरवधिनश्यतीदमत्र नास्ति इदमिदानीं नास्ति नष्टमिति वा नाशो व्यवह्रियते॥ यस्मात्तस्मात् क्षणमप्यस्ति २०१
रूप विनाशावधिभूतमविनश्यद्वस्तु न स्वतः सिद्धं चेत्सम्प्रेयं तदेतदाह॥ स्वलक्षणे वधिर्नाश इति। स्वरूप रूप

मेव लक्षणं प्रमाणं धर्मो वा यस्य स स्वलक्षणः सो वधीः सीमा यस्य स विनाशस्य सत्तयेति विग्रहः
तथा चत्वेन्मते क्षणविनाशवितिरोभावयोरवधिभूतस्य स्थिरस्याभावान्न सत्वविनाशयोः सिद्धिरित्यर्थः
किं चापोहपक्षे ऽन्योन्याश्रयश्च प्रसज्येतेत्याह॥ नाश इति। सिद्धे नाशे तद्विरोधिनो ऽनाशस्य सिद्धिस्ततस्ति
द्वोतदपोहनाशरूपसिद्धिरित्यर्थः। यत्तु सामान्यमनभ्युपगच्छता बौद्धेनागोनिवृत्तिर्गोत्वलक्षणमित्युपु
गम्यते॥ तदनुपपन्नमन्योन्याश्रयस्य तदवस्थत्वादित्यभिप्रेत्याह॥ अगोरिति। गोरन्यस्याश्वादेरगोप
हासिधेयस्यासत्वे निवृत्तिरूपावो गोत्वमिति ते मतं तच्चुनगोत्वलक्षणं सिध्यति अश्वस्यापि गोत्व
भावादिति सतेहेरणतथा परस्परापेक्षसिद्धित्वादित्यर्थः॥ १०१॥ अपोहवादे दोषांतरमाह हेरणवान्योपीति
लक्षणं वाच्यो पि यो र्थः स्यात्सोप्यन्याभाव एव तेषां अस्यानावोह लौकिकाभावप्रलौकिक इति तेन सम्म
तिश्यतः स्थिरोपि ह्यलौकिकता विरोधीत्वयाभ्युपगतः स्यादित्यर्थः। अहानन्वभावो नाम न सत्तो निरूप्यि
त्वं २ ष्यते॥ येनातिप्रसंगः स्यात् किंतु निरूपाख्यगोत्वं एवान्यथा सात्मना निरूप्यत इति शंकते॥ नेदानीं वैध
ति॥ नेदानीं वेष्यभावस्य नेर्हनामनिरिष्यते॥ नामनेदेरनेकत्वमेकस्यस्यात्कथं तव॥ १०२॥ अत्र भावस

स्वरूपतो भेदाभावेपि अग्रेगोत्वमश्वत्वमनश्वत्वमित्यादिनाभित्तिः स्वरूपभेद ईष्यत इत्यर्थः। इष्यतिनामभे
देरिति। एकस्यनिःस्वभावस्याभावस्यनामभेदे निरर्थकसंज्ञाभेदेरनेकत्वमनेकपदार्थसाधारणतयाख्या
दस्यां मत्वं न त्वं घटे तेत्यर्थः॥४७॥ किंच भिन्नानां व्यावृत्तिरयोहोऽभिन्नानां वा तत्राद्यमनूद्य इष्यति अयोहे
यदीति॥ अयोहो यदि भिन्नानां वृत्तिस्तस्य कथं गवि॥ नानाभावाभेदकाः सर्वे विशेषावाक्यं च न॥ अन्त्ये दूषयति
योगिनामानंत्यात्तदवगममंतरेण तदयोहानवगमात्तस्यायोहस्य गविवृत्तिः कथं सिद्ध्येदिति शेषः॥
तदसिद्धौ च किंचिदभावस्य कोपि त्सुलभेत्या व्यवहारानियमप्रसंग इति भावः। द्वितीयदोषमाह। नाना
वा इति॥ सर्वेप्यभावा अजत्वाश्वत्वाद्ययोहरूपा न भेदकाः न गोपितरेतरव्यावृत्तत्वबुद्धिजनकाः स्युरस
था विशेषा वाभावरूपाः खंडमुंडत्वादयो भेदकाः न स्युर्नैंध्य भेदकयोर्…देरित्यर्थः। अयं एवं
पाद्यादे खंडो गौर्नीलमुत्पलं…मित्यादि विशिष्टव्यवहारासिद्धेरियं गौरित्याद्यसाधारणस्व
२०२ रूपव्यवहारासिद्धिश्च स्यादि…त्याद्योह निराकरणमुपसंहरति। नाभजात्यादयो इत्यर्थेन २०२
॥ नाभजात्यादयो यद्वत्तं विदस्तोऽविशेषतः॥४८॥ तेतवमते संविदोऽविशेषतो निर्विशेषत्वा

४५ ४५

न्नाभजात्यादयो यद्वन्नविशेषणं एवं गवादीनां अगवादिव्यावृत्तयः। खंडादयोर्वा न विशेषण
मिति विशिष्टव्यवहारलोप एवेति जीवनमपि ते दुर्लभमिति भावः॥४९॥ नूतिर्येषां क्रियासे वेत्य
त्र संविदः क्रियाकारकभेदापेक्षा नास्तीति तत्र प्रत्यक्षमनुमानं चेति प्रमाणद्वयात्सुगमविस्तरम
स्याह॥ प्रत्यक्षमिति॥ प्रत्यक्षमनुमानं वा व्यवहारे यदीक्ष्यते॥ क्रियाकारकभेदेष्टः स त्वदनुपेयं कथं
वं न वेत्ति॥५०॥ स्पष्टार्थः॥ तथा चासंवेदनातिरिक्तं वेद्यवेदितृस्वरूपं मनिक्षत्ताप्यनुपेयमिति बौद्ध
मतनिराकरणमुपसंहरति॥ तस्मादिति॥ तस्मान्नीलं तथा पीतं घटादिर्वा विशेषणं॥ संविदः स्वरू
पे यं स्याद्येन चाप्यनुभूयते॥ यरयेन चाप्यनुभूयते सोपि ज्ञाताभ्युपेयः स्यादित्यर्थः॥ परसंवि
त्साक्षिण्यनुमानं प्रमाणमाह॥ रूपादीनामिति॥ रूपादीनां यथान्यः स्याद्ग्राह्यत्वाद्ग्राहकस्तथा॥ प्र
त्ययस्य तथान्यः स्याद्व्यंजकत्वात्प्रदीपवत्॥५२॥ यद्ग्राह्यं तत्स्वान्यग्राह्यं यथा रूपादि ग्राह्या संवि
दिति बौद्धं प्रति प्रयोगो योज्यः॥ तथा च नासको ऽवेनास्या दन्यो व्यंजकत्वात्त्वघटादेः प्रदीपवदिति
औक्तिकान्प्रति प्रयोगोऽन्यमित्यर्थः॥ यथा रूपादीनां ग्राह्यत्वाद्ग्राहकोन्यः स्यात्तथा प्रत्ययस्य ग्राह्य

प१

त्वो आहंकोमः स्यात्तथाप्याहं कश्च आत्मास्यः स्याद्व्यंजकत्वादादीपवदिति योजना॥४८॥ कस्तर्हि
त्यथाध्यस्तयोः संबंध इत्यपेक्षायामाह॥ अध्यस्तस्येति॥ अध्यस्तस्य दृशेः कीदृक्संबंधः संभविष्यति
॥ अध्यस्तेनाथ तु दृश्येन तुल्यान्यो दृष्टृदृश्यताम्॥४९॥ अस्य ष्ठः॥ अध्यस्तेनेति॥ अध्यस्तेनात्मतादृष्टि दृग्रूपं व्याप्नोत्यथापि
वा॥ नित्याध्यस्तेऽहंकृतः कश्चिदुपकारोऽनवेक्ष्य॥५०॥ यद्द्रष्टृदृश्यसंबंधास्त्युपगमे बलाहन्नासोऽस्त्युपगंत
व्य इति दर्शयितुं विकल्पयति॥ अध्यस्तेनेति॥ अध्यस्तेन प्रत्ययेन दृशेरात्मनः कीदृक्संबंधो भ
विष्यति॥ पारमार्थिको वाऽपारमार्थिको वेति विमर्शार्थः॥ तत्राद्ये दृशेः परिणामादिविकारप्राप्तिप्रसं
गात्सावयवत्वप्रसक्तेश्च द्वितीयमंगीकरोति॥ नित्याध्यस्त इति॥ यथा कोऽसावुपकार इत्यपेक्षायामाह॥ स
द्योतक इति॥ सर्वोत्तरत्वनिमित्तं प्राक्संव्याप्तिश्च घटादिषु॥ यथालोकादिसंव्याप्तिर्व्यंजकत्वाद्धि यस्य
ण्या॥५१॥ सर्वं नित्याध्यस्ते अहंकृतौ बुद्धेः कः उपकारस्तन्निमित्तत्वं चिन्निमित्तसंज्ञाकं पूर्वमेव त्वनुस्वप्रतिबिंबदृष्टां
तेनोक्त इत्यर्थः॥ नकालासक्षरात्मनो दृशः बाह्यविषयसंबंधेऽपि यत्तु सातो सायाबुद्धे विषयव्याप्तिसंघ
शांतमाह॥ संव्याप्तिश्चेति॥ यथा घटादिषु आलोकादिसंव्याप्तिर्व्यंजकत्वात्तथा धियो दृश्यघटादिव्याप्ति

२०३ ४२

दित्यर्थः॥५१॥ यदुक्तमेव स्फुटयति॥ आलोकस्थ इति॥ आलोकस्थो घटो यद्वद्बुध्याऽऽरूढो भवे
न्मवेत्तथा॥ धीव्याप्तिः स्याद्दृढारोहो धियाव्याप्तोऽर्कमो भवेत्॥५२॥ यद्वद्यथा घटः आलोकनिष्ठो घट आ
लोकारूढो भवेत्तथा बुद्धिनिविष्टो बुध्यारूढो भवेत्॥ आरूढ इत्युक्ते पुरुषाश्रयोरिवोपर्यधो
भाव इति शंकां वारयति॥ धीव्याप्तिः स्यादिति॥ यद्येवं विषयव्याप्तिमात्रमेव धियो विषयव्यंजकत्वे
तर्ह्यात्मनो बुद्धेश्च को विशेष इत्याशंक्य विशेषमाह॥ धियाव्याप्तोऽर्कमो भवेदिति॥ यद्धियो विष
यव्याप्तोऽर्कमो भवेन्नात्मन इत्यर्थादुक्तं विशेषं विवृणयति॥ पूर्वमिति॥ पूर्वं स्यात्प्रत्ययव्याप्तिस्त
तोऽनुग्रह आत्मनः॥ फलत्वमाध्यस्य सो युक्तः कालाकाशादिवत्क्रमः॥५३॥ धीयो विषयव्याप्तिः पूर्वं प्रथ
ममिव प्रथमं स्यात्ततो विषयाकारतायां सिद्धायामात्मनोऽनुग्रह ~~ऽऽत्मस्फु~~ तत्सहकारे प्रतिबिंबेना
वभासलाभो विषयव्यंजकत्वमिति क्रमः दृष्टः त्वमन्यत्रेष्यत्वं च धियः सिद्धमिति॥ न तथात्मन इत्याह॥
फलत्वमाध्यस्येति॥ प्रत्यर्थं परिणमनेन व्यंजकत्वाद्बुद्धेरेव क्रमो युक्तः फलत्वमाध्यस्य सर्वविष
येष्वस्य एकतयाऽऽसर्वदा सर्वत्रानुगतत्वप्रकाशस्वरूपस्यापरिच्छिन्नस्यात्मनो नैव युक्तः सक्रमः सर्वथा

देशतः कालतो वात्र मानाभावे दर्शनतः कालाकाशादिवदिति॥ ५७ ॥ नन्वस्य दृशस्यापि योग्यविष
याव भासकत्वाद्बुद्धेरिव परिणामः प्राप्नोतीत्याशंक्याह॥ विषयग्रहकामिति॥ विषयग्रहणं यस्य
कारणापेक्षयान्वेतासत्येव ग्राह्यशेषे च परिणामी सचित्तवत्॥ ५८ ॥ कारणापेक्षया कर्त्रादिकारकापेक्षया
ग्राह्यशेषे स्वासंसृष्टविषयांतरावशेषे च सति यस्य विषयग्रहणं न वेत्स परिणामी स्याच्चित्तवन्नैवमात्म
नो विषयावभासनं किंतु नित्यसिद्धप्रकाशस्वभावेन युगपत्सर्वाध्यस्तसमस्तावभासनमित्यतो न त
स्मिन्परिणामशंकावकाशः॥ ५९ ॥ यद्यपि तस्यौपचारीत्या भोग्यविषयाकारपरिणामो नास्ति तथापि अहंज्ञाना
कारेण परिणामः स्यात् अहंरूपः स्वात्मत्वेन सत्यपि तदाकारावभासस्यागंतुकज्ञानमापेक्षत्वादित्याशंक्याह॥ अह
मोहमितीति॥ अहं ब्रह्मेति ज्ञानं बुद्धेरेव विनिश्चयेन नाध्यस्तस्याविशेषत्वान्न तस्यास्ति परोयतः॥ ६० ॥
तत्त्वमस्यादिवाक्याद्ब्रह्मैव परमात्मैवाहमिति यज्ज्ञानं जायते तन्नाध्यस्तस्य साक्षिणः परिणामस्तस्यावि
शेषत्वात्स्वतः परतो वा निरवयवस्यासंगस्य विशेषासंभवात् किंतु बुद्धेरेवसानासायाविनिश्चयो वस्त्वा
२०४ विशेषइत्यहरार्थः॥ एतदुक्तं भवति॥ अनेकजन्मानुष्ठितयज्ञादिसंतादृष्टशेषनिरस्तसंस्कारवत्याः स २०४

४२ ४२

तर

गुणश्रेष्ठोपासनानिराकृतचांचल्यायाः सांप्रतं विवेकवैराग्यशमादिगुणसंस्कृतायाः परार्थ
दयपरिशीलनज्ञानादिनदहंसंस्काराया बुद्धेस्तत्त्वमस्यादिवाक्यश्रवणान्मम नंतरशोधित पदार्थ
गतकल्पितनेहांश्चातिरोधानेनाखंडाकाराकाविदवस्था जायते तस्यां प्रतिबिंबितश्चिदात्मा तादृशस्य
विविक्ताकारेणाहमिति प्रथमोत्पन्नतो विविक्ताकारमेवोपाध्यंशापोहेन स्वयमेव स्वसंप्रत्येति प्रतिप
द्यत इति॥ न तस्मिन्नपि विशेषरूपजायत इति विहात्मनः परिणामान्यगमपरिणामिनश्चित्तवत्स्वा
न्यवेद्यत्वनियमाद्वात्मनोप्यन्यः साक्षी कल्प्यते तदनुपपन्नमनवस्थानादतश्च माशंकात्वादेव स्वनिश्च
त्याह॥ न तस्यास्ति परोयत इति॥ ६१ ॥ यद्यप्येवं तथा करणस्य वज्ञानाकारपरिणामस्तथापि तस्य न ज्ञा
नफलत्वभागिता किं त्वात्मन एवेत्यभिप्रेत्याहं कर्तुः फलसंबंधदोषमाह॥ कर्त्री चेदिति॥ कर्त्री चेद्दृ
मिस्तवमनुभूयेत मुक्ततो॥ सुखदुःखविनिर्मोको नाहं कर्त्तेति युज्यते॥ ६२ ॥ कर्त्री विकारिणी चेद्दृङ्मुक्ता
इति मुक्तत्वानुभूयेत तदा नाहं कर्त्तेति कर्तृत्वोपमर्दनेन सुखदुःखविनिर्मोकोऽसंबंधस्तस्मिन्नेव यु
ज्यते कर्तुः सुखादिमत्त्वानुभवविरोधादित्यर्थः॥ कर्तुरपि क्रियया सह तदा विलीयमानत्वान्नातस

फलसंबंध इति भावः॥ ध्व॰ आत्मन्यपि कर्तृत्वं फलसंबंधस्तस्य कर्तृत्वनित्यत्वादित्याशंक्य सत्त्वे ज्ञानेऽह
यान्यांतरीयकत्तया बाध्यमानाध्यस्तानात्म सूत्रे तादात्म्यात्मना सस्य फलत्वोपचारात्तस्य चात्मन्येवोपन्नेरि
त्युक्तिश्च साहार्दिदेहादाविति॥ देहादावभिमानोऽस्यो दुःखीति प्रत्ययो ध्रुवं॥ उ॰ उक्तौ प्रत्ययो यद्वत्तत्तस्मात्
भिमानिनः॥ ध्व॰ बाध्यते प्रत्ययेनेह विवेकेनाविवेकवान्॥ इह दुःखी सुखपलक्षणं। सुखी स्थूलः कृशः स्थूलः आ
मी क्रोधीत्यादिः॥ उ॰ उक्तस्य स्वसंबंधित्वाभिमानस्तेते तत्संयोगवियोगयोः सुखदुःखे यद्ददितिदृष्टांता
र्थः॥ एवं बाध्यस्याध्यस्तत्वमुक्त्वा तस्य बाधमाह॥ प्रत्यगात्माभिमानिनेति॥ ध्व॰ विवेकवाना भिमानि
नः प्रत्ययो विवेकेन प्रत्यगात्माभिमानिनात्मतत्त्वपर्यायेनात्माभिमानिना प्रत्ययेन बाध्यत इत्यन्व
यः प्रत्यगात्माभिमानिनेति पाठांतरे सुगमं॥ अत्र प्राग्व्यक्तेनोक्तेन सह गणनयेह हत्व मर्क मेवाहुःस
अहस्त्वे विवेकवता विवेको प्रत्ययः कस्मान्न बाध्यते विरोधस्य समत्वादित्यत आह॥ विपर्यास इति॥
२०५ विपर्यासेऽसदंतं स्यात्प्रमाणस्याप्रमाणतः॥ ह॰ वैपरीत्ये प्रमाणस्याप्रमाणतापातात्सर्वमसदंतं शून्यां
तं स्यात्॥ प्रामाण्यकस्यार्थस्यासत्त्वे प्रतीतिमात्रस्य निरालंबनत्वापत्तेर्निरवधिको बाध इति शून्यांतता
४३

२०५
४३

प्रसंग इत्यर्थः॥ अयमर्थोऽपि कः॥ ह॰ विवेकेनाविवेकबाधो न चेत्तीति शं उक्तं प्रपंचयति॥ दाहछे
द विनाशेषु दुःखित्वं नान्यथात्मनः॥ नैव ह्यन्यस्य दाहादौ चैत्रो दुःखी नवेक्षितः॥ इह दाहादिर्देहाय
यात्तनिमित्तं हि दुःखमनुभूयते॥ नान्यथा तच्च देहाभिमाननिबंधनमन्यथा॥ सुषुप्तावपि प्रसंगा
दात्मा च देहादेरन्य इति प्रमाणसिद्धमतो न्यगतदाहादिना न्यस्य दुःखेति प्रसंगाद्व्यासनिबंधनं दु
ःखमहममेति ज्ञाननिमित्तमित्यर्थः॥ ह॰ आत्मनः स्वतो दाहादिसंबंधाभावे प्रमाणमाह॥ अस्पर्शत्वादिति॥
अस्पर्शत्वाद्देहत्वान्नाहं दाह्योऽयं ततः सदा॥ तस्मान्मिथ्याभिमानोऽस्यं मृते पुत्रे मृतिर्यथा॥ ह॰
फलितं सदृष्टांतमुपसंहरति॥ तस्मादिति॥ ध्व॰ प्रागुक्तं दृष्टांतं विवृणवन् विवेकप्रत्ययेनैवावि
वेको बाध्यत इत्युपपादितमुपसंहरति॥ उ॰ उक्तीति॥ ह॰ उक्तदृमितिहेतुं प्राध्येनैव विवेकिना
दुःखीति प्रत्ययस्तद्वत्केवलाहंधियासह॥ ध्व॰ केवलेऽशुद्धब्रह्मण्येवाहंधीः केवलाहंधीस्तयेति वि
ग्रहः॥ ह॰ न तु दुःखिनो मोहो परेऽत्रानुपपत्तेरात्मनोऽपि दुःखित्वमवगम्यते तत्तस्तत्त्विष्टयेनात्रात्म

त्वं गम्यते। ततो नान्यगतेन निमित्तेन दुःखी किंतु स्वत एवेति सुषुप्त्यादावपि शङ्कितमत्यमिति
वारितमिति चेत्तत्राह। सिद्ध इति॥ सिद्धे दुःखित्व इष्टं स्यात् स्वेच्छक्तिः इष्टं सात्मनः। मिथ्यात्वमान
ता दुःखी नेनार्थापादनेन भ्रमः॥ इह कस्यां चिद्दशायां स्वात्मा यथात्मनः केवलस्य दुःखित्वं प्रमाण
सिद्धं स्यात्तथा सति दृष्टं स्यादिष्टं यात तत्र दुःखित्वे शरीरकस्येन नसाकस्याप्यि तु ज्ञाक्यतेन ह
ख दर्शनस्यान्यथोपपत्तेरित्याह। मिथ्येति॥ अन्वयव्यतिरेकोपदर्शितोऽनेन मिथ्याति
मानेनिबंधनत्वेनार्थापादनं भ्रमो दुःखित्वानुभव इति योजना॥ अर्थापत्तेरनुपपत्तौ दुःखि
त्वेनाङ्कितमत्वापादनं तत्साहम इति समर्थयति मनुभवस्यान्यथोपपत्तिरित्यर्थः॥ तथा च यथाद
र्शनं दुःखशङ्कितमत्यमपि मिथ्यैवेति भावः॥ इह तामेवान्यथोपपत्तिं साधयति। अस्पर्शोपीति
अस्पर्शोपि यथा स्पर्शमवलस्थलना दिच॥ अविवेकात्तथा दुःखं मानसं चात्मनीहते॥ इह २०५
२०५ निरवयवस्पर्शस्यात्मनो यथा स्पर्शश्चलनादिदर्शनमविवेकादेवं आदिना द्रष्टव्यानोक्या
४४ ४४

नोपवेशनादिग्रहवते। एवकारास्परिच्छिन्नत्वादिमानः। तथा मानसं मन आश्रितं च दुःखमवि
वेकादेव आत्मनीहत इत्यर्थः॥ इह अविवेकादेव दुःखदर्शनमात्मनीत्येतदन्वयव्यतिरेकाभ्यामुप
पादयति। विवेकेति॥ विवेकात्मधियो दुःखं न तु भवते चलनादिवत्। अविवेकस्य भावेन मनो गच्छत्यनि
च्छतः॥ इह विवेकरूपया आत्मनैवधिये त्यर्थः। चलनादिवत्प्राय स्मात्स्थूलदेहविवेकात्मज्ञानेन चलना
दिस्थूलदेहसंबंधि मिथ्याध्यस्तमात्मनि निवर्त्यते। तथा सूक्ष्मदेहाविवेकनिमित्तं दुःखं ब्रह्मात्मज्ञा
नेन समूलं निवर्त्यत इत्यर्थः॥ इह अनिच्छतोप्यविवेकस्य भावान्मनश्चलतीति निमित्तमुक्त्वा
नैमित्तिकमाह॥ तदेति॥ तदा तु दृश्यते दुःखं नेष्टत्वे नैव तत्स्यात्तत्प्रसंगात्मनित्तस्मात्तद्दुःखं
नैवोपपद्यते॥ न नेष्टत्वे सति तस्मात्मनस्तद्दुःखं नैवेत्यन्वयः। उपसंहरति। प्रसंगात्मनित्त
स्मादिति॥ एवं च युक्तितः प्रसंगात्मनो निर्दुःखस्वात्मावसिद्धेर्वाक्यादेव ब्रह्मास्मीत्यपरोक्षं
ज्ञानं तत्त्वतोत्याह॥ त्वं सतो रिति साइमा॥ त्वं सतो स्तु स्यनीडत्वान्नीडोस्यैव देहेन वेत्त॥ निर्दुःख
वाचिनायोगात्त्वं ब्रह्मस्यत इत्यर्था॥ प्रसंगात्मा तिधानेन तच्छब्दस्य युतेस्तत्पा॥ इदं वार्थ कथमरवं

डाक्टर भाऊदाजी इत्याख्यस्मारकम्
DR. BHAU DAJI MEMORIAL

उआर्थनिष्ठत्वे तत्त्वं सत्तोस्त्वं सत्पदयोरस्तु स नीलोत्पलादेवनीलोत्पलादेरेकार्थवृत्तित्वान्नीलाश्वपदद्वयवहित
लेनार्थः। नीलोऽश्व इति पदद्वयोर्थयोः पि गुणिगुणरूपेण संसृष्टार्थविषयत्वं तथाप्येकद्रव्यपर्यव
सायित्वेन सामानाधिकरण्ये दृष्टान्त इति द्रष्टव्यं। कथं पदद्वयोरैकार्थ्यनिष्ठत्वं तद्दर्शयति। निर्दुःखेति
निर्दुःखत्वादिना सच्छब्देन योगात्सामानाधिकरण्यात्त्वंशब्दस्य तदर्थता सच्छब्दार्थता तथा प्रसंगा
त्मान्निधाने नत्वंशब्देन तच्छब्दस्य युतेर्योः सामानाधिकरण्याद् परोक्षत्वं तत्र सिद्ध्यतोऽसर्थः। वाक्य
प्प५ मंपरोक्षवस्तु प्रतिपादकमित्यत्र दृष्टान्तमाह। दशमस्त्वमसीति। दशमस्त्वमसीत्येवं वाक्यं स्वा
स्यस्य गात्मनि रास्पष्टं। ननु तत्त्वं पदयोरैकार्थ्यनिष्ठत्वे पर्यायत्वापत्तौ सहप्रयोगोऽनुपपन्न
इति चेन्नास्ति पर्यायत्वं प्रवृत्तिनिमित्तभेदात्सन्निधेस्यादि। स्वार्थस्येति। स्वार्थस्यैव प्र गा ४
णेन विशिष्टार्थसमर्पकौ। प्रसंगात्मावगस्यं तौ नान्योऽर्थोऽर्थाद्विरोधतः। ७२ प्रसक्षत्व परोक्षत्वस
२०१ होणस्वार्थस्य स्ववाच्यार्थस्य प्रहाणेनैवापरित्यागेनैव त्वं सच्छब्दौ विशिष्टार्थसमर्पकौ। अत्र २०१
तौ वाच्यभेदान्न पर्यायतेत्यर्थः। एवं तदर्थस्य एवं अर्थत्वं न स्यादित्याशंक्याह। प्रसंगात्मेति। प्रसंगात्

धप धप

नः शुद्धसाक्षिलक्षणेऽवगतिस्तत्त्वावगतिरंतोऽवसानं ययोस्तौ तथा। श्रूयमाणपदयोः सामानाधि
करण्ये मिथो विरुद्धवाच्यार्थसंसर्गेऽन्यतरविशिष्टेऽन्यतरे वा पर्यवसानमगच्छत्कल्पितभेद
परामर्शेनिलक्षणया विगतपरोक्षत्वापरोक्षत्वाद्यंशे स्वरूपमात्रे सोऽयं देवदत्त इतिवदेवं उपर्यव
स्यतीति प्रसंगात्मावगस्यं तौ तत्त्वंशब्दावुक्तावित्यर्थः। ननु तत्त्वंपदयोः सामानाधिकरण्यमंशां
शोत्यादिविषयतयाप्युपपत्स्यते किमित्येवं अर्थतापद्येयात इत्याह। नान्योर्थ इति। अतो स्मा
दुक्तादेवं आर्थादैकरसात्तिरोधी अन्योर्थो निवेद्यं ते श्रुतिपाद्यत इत्यर्थः। तदिदं विवक्षितं तत्त्वम
र्थयोः सुवर्णकुंडलमितिवन्नैकार्थ्यकारणभावेन संसर्गः संभवति। अन्यत्रासमान्वितान्नोत्ताक्षिति
श्रुतिविरोधात्। नापि तत्स्वरूपाभिद्देशांशिनोऽभावेन निष्कलं निष्क्रियमित्यादिकूटस्थैकरसप्रतिपा
दकश्रुतिविरोधात्। नापि गुणगुणिभावेन नीलमुत्पलमितिवन्निर्गुणत्वश्रुतिविरोधात्। नापि
जातिव्यक्तिविशिष्टस्वरूपादिप्रकारेण संसर्गः। एकमेवाद्वितीयमसंगो ह्ययं पुरुष इत्यादिश्रुतिवि
रोधात्तस्माद्विशिष्टसंसर्गविरोधि वस्तुमात्रनिष्ठत्वं वाक्यस्याखंडार्थत्वमिह विवक्षितं तथा च

विस्मृतमखंडार्थं निष्टमुपाधियुतामखंडं मंत्तयेणाविनाश्यमानमेद्दवस्तु निष्टत्वात्सोयं देवदत्तः
खंडितमित्यादिवाक्यवदिति॥७३॥ नन्वेवमखंडार्थनिष्टत्वेपि वाक्यस्यनतावन्मात्रेपर्यवसानं
युक्तं बोधमात्रात्फलासिद्धेर्यत्नांतरमेष्टव्यमिति क्रियापर्यवसायित्वाकस्मान्नोच्यत इत्याशं
क्यमुमुक्षोर्जिज्ञासितमर्थं विशयापयंतिरस्परत्वेनक्स्यनेऽनुष्ठिततात्पर्यपरत्वेनवाक्यस्याप्रामा
ण्यप्रसंगान्मैवमित्यसत्वेस्यज्ञानमात्राद्देवफलसिद्धेर्दृष्टांतेनोपपादयति॥ नेत्युधीत्याहिना
॥ नवल्कुध्यपहारात्सिद्धस्यान्मानं हृद्या हरणं॥ अयमन्द्राहुमेवेछेत्तत्वत्मानंजोनस्तथा॥७४॥ नवेव
वयमिति तुष्यात्मरूपयापहाराहिरोहितत्वाविरोधानमात्रेनिहत्तिफलत्तयाद्दरात्वसंस्था
याः हरणं स्वात्मानमपरूपनज्ञात्तुमेवेछेन्नतु किंचित्कर्तुमित्यर्थः॥ यथायं दृष्टांतस्तथाजनोमु
मुक्षुरपिस्वमात्मानं केनाप्यिदेहेनाविस्मृतं ज्ञातुमेवेछतित्त्रमनिहत्तिफलायेवातः क्रियाप
रत्वकल्पना नावकाशं लभत इत्यर्थः॥७५॥ प्रकृत्ते स्वात्मनः केनापहारः कृत इत्यपेक्षायामाह अ २०८
तिकंचिदेवंस्तुहा॥ अविद्या॥ वदेत्ता॥ अविद्याबद्धचेतस्त्वात्मायकृतधीः सह॥ विवर्तंहृश्य २०८

४६ ४६

पे८

मात्मानंनेहतेदृश्यं यथा॥७५॥ अविद्यानाद्यज्ञानंतयाबद्धमाच्छादितंवच्छुर्विवेकदर्शनंयस्यसजीव
स्तथा तस्यभावस्तत्वं तस्मादितिविग्रहः॥ आवरणमुक्त्वा विक्षेपमाह॥ मायकृतधीरिति॥ बहिर्विक्षिप्त
चित्तइत्यर्थः॥ सहासर्वदा दृश्यसंघातात् विवक्तमेवपरमार्थदृगात्मतत्वंनेहतेनपश्यतियथानवबु
ध्यपहृतस्वात्मतत्वोनवखेवविक्षिप्तचित्तोदशमेनवकोवस्तुसोनेहतेतैस्यर्थः॥७५ कथंतर्ह्यात्मानं
जानातीत्यपेक्षायांगुरुशास्त्राचार्योपदेशेनेत्याह आत्मानं जानातीति सदृष्टांतमाह॥ दशमस्त्वमसीत्येवमि
ति दशमस्त्वमसीत्येवंतत्त्वमस्यादिवाक्यतः स्वमात्मानं विजानाति ज्ञात्वानोत्तरं श्रवणं॥७६॥ दशमस्त्वं
तत्श्रवणेनमहं कर्तुरपि विवर्तं तस्माद्दिरणमित्यर्थः॥७६॥ ननु यच्छब्दबाध्यमित्यादौदृश्यत्वेह
ष्टांतेकंबएवकारश्रवणात्कुपादेयलक्षणमित्तिन्यायेन प्रथमनिर्दिष्टमुद्देश्यं चरमं निर्दिष्टमुपादेयमि
त्तिनियमोलोकवत्कथं॥ सदृहनोपपद्यते यत्तस्तत्त्वमिसच्चेत्तदर्थस्यप्राथम्यश्रूयतेऽद्दश्यत्वास्मीत्यत्र
त्वमर्थस्यएवंतत्त्वतत्त्वोऽन्यथाऽन्यथाश्रूयमाणत्वात्कथमिहोद्देश्यविधेयनियमइत्याशंक्यवेदपद
नामर्थवत्त्वादेवसंबंधोनपाठक्रमादाहरपात्रंपात्रमाहरेति वेदर्थनियमोविवक्षितोनाहाइदंश्रव

मिति। इदं सर्वमिदं यस्मात्परं वाक्यं न वेद हि॥ नियमो नैव वेदेऽस्ति पदसांगत्यसमर्थतः॥ ७७॥ यस्मा
न्नियमेऽपि प्रसिद्धमुद्दिश्यानूद्याप्रसिद्धो बोध्यत इति न्यायादिदं प्रसिद्धार्थकं त्वमहमादिपदं सर्वमि
दमप्रसिद्धार्थकं ब्रह्म सदादिपदं पश्चादिति सर्वं पदं विन्यस्तं वाक्यं न वेद हि। अन्वयव्यतिरेकाभ्याम
त४ वबोधात्ततो वाक्यार्थबोधनं त्वमर्थस्य तदर्थात्मत्वप्रतिपत्तिरूपं न वेद हि इत्यर्थः॥ ७७॥ उक्तेऽर्थे हेतुमाह
वाक्ये हीति। वाक्ये हि श्रूयमाणानां पदानामर्थसंस्मृतिः॥ अन्वयव्यतिरेकाभ्यां ततो वाक्यार्थबो
धनं॥ ७८॥ स्पष्टं॥ आचार्येण ब्रह्मासीत्युपदिष्टः स्वस्तु शिष्यः कथमहं ब्रह्मास्मीति टङ्कतीति त
दन्यथानुपपत्त्या वाक्यं साक्षाद्बोधजनने न समर्थं न भवतीति गम्यते इत्याशङ्क्याह॥ यदा नित्ये
ष्विति। यदा नित्येषु वाक्येषु पदार्थस्तु विविच्यते॥ वाक्यार्थज्ञानसंक्रान्त्यै तत्र प्रश्नो न युज्यते॥ ७९॥ ६१४
नित्येष्वर्थाव्यभिचारिष्वित्यर्थः॥ ७९॥ पदार्थतत्त्वानभिज्ञस्यैव प्रश्नो घटत इत्युक्तं स्पष्टयति। अ
२०८ न्वयेति। अन्वयव्यतिरेकोक्तिः पदार्थस्मरणाय तु॥ स्मृत्यभावे न वाक्यार्थो ज्ञातुं शक्यो हि केन
चित्॥ ८०॥ अन्वयव्यतिरेकोक्तिद्वारा भावान्तरवाक्येऽस्त्वदनुकूलैः श्रुतैः रात्मानात्मविवेचन। २०८

५७ ५७

मुच्यते पदार्थस्मृतिः पदोपस्थापितवाक्यार्थज्ञानकारणमित्यत्र लोकप्रसिद्धमाह। स्मृत्य
भाव इति। ८१॥ तत्रापि त्वंपदार्थविवेकेऽतीव प्रयत्नतः कार्य इत्यभिप्रेत्याह तत्त्वमस्यादीति त्रि
भिः श्लोकैः॥ तत्त्वमस्यादिवाक्येषु त्वंपदार्थाविवेकतः॥ व्युज्यते नैव वाक्यार्थो नित्यमुक्तोऽहमि
त्यतः॥ ८२॥ अन्वयव्यतिरेकोक्तिस्तद्विवेकाय नान्यथा॥ त्वंपदार्थविवेके हि पाणावर्पितबि
ल्ववत्॥ ८३॥ वाक्यार्थो व्युज्यते चैवं केवलोऽहंपदार्थतः॥ दुःखीत्येतदपोहेन प्रत्यगात्मविनिश्चयात् ८५४
॥ ८४॥ विचारप्रयोजनं दर्शयति। अन्वयव्यतिरेकोक्तिरिति। अत इति पूर्वश्लोकगतं परमस्मिन्योज्यं तत्
विवेकाय त्वंपदार्थविवेकायेत्यर्थः। पदार्थविवेकफलं स्पष्टयति त्वंपदार्थविवेके हीति। केवलो नेदं संसर्गशू
त६ न्यो वाक्यार्थ इत्यन्वयः॥ तत्र हेतुमाह। अहंपदार्थतो दुःखीत्येतदपोहेनेति। अहमिति प्रतीयमानात्मस
३त र्थाद्दुःखीत्येतस्यैतदंशस्यापोहेन प्रत्यगात्मनः साक्षिणो विशेषेण निश्चयादित्यर्थः॥ ८४॥ एवमुक्तेन न्या
येन वाक्याद्वा परोक्षापरोक्षं ब्रह्मात्मज्ञानमुपपाद्येदानीं सर्ववादिकल्पनाया निर्मूलत्वमाह। तत्त्वमिति
तत्त्वेवं संन्नवत्स्यर्थश्रुतानामनुक्तार्थधीः॥ नैव कल्पयितुं युक्ताय दवाक्यार्थको विदः॥ ८५ स्पष्टं॥ यथा ...

नं वाक्यस्य यथाश्रुतार्थे संभवति श्रुतहान्यादिकल्पनमनवकाशमित्याशंक्य प्रत्यक्षादि विरुद्धेर्थे सति
वाक्यशेषस्य बाधदर्शनादिति शर्कराद्दृष्टांतेन शंकते ॥ प्रत्यक्षादीनामिति ॥ प्रत्यक्षादीनि बाधेरन्नूह्यमस्त
दि गुणपाकवत्तां श्रुतिर्जातिनिमित्तेनैव क्रियेत्यादिवाक्यबाधनं ॥ यथा लोमशाननुप्रयोपेयेदिति लोमस्तनं श्रुतवाक्य
सुवर्णमयकर्कणुश्रुतोपि पाकश्रुतं प्रत्यक्षेण बाध्यते ते शुचिकेतेरदर्शनात किंत्वदृष्टार्थस्यैव संस्कारस्तत्र
पाकक्रियासाध्य एवमिहाप्यदृष्टार्थतां वाक्यस्य प्रत्यक्षादीनि प्रमाणानि नेदृशादृक्कानि बाधेरन्नूह्यश्रुते
ष्यात्मनोऽसत्वे दुःखित्वादर्शनात् ततः प्रसंख्यानेनात्मसंस्कारार्थतां वाक्यस्येति चेत्तत्रोत्तरमाह ॥ श्रेहीदृशो
सीति ॥ नवेदेवं यदि कर्तृत्वादि प्रतिभासस्य प्रत्यक्षप्रमाणतास्यान्नेत्तदस्ति श्रुष्मस्ताद्दकाराध्यपरागमं तेण
स्वतश्चात्मनि दुःखित्वादिधर्मसंबंधस्य निराकृतत्वात् ततः प्रत्यक्षाद्याभासैरेते प्रमाणत्वेनाक्यबाधने
कथं स्यान्नैव स्यादित्यर्थः ॥ प्रयाजेत्वसत्त्वत्तोदोत्तीति वक्ष्यन्ति ज्ञानं संस्कृतस्यैतमनोन्यत्रवियोगाद नि३
२०२० र्शनादिह न संस्कारार्थत्वं वाक्यस्योपपद्यत इत्यधोऽनुपपत्तेर्वादितस्यापि २०२०
मेवेति नावकाशः ॥ नन्वेवं विरोधितात्तदृष्टा प्रामाण्याभावेपि स्यादनुसन्ततिस्तद्दृष्ट्या ममप्रमाणं वाक्य

स्येति शर्ववादी शंकते ॥ दुःखस्मीति सत्योत्ति ॥ दुःखस्मीति सति ज्ञाने निर्दुःखीति न जायते ॥ प्रत
हो दि निमित्तेपि वाक्यानव्यभिचारत ॥ अदुःखी चादिनावस्योकरात्याप्रत्यक्षाद्याभासत्वेपि दुःख
स्मीति विरोधगंधि निज्ञाने सति वाक्यान्निर्दुःखीति विज्ञानं न जायत इति योजना ॥ शर्वदिदृत्या प्रत्यक्ष
स्यासंजातविरोधित्वेन प्राबल्यमस्तीत्यतिप्रायः ॥ दूषयति ॥ नव्यभिचारत इति ॥ ८० नभेव व्यभिचारमाह
स्वम इति ॥ स्वप्ने दुःखमहमस्मि संदाहछेदादिहेतुतः त्वात्ततो विनिर्वाक्येन बाधः क्रियते यदि ॥
निदाहछेदादि हेतुतो निमिज्ञादहं दुःखासंतत्तदाज्ञापदेशान्निर्दुःखोनुवर्तिस्यनुनवासत्त्वाज्ञाते
दुःखित्वादीत्यर्थः ॥ तथारानिनि जीवमनुवदतिनत्वालेत्ति ॥ ८८ तथापि दुःखमात्मव्यभिचारी स्याद्दा ॥
समासेति ॥ रिनि ॥ समासेस्त हि दुःखस्य प्राकृतबाधदृष्टतां न हि दुःखस्य संतानोत्थांते वीदृश्यते दुःखि कु५
त्वा ॥ ८९ दुःखसमासे रूढ्यंत बाधा दुःखबाधदृष्टते एवं प्राग्दृष्टं मपि दुःखं नात्म इति बाधदृष्टतामे
हि दुःखस्येदृश्यमानस्याज्ञाति रूप्यसन्निष्पात्याभिचारादित्यर्थः कृतो बाधदृष्टत इत्यत्र हेतुमाह ॥
नहीति ॥ त्वतेवैतिदृष्टान्ताद्यावाशब्दस्तस्या दुःखित्वादृशात्मनि सतिव्यभिचारासंगंखेकसंवाविक
रिएषात्मन्यनुपपत्तेरात्रौ यत्सत्त्वासिद्धो प्रमाणज्ञानं भुक्ते तत्त्वज्ञानमिव रजतादिबाधनं दुःखित्वा

डाक्टर भाऊदाजी इत्यास्य ... Dr. BHAU DAJI

हिंसाधनं कुर्वदिदं वाक्यं उदेतीति तेन वाक्यस्य साममर्थ्यं ज्ञानं वाक्यार्थज्ञानं इति तात्पर्यार्थः॥ एवं इत्थं वाक्यं नश्यति
श्रोतुर्दुःखमित्याह॥ प्रत्यगात्मन इति॥ प्रत्यगात्मनः आत्मत्वं दुःखमसीत्यस्य बाध्यार्थः॥ इदमेव तत्त्वमस्येव वचसा
चेदं विरुद्धत्वात्॥ एवं स्पष्टार्थः॥ विस्तरेणोक्तं ॥ यन्माया यर्थसंहिता याहं श्लोकस्य तुष्टयेन॥ नित्यमुक्तत्वे सति
ना॥ नित्यमुक्तत्व विज्ञानं वाक्यात् भवति नान्यतः॥ वाक्यार्थस्यापि विज्ञाने पदार्थस्मृतिः पूर्वकं॥ एवं अन्वय
व्यतिरेकाभ्यां पदार्थस्मर्यते ध्रुवं॥ एवं निर्दुःखमात्मानं अक्रियं प्रतिपद्यते॥ एवं सदेवेत्यादिवाक्येषु
प्रमास्फुटतरा नेव तत्॥ इत्थं तत्त्वमसीत्यस्मादेवं प्रत्यगात्मनि॥ स्वप्रमा स्फुटतरा परोक्षा॥ प्रबोधेन
यथा स्वामांसवं दुःखं निवर्तते॥ प्रत्यगात्मविषयात्तद् दुःखित्वं सर्वदात्मनः॥ एवं निगृह्य आख्याता श्लोकाः
पुरोक्ताः प्रसिद्धाः पाकदृष्टान्तवैषम्यं स्फुटयति॥ प्रसिद्धा विद्धि॥ प्रसिद्धा हि प्रमा जन्मतः अन्यार्थामृदु
त्वेन॥ तत्त्वमस्यादिवाक्येषु न त्वेवमविरोधतः॥ एवं प्रमायाः जन्मयत्र लोके [illegible] तदुज्यते यतस्त
दात्मान्या प्रमा दृष्टा पाने पाकार्थाः मृदुत्वेनोऽमृदु त्वात् लोके लाभमिति योजना॥ प्रसिद्धाः प्रत्यगात्म
रूपस्यानेकार्थदृशा वाक्यार्थवचने योगानुपपत्तेरित्यर्थः॥ प्रवृत्तेन तथा विषये विरोधे स्तीत्याह॥ तत्त्व
मिति॥ तत्त्वमस्यादिवाक्येषु त्वंपदार्थविवेकतः॥ न्यायत्तेनैव वाक्यार्थ इत्यत्रोऽयं चयस्तं पदार्थवि

वेचनेयत्नाधिक्यं सूचयति॥ वाक्येत्त्वमिति॥ वाक्ये तत्त्वमसीत्यस्मिन्नुज्ञानार्थं तिरसि दृश्यं॥ त्वम
र्थेऽसत्यसाहाय्याद्वाक्यं नोत्पादयेत्प्रमां॥ एवं पदत्रयात्मिकेऽस्मिन्वाक्ये तत्त्वमसिपदं चेति द्वयं ज्ञा
तार्थं प्रसिद्धार्थं त्वमर्थत्वं पदार्थेऽसत्स विज्ञानेऽसाहाय्यासाहाय्यं अन्यत्वात्तसहकारि विरहाद्वाक्यमे
तत्प्रमानोत्पादयेदपरोक्षं निश्चयस्वरूपामित्यर्थः॥ एवं असिपदस्योपयोगमाह॥ तत्त्वमोरिति॥ तत्त्वमो
स्तुल्यनीडार्थमसीत्येतत्स्यहं त्तवे तत्॥ तुल्यनीडार्थं कुरुत्वं तत्त्येत्यादिक्रियाकांक्षा निवारणेन सामानाधि
करण्यसिद्ध्यर्थं वाक्ये वर्तत्वस्य हि कुरणार्थमस्य समीत्यादिपदमुपयुज्यत इत्यर्थः॥ एवं च निराकांक्षे सा
मानाधिकरण्यसति कोऽसाविदस्यपेक्षायामाह॥ तत्त्वं बदिति॥ तत्त्वं प्रत्यगात्मार्थस्तत्त्वबार्थस्त्वमस्तथा
दुःखित्वात्मप्रत्यगात्मतत्त्वं वारयेत्तामुत्तावपि॥ एवं प्रत्यगात्मार्थस्य सप्रत्यगात्मार्थस्तत्त्वबः स्यात्स्वे
पदेन सामानाधिकरण्यादिति योज्यं॥ तथा त्वमस्त्वं पदस्य तत्त्वबार्थोऽपि दत्तत्पदेन सामानाधिकर
ण्यादिति योजना॥ तदावाविमावाहिति तमाह॥ दुःखित्वेति॥ तेनावयित्रा बोधत्वमर्थस्य दुःखित्वं ज्ञात्वार्थ
स्यानात्मत्वपरोक्षं त्वात्रारवारयेतामित्यर्थः॥ एवं एवं वाक्यार्थवर्णने ऽदितीयत्त्वपरमार्थविरोधः

ऽमतीत्यतिद्रेणोपसंहरति। एवं चेति॥ एवं च नेति नेत्यर्थं गमयेतां परस्परं॥ नेति नेति वाक्यसिद्धमर्थ
मित्यर्थः॥२०० पूर्वपक्षे अतद्धान्यपेक्षत्वकल्पना निःप्रामाण्यकेत्यक्षत्रमुपसंहरति। एवमिति। एवं सत्यमसी
त्यस्य गम्यमाने फले कथं॥ प्रमाणत्वमस्योक्ता क्रियापेक्षेत्युच्यते॥२०१ कथं वाक्यार्थः। यस्मा
देवं विचार्यमाणे क्रियाया अनवकाशस्तस्मादित्युपसंहरति। तस्मादिति। तस्मादद्यंतमध्यमपुरुषविलय
न्नविरोधतः। न कस्यामोऽप्यन्त्याच्छ्रुतस्तामोप्यनर्थकं॥२०२ अहो तत्त्वमसीति प्रथमोपुत्तमेश्च म
ध्यपहार्यविरोधना यन्यमतिरेकग्रहणकाले तत्त्वमिति विविक्तस्य प्रमानुमेनव काले विलयेत हेतु
शानकल्पनं तत्रेदर्थप्रतिपत्तिविरोधि यतोऽतो न कल्याणमः न कल्याणं न क्रियामिति। शेषः। किं च यस्मात्तत्त्वा १८५
देर्यन कस्यचिन्मः न केवलमनुत्तत्त्वात् क्रियात्यागज्यात् तत्सांगस्यानपेक्षत्वादर्थी स्यादित्याह। अत एतेति
नपेक्षत्वमर्थयोः स्वरूपमप्राप्यं चिंतनीयत्वाद्विधातुं शक्यते॥ तस्मादेवाप्यतोऽसंगत्वात्तस्मादेवत
222 स्यास्तिमात्रं सत्तो वाक्यमनेकाहिदोषप्राप्तिरपरिहार्या स्यात्तत्त्वमोऽस्ति सिद्धिमनपेक्षैव यथा कर्यं 222
चिन्ह्वितनविधानस्युपगमे चित्तस्वरूपसाक्षात्कारस्याप्रमात्वाद्विधानिरपेक्षस्य सिद्धेनिरर्थकः॥

५० ५०

११२

प्रसंख्यानविधिरिति॥२०३॥ उक्तार्थानतिक्रमेण पुनराहोपसंगेन यथेति। यथानुभूयते सिनु
ज्ञे वाक्यान्नगम्यते॥ वाक्यस्य विधृतिस्तद्गोऽज्ञान्यायसी क्रिया॥ तदुक्तेऽज्ञानमाशृंशिः फलवाक्य
वाक्यार्थज्ञानमात्रान्नगम्यते। मोहफलमिति शेषः। तस्माद्यथा गोऽज्ञातो गोमया ज्यायसी क्रियापा
यूसकरणां नोपपद्यते यतस्तत्र साधनत्वात्तद्वाक्यस्य विधृतिर्विधारणमर्थतोऽवधारणं न वाक्यार्था
परोक्षसाधनमित्यर्थः॥२०४ उत्सर्गतो वाक्यं नार्थापरोक्षार्थमित्येतदंगीकृत्य तत्त्वस्यापवादकृमाह सिद्धांती
शासत्यमिति। सत्यमेवमनात्मार्थवाक्यात्पारोक्ष्यबोधनं॥ प्रत्यगात्मनि न त्वेवं संख्याप्राप्तिवदेव॥ प्र
त्यगात्मनि तु नैवमप्येवमनिश्चितं किं संख्याप्राप्तिवदिदमसंख्याप्राप्तिवदपरोक्षज्ञानसाधनत्वं वाक्य
स्यैवमेवेत्यर्थः॥ यदुक्तं इत्यपेक्षायां स्वतोऽपरोक्षप्रत्यगात्मन एव ब्रह्मत्वोपदेशादित्याह॥ स्वसंवे
द्यत्वेति। स्वसंवेद्यत्वपर्यायः स्वप्रमाणकत्वं॥ निष्टत्वादरमः सिद्धः स्वात्मनोऽनुभवेन॥ पस्व
प्रमाणकः प्रमाणानिरपेक्षप्रकाशमानता स्वतावेत्यात्मेष्यतां स्वयंज्योतिष्टादिश्रुतेरित्यर्थः॥ तथा च
वाक्यादहमोऽहंकारस्य ब्रह्मनेदकृस्य निवृत्तौ स्वात्मनोऽनुभवश्च सिद्ध एवेनो स्मात्कमिति न किंचि

विषयत्वं सुषुप्तादावहंदर्शनमस्त्वमसीत्यादावन्यत्रापि वा रश्चे [illegible] त्युक्तं भवति॥५॥ अत्र दुःखानुभव विध
शंकानकार्या दुःखस्यव्याप्तिवारि ख्यात्मे २ ख्य ३

दनुपपन्नमित्यर्थः। विमतं परोक्षार्थज्ञानजनकं वाक्यत्वात्संमतवदित्यादिप्रयोगेष्वनात्मधर्मत्व
स्यानिरस्तत्वाद्विषयत्वौधर्मत्वाक्षेपस्तत्रेत्याह॥ बुद्धीनामिति॥ बुद्धीनां विषयो दुःखं तादृस्य विष
यामत्ता। कुतोस्य दुःखसंबंधो दृशेः स्यात्स्वात्मगात्मनः॥ दुःखी॥ अहमस्मीति दुःखधर्मवत्त्वेनाहंकर्तु
रेवानुभवात्तस्य विषयत्वं न तु दुःखं न बुद्धिद्रष्टा सा श्रयाहंकर्तृसाक्षिण आत्मनो धर्मः संभवतीत्यर्थः।
हृसर्वधर्मरहितश्चेत्स्वात्मगात्मा कथं तस्यानुभव इत्यत आह। दृशिरेवेति। दृशिरेवानुभूयेत स्वेनै
वानुभवात्मना॥ तदा नाशस्तथा जन्म धियो स्यानुभवः स्मृतः॥७॥ दृशेरनुभवरूपत्वात्तस्य स्वरूप
कोनाम्नान्यो नुभवोऽपेक्षत इत्यर्थः॥ तर्हि कथं तस्य विशेषानुभव इति तत्स्वरूपमाह। तदा नाशस्तथेति
चेतस्या नाशस्त्वा तथा धियो जन्मैवात्मन आगंतुको नुभवः स्मृतो विवक्षित इत्यर्थः॥७॥ प्रकारांतरे
ण प्रसंख्यानप्राप्तिं निराकरोति। अज्ञानादीति॥ अज्ञानादीनिमुक्तः सिद्धो मोहास्त्वमेव सर्वस्मा
२२२ त्त्वाद्धितत्त्वे स्येति द्विरूप कथमुच्यते॥८॥ सर्वसंसारनिर्मुक्तो नित्यशुद्धो मोहो ब्रह्मत्वमेवेसा चार्यो २२३
५२ पदेशो सति तत्त्वश्रोतव्याद्यनुष्ठेयं विधत्त इति कथं विरुद्धमुच्यते। न ह्य विक्रियं ब्रह्म तत्कर्तृचेतिवचः ५१

प्रमाणं स्यादित्यर्थः॥८॥ अथ न त्वं सेत्स्यतीति विपरिणामभुपदेशवाक्यस्यानुयेयत इति नांदामन्त्र
यत्त्वेकं संधितस्ततोऽपरं प्रवर्तत इति न्यायेन मोहास्तिस्त्वप्रसंगं दोषमाह॥ सेत्स्यतीति। सेत्स्यतीत्ये
वचेत्तत्स्याकृतत्वादित्तदानवेत्त॥ मोहस्यानित्यनेवं स्याद्विरोधेनान्यथा वचो॥९॥ एवमनुभवात्विरोधे स
तिवचोवाक्य॥ नान्यथा न विपरिमाणवद्यत्कमित्यर्थः॥९॥ इतश्च प्रसंख्यानवादोऽनुपपन्न इत्यत्र
हाश्रोतृश्रोतव्ययोरिति। श्रोतृश्रोतव्ययोर्भेदो यदीष्टः स्याद्वेदिहं॥ इष्टार्थश्चो एवं स्यान्न युक्तं सर्व
यावचो॥ यश्रोत्रादिभेदो यदीष्टः स्यात्तदेदं प्रसंख्यानं न वेत्कोटकर्मणि दानावेकार्यानुपपत्तेरित्यर्थः
अस्तु भेद इति चेत्तत्राह। इष्टार्थेति॥ जीवस्य ब्रह्मनावो हि इष्टार्थः सोन्यस्यान्यभावायोगादिदन्येनात्तः
सर्वथा वचो वाक्यं न युक्तमप्रमाणमेवं प्रसंख्यानपरो न वेदित्यर्थः॥१०॥ न युक्तं वचः स्येत्तस्य कर्ता ५४
सिद्ध इति॥ सिद्धो मोहोहमित्येवं ज्ञात्वात्मानं न वेद्यपि। विकिर्षुयः समूढात्मा ज्ञास्त्रे चोद्वाटयत्सवि
एवं प्रकारेणात्मानं ज्ञात्वा यो यदि विकीर्षुर्न वेत्स मूढात्मा स्वन्वयः। उद्धाटयत्सत्साद्यत्तीत्यर्थः
एस मूढात्मत्वं प्रकटयति। न हीति। न हि सिद्धस्यकर्तव्यं सकार्यस्य न सिद्धता॥७ न या संबंनं दुर्विज्ञात्म

नवं च यस्यापि॥२२ स्पष्टं। ननु किमत्यस्मान्निंदृष्यास्मदन्तिप्रायमज्ञात्वैवेति पूर्ववादी ह्यस्याभिप्रायमा-
विष्करोति॥ सिद्धो मोहहस्त्वमिति॥ सिद्धो मोहस्त्वमित्येतद्वस्तुमात्रं प्रदर्श्यते॥ श्रोतुस्तथात्वविज्ञा-
नेप्रवृत्तिः स्यात्कथं त्विति॥२३ मुमुक्षोरात्मविज्ञाने प्रवृत्त्यर्थं सिद्धब्रह्मरूपो मोहस्त्वमसीति वस्तु-
मात्रकथनपरमिदं वाक्यं न तत्त्वेपर्यवसितमित्यर्थः॥२४ उक्तमेव विवृणोति। कर्त्तेति॥ कर्ता दुःख्यहं
मस्मीति प्रत्यक्षेणानुभूयते। कर्त्ता दुःखी च मा भूवमिति यत्नोऽन्वेतुतः॥२५ स्पष्टं। वाक्यश्रवणानं-
तरं मंतव्य इति श्रुत्या कर्त्तव्यविधानादप्येवमेवाभ्युपेयमित्याह। तद्विज्ञानायेति॥ तद्विज्ञानाय मुमुक्षो-
२२४ हि कर्तृत्वं श्रुतिरब्रवीत्। कर्तृत्वाद्यनुवादेन सिद्धत्वानुमेवायतु॥२६ त्वमिति कर्तृत्वमनुद्य वस्तुगत्या त्वं २२४
५२ सिद्धमोहब्रह्मरूपोऽस्यतत्त्वज्ञानाय यतस्वेति वाक्यतात्पर्यमित्यर्थः॥२७ नेयं कल्पना श्रुत्यनुसा- ५२
रिणीति सिद्धांतीह षयत्ति॥ निर्दुःख इति। निर्दुःखो निष्क्रियोऽकामः सिद्धो मोहोहमित्यपि ऽप्रटहीत्वैवं
विरुद्धार्थमाहृध्यात्कथमेव सः॥२८ निर्दुःखादिविशेषणो मोहमेवाहमिति अग्रहीत्वा यी सम्बन्धयः वा-
क्याद्वाक्यार्थज्ञानं न जायत एवेति न वक्तुमुचितम् प्रा... मा एप्रसंगाद्नु न च विरोधात्वेत्तथान्वो

छू ४

त्यन्ते ज्ञाने तद्विरोधे सदृश इति पत्तिर्न संजाघटीतीत्यभिप्रायः॥२६। यदि वाक्यादेव निर्दुःखादित्व-
ज्ञेण मोहमात्मसाक्षात्कारः कथं तर्हि तदात्तविरुद्धाकारानुभव इति पृच्छति। सकाम इति। सकामः सक्रियोऽसि
द्ध इति मनुभवः कथं। अतो मे विपरीतस्य तत्प्रत्यभिज्ञानं महति॥२७ अतः सकामत्वादिरूपाद्विपरीतस्य मे आत्म-
तत्त्वस्येत्यर्थः॥२८ अन्यस्वनावस्य सतो ममान्यस्वनावानुभवः कथमित्यस्मिन्नर्थे सक्रुद्धेत वाक्यस्य युक्तः
प्रश्नो घटते युज्यते। ननु कथमहं निर्दुःखादिरूप इति मुक्तोत्वानुभवार्थ इति प्रश्नविषयं विविच्य प्रति-
वक्ति। इहैवेति। इहैव घटते प्रश्नो न मुक्तो त्वानुभूतये। प्रमाणेन विरोधीयः सोत्रार्थः प्रश्नमर्हति॥२८
स्पष्टं। अज्ञातज्ञापनस्वनावेनाशर्वार्थबोधितं तद्विरोधीयः प्रमाणान्तरासग्रहीतोऽर्थः प्रश्नमर्हति इत्यर्थं
प्रपंचयति। अहं निर्मुक्त इति। अहं निर्मुक्त इत्येव सदसीत्यन्यमाने जगंप्रत्यक्षान्तासजन्यत्वात् दुःखितं सप
प्रश्नमर्हति॥२९ सदसीति यदन्यमानं तज्ज इत्यर्थः॥३० इदानीं शिष्याकांक्षावशेनाभिप्रायं कथनं
न घटत इत्याह॥ दृष्टमिति। दृष्टमाकांक्षितं वा यदुःखाभावमतीक्षितं॥२० किंतदाकांक्षितं तदादुः-
खाभावमतीक्षितमिति। दुःखस्याभावो यस्मिंस्तदुःखाभावं ब्रह्मरूपं मोहसहरूपमित्यर्थः॥२०॥

प्रश्नस्वरूपमुपन्यस्य तदनुरूपत्वं प्रतिवचनस्य निगमयति। कथं हीति॥ कथं ह्यहं निवर्त्तेत दुःखं स
र्वात्मना मम॥ इति प्रश्नानुरूपं यथा स्यात् दुःखनिवर्त्तकं॥१११॥ स्पष्टे॥ ननु दृष्टमेवोच्यते प्रसंख्यानद्वा
रेण तद्व्यतिरेकेण श्रुतेर्दुःखापनयनसामर्थ्याभावादित्याशंक्य प्रमातुस्य प्रमेयावबोधनमेव कार्यं
न कार्यांतरमस्तीति परिहरति। श्रुतेरिति॥ श्रुतेः स्वात्मनि नाशंका प्रामाण्ये सति विद्यते॥ तस्मादि
त्यविमुक्तत्वं प्रत्याययति तत्कथं॥११२॥ वक्तव्यं तत्त्वार्थं स्याद्विरोधेऽसति केन चित्॥ श्रुतेः स्वतःसि
द्धप्रामाण्ये सति स्वात्मनि स्वप्रमेये नाशंका विद्यते स्वप्रमेयावभाससामर्थ्याभावाशंका न विद्यत
इत्यर्थः। किं ततः सिद्धं तदाह। तस्मादिति॥ मुक्तत्वप्रत्ययं प्रतिकारकत्वं यातीत्यर्थः। विरोधपरिहारत्वे
तत्त्वादिति नावगो॥११३॥ वाक्यस्योक्तार्थानुभवहेतुतां विहाय गत्यंतरं नास्त्यनुभवमार्गं गतमित्याह। गा ४
इतोन्य इति। इतोन्योनुभवः कश्चिदात्मनो नोपपद्यते॥ अविज्ञातं विजानंतं विज्ञातारमिति श्रुतेः॥
२२५ स्वप्रकारांतरकल्पनात्रानुपपन्ना श्रुतिविरोधादित्याह। अविज्ञातमिति॥११४॥ यदुक्तं पूर्वपक्षि २२५
णा प्राकृचर्याऽनाशास्त्रसंवेद्यस्यादनिष्टत्वात् इति तदन्यथैवोपपत्ते प्रसंख्यानकस्यकेमित्याह
५३ ५३

ए४ वृ२

वं पदार्थेति॥ त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणां। साधनत्वं व्रजत्येव शांतो दांतानुशासनात्॥ श
शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यतीति श्रुतेरुपरतिशब्दनिर्दिष्टस्य संन्या
सस्यात्मज्ञानं प्रति साधनत्वावगमान्न तस्याशास्त्रसंवेद्यत्तया परित्यागप्रसंग इत्यर्थः। तथा च वाक्यार्थज्ञा
नस्य पदार्थज्ञानपूर्वकत्वात् पदार्थावधारणपर्यंतमेवाश्रमधर्माणां विधितोनुष्ठानं ततः परं तु वाक्यादव
गते ब्रह्मात्मतत्त्वस्य मयेदमस्मै कर्त्तव्यमिति नियोज्यविषयप्रयोजनबुद्धेरनुत्पत्तेर्न तस्य क्वापि विधितः
प्रवृत्तिः किंतु साधकावस्थायामभ्यस्तस्य निवृत्तिरूपस्याश्रमधर्मस्य ज्ञानाविरोधिनः संस्कारमात्रेणानु
वृत्तिर्भवति तत्सम्यग्दर्शनस्य यथेष्टचेष्टाप्यवकाशं लभेत इति सर्वमवदातमेवास्मन्मत इति भावः॥११५॥ तदेव प्र
पंचयिष्यन् वाक्यार्थोदयप्रकारं श्रौतं व्यवतारयति। त्वमर्थमिति॥ त्वमर्थं प्रत्यगात्मानं पश्येदात्मानमात्मनि।
वाक्यार्थं तत आत्मानं सर्वं पश्यति केवलं॥११६॥ शांतो हि साधनसंपन्नो भूत्वात्मन्येवात्मानं सव्याद्वैरस्वका
र्यसंघात एव न बहिरित्यात्मानं प्रत्यक्चेतयितारं पश्येदिति श्रुत्यर्थः प्रथमार्द्धेनोक्तः॥ सर्वमेनं पश्यतीति
श्रुत्यर्थमुत्तरार्द्धेनाह। तत इति। एवं शोधितं प्रत्यगात्मानं सर्वं सर्वं ब्रह्म पश्यतीति श्रुत्यर्थो दर्शित इति भा

तयति वाक्यार्थमिति॥ एवं विज्ञानवाक्यार्थस्य विधिगोचरत्वाभावे संजवतीत्याह॥ सर्वमात्मेति
सर्वमात्मेति वाक्यार्थे विज्ञाते स्य प्रमाणत्वं अस्त्वेव प्रमानस्य विधिस्तं योजयेत्यर्थः॥ रुद्रस्यापि
वाक्यार्थविज्ञानात्प्रागेव विधयोऽवकाशं लभन्ते नोर्ध्वमित्युपसंहरति॥ तस्मादिति॥ तस्माद्वाक्या
विज्ञानात्प्रागूर्ध्वं कर्मविधिर्नेवेत॥ न हि अहमस्मि कर्तेति विरुद्धमवत्तोधियो॥ १४ ऊर्ध्वं विध्यसंजवे हेतुमा
हानहीति॥ ३० नन्वैक्यज्ञानेन भेदज्ञानमेव किमिति बाध्यते विपरीतमेव किं न स्यादित्यत आह अ
स्मीति चेति॥ ब्रह्मास्मीति च विहितं नैव कर्तेति बाध्यते॥ सकामो बोद्धस्यैवं प्रमाणानां सजानतया ११
प्रमाणानां सा ज्ञाता प्रमाणानां सजातये ति विग्रहः॥ २८ स्वभावप्रवृत्तायां बुद्धेः प्रमाणजातयां बा
तां दृष्टान्तेनोपपादयति॥ आत्मास्मीति॥ आत्माहमस्मि नान्योऽहमिति बुद्धिर्न वेदहः॥ यथाऽनुत्पन्नत्वदे
धीर्यथा देहात्मधीरिति॥ एव देहात्मधीरन्वेतेदेवं धीः कर्तारमित्येवं धीरपुत्रे त्यन्वयः॥ यथा देहात्मधीमं
तुष्याहमित्यादिरूपा आत्माहमिति तात्मतत्त्वस्य नैवर्तितत्यस्यार्थः॥ ३९ विहितात्मतत्त्वस्य कर्त्रीकामी स्या
दिधीरन्वकार्त्रीत्यर्थे दृष्टान्तान्तरमाह॥ सन्नयादिति॥ सन्नयादन्नयं प्राज्ञस्तदर्थं यतते वा॥ समुन्नस

डाक्टर भाऊदाजी ... DR. BHAU DAJI

~~लोकप्रसिद्धम्~~ नुवाद श्लोकःस्पष्टार्थः॥ १३॥ यदुक्तं न योगाभावे ज्ञानिनो यथेष्टचे
ष्टा प्राप्तिरिति तत्राह यथेष्टाचरणप्राप्तिः संन्यासादिविधौ कृतः॥ तदा पि
न यं गन्तुं स्वतन्त्रश्चेन्न गच्छति॥ नु यल्लोकप्रसिद्धार्थज्ञानबुद्धस्य वाक्यार्थानुजन्मार्थे॥ २१ अत्रादि
पदाद्वेदविहितविधिर्गृह्यते॥ पदार्थयोरासमन्तात् ज्ञानं पदार्थज्ञानं पदार्थस्य स्वरूपालोचनं तेन बुद्धस्य देहाद्यभि
मानशून्यस्येति यावत्॥ पदार्थज्ञानाद्बुद्धस्य तिबुद्धस्येति वा॥ वाक्यार्थानुजन्म अर्थ्यमानस्य तत्रैव स्वेच्छ
चित्तस्यस्थितो यथेष्टाचरणप्राप्तिर्निमित्तानां देवसरासा नाम्नैव स्यर्थः॥ प्रबुद्धवाक्यार्थस्य तु मिथ्या
ज्ञानलेशस्याप्यसौ वा नतु न्यायथेष्टचेष्टानो निमित्ती ति नावः॥ प्रकरणार्थमुपसंहरति॥ अतस्स
र्वमिदमिति॥ अतः सर्वमिदं रसिद्धं यस्मादगस्मान्निरीरितं॥ २४ मुमुक्षोरपि नास्ति यथेष्टचेष्टा कृतः
सा मुक्तस्यादिति कैमुतिकन्यायमाह॥ योहीति॥ योहि यस्मादिरक्तस्यान्नासौ तत्संप्रवर्तते॥ सो
कं नयादिरक्तोऽन्नन्तु मुक्तः किमिती हते॥ २३ स्पष्टः॥ विदुषो योगे नियोगपारतन्त्र्याभावेपि निहारना
दि प्रवृत्तिवद्विषयान्तरेपि प्रवृत्तिः केदाचिदिति [illegible] चेत्तन्नाह॥ क्षुधयेति॥ क्षुधया पीड्यमानोपि
न विषं ह्यत्तुमिच्छति॥ मृष्टान्नध्वस्ततृड्ज्ञानन्नामूढस्तज्जिघत्सति॥ २५ उत्पन्नैतत्त्वज्ञानेस्यविष
याणां दुःखसाधनता बोधारणात्सर्वं प्रागेव विषयस्य ज्ञानान्नपुनरुपादानममूढस्य संभवति॥

निराकरणादेरस्तु ज्ञाननिष्ठाविरोधाभावाच्छरीरस्थितिमात्रहेतुतया च प्रकृते प्रसङ्गोऽपि च यद्वेदान्ता
भावाद्वसंस्कारवशादनुवृत्तिरिति न दोष इति दिक् ॥१४॥ ननु तत्त्वज्ञानस्य यद्यपि किमपि ज्ञातव्य
नास्ति तथापि गुरुः शास्त्रे माननीय एवेति शिष्यान् शिक्षयन्निव गुरुं प्रणमन् निबध्नाति ॥।
वेदान्तवाक्येति । ॥वेदान्तवाक्यपुष्पेभ्यो ज्ञानामृतमधूत्तमम् ॥ उद्धारालिवद्येन स्मै सद्गुरवे न
मस्तुभ्यम् ॥ ॥इति तत्त्वमसिप्रकरणम् ॥ ॥नोऽस्मद् इत्यर्थः ॥ ॥इति तत्त्वमसिप्रकरणमष्टाहस्त्रीविवृ
तम् ॥ ॥श्रीसद्गुरवे नमः ॥ ॥छ॥ ॥तदेवं संक्षेपविस्तराभ्यां तत्त्वंपदार्थपरिशोधनपूर्वकं ब्रह्मात्मै
क्यलक्षणवाक्यार्थज्ञानं सफलं सर्ववेदान्तप्रत्ययं प्रमाणयुक्तिभ्यामुपपादितं निःसन्दिग्धबु
द्धमुक्तसत्यज्ञानानन्तानन्दरूपनावस्य प्रत्यगात्मनो मे हविपर्यासाधनेकानर्थहेतुश्चाहंकारमनो
बु३ बुद्धिचित्ताख्यमन्तःकरणमिति चेत्तत्राह ॥ इदानीं साधनान्तरेण मनोऽध्यासनिबन्धन एवात्मनः
२२७ संसारो तो मनःस्वरूपतत्त्वेऽनुसंधानेन तद्विलापनेन यत्नः कार्य इत्यभिप्रायेणात्ममनःसंवाद २२७
रूपं प्रकरणमारभमाणो भगवान् भाष्यकारः प्रकरणप्रयोजनं तावदाह ॥ प्रयुज्येति ॥ प्रयुज्य
५५ ५५

स्मा ज्वरनाशकारणं चिकित्सितं ज्ञानविरागभेषजं ॥ नजाति कामज्वरसंनिपातजां शरीरमा
त्मात्तयोगदुःखिताः ॥१ चिकित्सितं चिकित्सा तां वेनि ष्टाज्ञानं विवेकरूपं विरागरूपं विरागश्चैहिकामु
ष्यमनोरक्तिविषयेषु वनासक्तिलक्षणं तु नेभेषजं यस्मिंस्तच्चिकित्सितं तस्मा स्वरूपज्वरनाशकारणं
प्रयुज्य दुःखितां दुःखितत्वं न यान्ति पुमानिति योजना ॥ काम एव ज्वरस्तन्निमित्तः संनिपातो मूर्छा आ
त्मानात्माविवेकालक्षणस्ततो जातां शरीरपरंपरायातयोगैः संबंधैर्दुःखितामित्यर्थः ॥ अथ कास्मिकि
त्सितमिति भेषजविशेषणं योज्यं ॥ सम्यग्यथाशास्त्रं साधितमित्यर्थः ॥२॥ भेषजप्रयोगप्रकारमा
म५ त्मनःसंवादेन प्रपंचयति ॥ अहं ममेत्यादिना ॥ अहं ममेति त्वमनर्थमीहसे परार्थमिच्छंतितवान्मई
रितं ॥ न तेऽर्थबोधो न हि मेऽस्ति चार्थिता ततस्तु युक्तः शम एव ते मनः ॥३॥ हे मनः अहं ममेति इदमित्यपि
दृष्टं सर्वं मनर्थं अर्थमीहसे चेष्टसे नानुवृत्तदृर्थमेवाहं चेष्टे ऽतः कथमानर्थक्यमिति चेन्नाहं सांख्या
पं प्रत्येव मन्निमानस्तु वेष्टतरमाह ॥ परार्थमिच्छंतीति । तवेहितं परार्थं पुरुषस्य भोगापवर्गार्थम
न्ये सांख्यादयं इच्छंति न वयं वेदान्तसिद्धांतवेदिनः विचार्यमाणे तन्मनोषितमपि मुधा यतस्तेऽर्थबोधो

न संभवत्यचेतनस्य कामयितृत्वमर्थिता स्ति ततस्य तेन कामोऽन्यः परमुक्त इत्यर्थः ॥ अत्र आत्मनोऽर्थित्वाभा
वं साधयति ॥ यत इति ॥ यतो न चान्यः परमात्मनात्मनाऽस्ति देवतद्धोऽहमतो न मेऽर्थिता ॥ स ईश्वर इच्छ
न कामयेहि तं यत्तस्य चेतः प्रकाशमायत्ते हि तो ॥ इस मात्मानात्मसर्गानेद रूपात्स्परमा इव विकारात्परमात्म
नोऽन्यो नाहं यतोऽतः स ईश्वरः इत्याहि रूपरूपा स्मादचेतनस्य प्रकाशमायत्त स्व मुमुक्षुणा मनो विलयनेय
त्नः कार्य इत्यतिप्रायेण ॥ परमार्थेनेदं न स्वस्यार्थित्वाभाव उक्तः स्तमेवानेदमुपपादयति ॥ षडूर्मिमाला
वेति ॥ षडूर्मिमाला स्मृतिरित्येवं यः स एव चात्मा जगतश्च न श्रुतेः ॥ प्रमाणतस्त्वापि मया प्रवेधते मुधै
वन स्मात्वमनस्तवेहितं ॥ अज्ञानायापिपासा शोको मोहो जरा मृत्युरिति ॥ प्राणमनोदेहधर्माः षडू
र्मयः तैः विनिर्मुक्ततिरोभाव रूपास्तेषां माला अविच्छिन्नाः परंपरा यस्तां अश्नाती स सर्वात्मनाऽहंपृथक्कृत्य
२२८ हं तैः सिद्धो निःप्रयत्न इति यावत् ॥ य एवंविधः स एव जगतः सर्वस्यात्मा च कार्यत्वा ह मे चात्मा श्रुतेः २२८
यश्चाह्लादयरोऽहं तद्गुरस्त य आत्मा सर्वान्तर इत्यादेः श्रवणादित्यर्थः ॥ अहमात्मा गुडाकेश सर्वभूताशा
५६ यस्थित इत्यादिस्मृतिप्रमाणतोऽपि च कारात्कार्यकारणयाविदयपरामर्शमंतरेण स्वतोऽनेहानित् ५६

यणहि स्मारिन्मायादिद दनु नवाच्च मया प्रवेधते सम्यगुज्ज्ञायते मुधैवेति सुगमं ॥ ध्याऽ स्पगात्म
नः परमात्मात्मनेदं प्रमाणे कमुख्यानेद प्रतिज्ञा सस्यमनः कल्पितत्वेनाभासतामुपपादयति ॥ त्वयी
ति ॥ त्वयि प्रज्ञां ते न हि चास्ति नेदधीर्यतोऽजन्मोहमुपैति मायया ॥ यह ओहिमायाश्च तत्स्वप्रकारणं गृहादि मोऽकेन
हि सास्ति कस्यचित् ॥ यतो नेदधीयोजगत्स्यात्मनोऽजातं मोहमाकुलोभाव मग्नतां याति मानस्तेनेत्येया मा
यया तु पैति निस्संसंबंधमतेसा नेदधीस्त्वयि मनुस्त्री प्रज्ञातेन न चास्ति सुषुप्तो त्वदनावेत्तरन्नावदर्शनाहि
त्यर्थः ॥ अन्वय व्यतिरेकाभ्यां नेदग्रहस्यानर्थहेतुतामुपपादयति ॥ यहो ही ति ॥ सुषुप्त्याहोऽनेदग्रहाभावे
मायामोहयोरदर्शनादित्यर्थः ॥ ध्य इत्तश्च मनश्चेष्टितं हि ध्येत्याह ॥ नमस्तीति ॥ नमस्ति मोहस्तव चेष्टि
तेन हि प्रबुद्ध तत्वसत्वसितोऽह्यविक्रियमनर्वतित्वा शरनेदताहि नोद्धेवेत्तस्माच्च मनस्तवेहितं ॥ इ
असितो बंधर हितः प्रबुद्धतत्वेस्वभावमसितत्वमविक्रियत्वं च कल्पारयति ॥ नश्वेति ॥ श्वतत्वं इत्वा
वस्त्वा ईश्वतत्वाउत्तरजन्नेदताउत्तरकालेतत्वनेदताऽनोऽस्मात्केनास्ति तत्वप्रबोधात् ईश्वो निरकालयो र्मे
विशेषोऽस्तीत्यर्थः ॥ हि यस्मादेवं तस्मात्वन्तेतातिश्चायानावादित्यर्थः ॥ ७ सर्वदृश्यपातिने लिंसावात्मनन्त्र

गंतुं क्रान्तिस्तयायोगं साधयति॥ यत इति॥ यतश्च निःसोऽहं मनो न चान्यथा विकारयोगे हि भवेदनित्य
ता॥ सदा प्रशान्तोऽहमतो हि वाद्वयो विकल्पितं वाप्यसदेव संस्थितं॥७॥ अन्यथा अनित्यता न तु कुतो
ऽनित्यता प्राप्तियोगिनि विधीयते तत्राह॥ विकार इति॥ परिस्पंदपरिणामादिरूपविक्रियाभावे विप्रको
ण्णा प्रकाशसंसर्गरूपविक्रियास्यादित्याशंक्याह॥ सदेति॥ सदा नितांतं वै बत्रास्तलोकः प्रपञ्चो
तन्नः प्रपञ्चस्याद्वैत इत्यर्थः॥ सति द्वैते हेतुमद्वयत्वमतत्राह॥ विकल्पितमिति॥ रज्जुसर्पा
दिवद्गंतुकत्वाद्सदेव स्वस्थितं निश्चितमित्यर्थः॥७॥ मनसैव सद्वितीयत्वमात्मन इत्याशंक्याह॥ अ
भावरूपमिति॥ एकान्ते संकल्पकस्य मनसोऽभावरूपाद्पि स ह्यद्वयत्वमात्मन इत्याह॥ अभावरूपमि
ति॥ अभावरूपं त्वमसीह हे मनो निरीक्ष्यमाणेन हि युक्तितोऽस्ति ना॥ सतो घनासौ ग्राहसतो ऽप्यजन्मतो
द्वयं च वेत्तत्त्वतो नास्ति ते ध्रुवं॥८॥ युक्तितो निरीक्ष्यमाणत्वास्तिता न हि युक्तिमाह॥ सतो हीति॥ सा
२१८ ध्याघात्जन्मवाचा नासतो विद्यते भावो नाभावो विद्यते सत इति द्वयं जन्मविनाशौ स्यां तेन च अतत्त्वतो ना २१८
स्ति ते ध्रुवं परमार्थसत्त्वं नेष्यते त्वर्थः॥८॥ बीजाभावे ऽनन्तफलमिति न्यायेनाद्वैतत्वमात्मनो विकाद्यति॥
२५७ २५७

स्फु२

दृष्टा चेति॥ द्रष्टा च द्रष्टव्यं च तथा च दर्शनं त्वमस्तु सर्वं सत्त्वकल्पितो हि सः॥ द्रष्टा इति त्वं न हि द्रष्टा मोहय
ति स्वप्नप्रबोधेन तथा न विद्यते॥९॥ तत्कल्पितत्वं तः [illegible] गंतुकस्याविज्ञातसत्त्वान्नाद्रष्टा त्माद्व
यइत्याह॥ द्रष्टेति॥ जडस्य स्वतः [illegible] रणभावाद्र स्फुरत्त्वसत्त्वे प्रमाणाभावादित्यर्थः॥ तथा सति स्वप्नान्ता
प्रबोधेन जाग्रदादिना न विद्यते। यथा स्वप्नावस्थाया मद्विती [illegible] एव तथाऽवस्थांतरेष्वीत्यर्थः॥ स्वापेन वा द्विती
यत्वे सलिलं एको द्रष्टाऽद्वैतो भवति॥ अथास्मिन्नात्मन्येव कथा न वर्तते। तदेनं वाक्यसैर्न नामतिः सहाय्य
तीत्यादिश्रुतिसिद्धं॥ एवं विकल्पाभावेपि विकल्पनासंभवास्तीति पुनरद्वैतानुपपत्तिरित्याशंक्याह॥
विकल्पना वापीति॥ विकल्पनापि तथा द्वयाभवेद्वस्तु योगात्तेहेलात च [illegible] नत्वानि [illegible] दोऽस्ति
यतो न चात्मनां तत्तो द्वयत्वं श्रुतितो वसीयते॥१०॥ तथा द्वैतवदेव विकल्पनापि न विद्यत इति सर्वज्ञ
कल्पितानुकर्षणार्थेवाक्य [illegible] किंत्ववस्तुयोगाद्वस्तुविषयतया तत्निरूपत्वाद्द्वयाविशिष्टाना रिक्तो स्व
रूपरहिता भवति तत्र [illegible] लोकेऽत्र तत्त्वकाशरीर [illegible] मन्दस्तु कस्य चक्राकारवदिति योजना॥ यथा न मतो ऽसा त
स्य चक्राकारता न पृथक् वस्तु तथा विकल्पना विहान्मातिकेण पृथक् वस्तु सती न भवतीत्यर्थः॥ तथा

पिनात्मनोऽद्वयत्वं द्दष्टिश्रुतिमस्याश्रित्य स्वैरूपस्य स्वगतभेदस्य सत्वात्तथा प्रतिशरीरमात्मभेद
श्रवणात्समानत्तीयभेदाय पश्चात्याद्यंक्यश्रुतिविरोधात्मैवमित्याह। नश्चानित्ति भेदइति। तत्पाद्यश्रु
ति। अत एको हि सः प्राणान्ते प्राणो नान्वेति वदन्त्यात्मरूपस्यैः श्रुतः। एवं श्रोत्रं मन्यामो मन
स्तान्यस्पैतानि कर्मनामान्येवेति विशात्मनोऽद्वैतादिभेदस्योपाधिकृतां दर्शयति तिव्याप्येक एक देवो बहु
धा निविष्टः एकं सन्तं बहुधा कल्पयन्ति एकस्तथा सर्वभूतान्तरात्मेत्यादि श्रुतिरात्मनः सर्वत्रैक
२२० त्वमाह।। तथान्ते द्विनिषेधश्रुतिस्मृतयो व्यवहारपार्थाः।। एवमात्मबोधानामात्मभेदकल्पनां स्तु २२०
त्या निराकरोति। मिथ्यैति।। मिथ्यैवेत्यन्वयः यदिते हि वेतनानां हेय स्तुते षां परिमाणयोगत्व।
अवोऽनवेद्देवतां हि दृष्टे तोऽजगतृत्य द्यापि समस्तमोहतः।।२२ चेतनात्मानो यदि मिथ्यात्विना
स्फुरस्त हि ये त्विन्ना सन्ते परिमिताय यथा मृत्तोऽऽराद्यो ये च परिमितास्ते विनाशिन स्तद्वदेवेत्यात्मनां
विनाशित्वप्रसंग इति सहस्याप्यार्थ।। परिणामधागतस्ते षां हि यस्तु धर्मानवेतां नेदेवतां हि दृष्ट
५८ तो विनाशादर्शनादिति योजना।। किं च भेदपक्षे एकैकस्मिन् कल्पे एकैकमुक्तावप्यनन्तेषु गतेष्वसेषु ५८

नेतानां जीवानां मुक्तिसंभवादिदानीं समस्तमोहतो नौ ना वे नदृथ्यो ज्यानां जगतां हय
स्यापि भवेदतो भेदपक्षो दुर्युक्तिकः स्यात् धनिरनमुत पि जगज्जीवेश्वरादिभेदस्य विद्यमानत्वात्क
थमुक्ते शेषपरिहार इत्याशंक्याह।। नमेस्तीति।। नमेस्ति कश्चिन्न च संसारी कस्यचिद्यतोऽद्वयोऽहंन
हि वास्ति कल्पितं।। अकल्पितश्चास्मि पुरा प्रसिद्धितो विकल्पनायाद्वयमेव कल्पितं।। यतोऽहमद्वयो
वस्तुतो मे गुणानृतः प्रधाननत्तोऽन्यादृशो वानकश्चिदस्ति। यस्यापि कस्यैस्य विदहमस्मिसोपि
न वास्तीति संबंधः यश्च कल्पितं जगत्तेन नैवास्ति तथा च जीवेश्वरजगद्भेदस्य मप्यद्वये कल्पित
त्वात्कल्पितस्य प्रमाणासपेक्षस्तुतायाश्च संकारात्वात् स्यात्स्वरूपतो ह प्रसंग इत्यर्थः। ननु दे
तव द्देनस्यापि यथार्थत्वाविशेषात्कल्पितत्वं तदवस्तुमित्याशंक्य निरधिष्ठानकल्पनायोगा
रवधिक बाधायोगाच्च सर्वकल्पनाया भागे वस्त्वेवं कल्पितबाधावधितया पश्चादप्यवशिष्यमाणं न
कल्पितं किंतु स्वतः सिद्धं वस्त्वदयन्नाभेदो नोत्पत इत्याह। अकल्पितइति। विकल्पनायाः पुरा प्रसि
द्धितोऽहमकल्पितश्चाकाराद्धर्मिण्यवधिभूतत्वान्मध्ये च तस्याः हित्वादकल्पितस्ववास्मीति ग्येसे पारे

रोपात् सापेक्षत्वं द्वयमेव कल्पितमित्यर्थः ॥२४॥ उक्तमेव स्पष्टीकुर्वन्नात्मनो विकल्पनाद्यविषयत्वमाह ॥
विकल्पनाचापीति ॥ विकल्पना चाप्यनेन न विद्यते सदन्यद्धि स्वेवमतोऽनेन नास्तिता ॥ यतः प्रहेत्वात्तव
या पि कल्पना पुरा प्रसिद्धेर्न च तत्कल्पितं ॥२५॥ नास्ति न वस्तु सत्ति यस्य तदभावं तस्मिन्नेवेनिस्व
सदन्यत्सतोऽन्यदसदित्यपि विकल्पना न च विद्यते ऽतएवं सति न नास्तिता ॥ आत्मनो नित्यत्वादि
त्यर्थः ॥ किं चामनस्कस्य कल्पनानुदयात्मनस्यशान्तं उक्तया स्वरूपसत्तानावात्तदपि स विलासं
यत्र कल्पितं तन्न कल्पनालंबनं किंतु सर्वकल्पनासाक्षित्वेन स्वयंप्रकाशेन । कल्पितं कूटस्थमे
वात्मतत्वमित्याह ॥ यतइति ॥ तव मनसइत्यर्थः ॥ तत्कल्पनायात्र अपि पुरा प्रसिद्धेरित्यर्थः ॥२६॥
ननु यदुपलभ्यते तदस्तीत्युपगम्यते यन्नोपलभ्यते तन्नास्तीत्युपलभ्यते च द्वैतं नाद्वैतमित्याशंक्या
दर्शनादर्शने न वस्तुसत्वासत्वयोः कारणे किं त्वन्यएव तन्निश्चयहेतुरित्यभिप्रेत्याह ॥ अस्पृष्टमिति
२२२ अस्पृष्टं नैवहि यद्दर्शनेन दृष्टमित्येवं न चेव वास्तिता ॥ यतः प्रहेत्वा सदसद्विकल्पना विचार २२२
५९ वश्वापि तथाद्वयं च सत् ॥२७॥ हे मनस्तत्त्वगोचरात्तदेतयोः दर्शनेन तद्द्वयं द्वैतं नादृष्टमप्यसत् ॥ स्वनप ५९

दृष्टं न दृष्टस्वरूपत्वात्तथा न दृष्टं न दृश्यतइत्येवमेतावता वस्तुतो नास्तितान च न हि नीरूपस्य वायो
श्च रूपानुपलंभेपि नास्तिता न च नित्यं किंत्वस्तित्वं सतोपि वस्तुतो दृष्टुरसामर्थ्याद्दृष्टदर्शनायोग्यत्वाद्वा
प्यदर्शनं संतताद्विस्यर्थः ॥ ननु दृष्टमपि नास्तीति शशशृंगादि प्रसिद्धं सत्यं तथापि लक्षणरूपेण वित्
किंचित् दृष्टैव निषिध्यते विधानमंतरेण तोनन निषेधस्य संभवइति न्यायेन द्वैतमस्ति नास्तीति वि
प्रतिपत्त्यालंबनं किमप्यास्थेयमेवान्यथा विकल्पप्रसरायोगादित्यभिप्रेत्याह ॥ यतः प्रहेत्वा सदस
द्विकल्पनेति ॥ यतो यस्मिन्नधिष्ठाने प्रतीयमाना विकल्पना सदसत्कल्पितरूपमित्यर्थः ॥ विकल्प
लंबनत्वेनाधिष्ठानसत्तामुक्त्वा साक्षित्वेनापि तत्सत्त्वमाह ॥ विचारवदेति ॥ यथा अस्यार्थनीय
पाविचारो निर्णयमंतरेण न पर्यवस्यति तथा सद्द्वयं विना न विकल्पः प्रशाम्यति ॥ अतः
सर्पधारादंडमालादिविकल्पधनुगम्यमानतयाऽधिष्ठानत्वेन पुनः सर्वविकल्पनिषेधावसा
नतयाऽवधित्वेनानुवर्त्तमानोऽविकल्पिताऽनिषिद्धरज्जुस्वरूपवद्धमात्मादिविकल्पाधिष्ठानसन्मा
त्रत्वेन तन्निषेधावधित्वेन वाविकल्पितमनपोह्यं चात्मतत्त्वमद्वयमस्तीत्येवोपलक्ष्यमितितात्प

यो ऽर्थः॥ ख किंचोक्तं निश्चयाद्दर्शनाद्दर्शनमात्रात्सत्वासत्वनिश्चयासंभवाद्विचारो ऽपेक्ष्यस्तस्मिंश्च
क्रियमाणे संदेहाद्यमवशिष्यत इत्यभिप्रेत्याह॥ संदेह्यते नमिति। संदेह्यते तेन वर्तते य कल्पितं किं
रहेतोर्यदि तस्य नास्तिता॥ विचारहानाच्च तथैव संस्थितं न चेन्न हि इष्टं नितरां संदिह्यते॥ संदेहोनु
नास्तीति वरं तत्तन्निर्णयाय विचारो ऽभ्युपगम्यते। न वा यदि सो ऽभ्युपगम्यते तदा न वृत्तासंदेह्यम
येतं॥ यतो विचारहेतोर्विचारसिद्ध्यर्थमुपकल्पितमुच्छापितं किमपि वस्तु संदेहं विचारहेतु
२२२ त्तियोजना॥ विचारो हि प्रमाणव्यापारस्य फलावसानत्वनिश्चयहेतुः। स च न प्रमेयमवि २२२
ना प्रसरमुपलभते प्रमितं च न बाध्यत इति॥ सहस्तु सिद्धिरित्यर्थः॥ विपक्षे बाधकमाह यदीति। यदि
तस्य वस्तुनो नास्तिता तदा प्रमाणप्रमेयमात्रनिरूप्यस्य विचारस्य हानात् संदेहस्य कारणस्य
व निर्णयहानाच्च तथैव संस्थितमनिर्णीतमेव संस्थितं तथा च वस्तुतत्त्वानवधारणादैहिकामु
ष्मिकार्थप्रवृत्तिहानिः स्यादिति भावः॥ एतेन विचारानभ्युपगमपक्षे च दोष उक्तो वेदितव्यः। अत्र यथा
विचारितमनिर्णीतं च तत्किमपि नेष्टं चेत् तर्हि विचारनिर्णययोः सदवसानमंतरेण पर्यवसानाभा
६० ६०

डाक्टर भाऊ दाजी इनांच्या पुस्तकसंग्रहापैकी
Dr. BHAU DAJI

वान्नितरां संदिह्यते संदेह्यत एवेत्यर्थः॥ यद्वा हे मनो न वर्तते य कल्पितं ह्येतज्जातं विचारहेतोर्वि
चारसिद्ध्यर्थं संदेह्यमुपेतमात्मतत्त्वनिश्चयफलविचारप्रवृत्तये ऽस्तीति हेतुमंगीकृत्य मित्यर्थः
यदि तु न तस्य नास्तिता ऽभ्युपेयते वेदे तस्य स्यात्तदा विचारहानादिचाराप्रवृत्तेः कारणस्य रमार्थनिर्ण
याभावाच्च तथैव चाविचारितमनिर्णीतं च तत्त्वं संस्थितं स्यात्। अत्र यत्त्वानिर्णये पुरुषार्थासिद्धेस्तदनि
र्णीतं स्वतां वं इष्टं न चेत् स्यात् तर्हि नितरां संदिह्यते। विचार्य निर्णये सति सर्वस्य संदेहवसानत्वाच्चासा
रादित्यर्थः॥ को ऽयं तरस्फुरणं विना न संज्ञायावत्तारस्तेन विना न विचारप्रवृत्तिस्तामन्तेन च वस्तुत
त्त्वनिर्णयस्तेन च विना न पुरुषार्थलाभ इति विचारार्थतया यथाप्रतिपन्नो देहमभ्युपगतेन प्रमा
णिकत्वेन तथा च नुः गंगरजुत्वेन व्यवहारत इवात्सत्वं तच्छुद्ध्या व्यवहारतो ऽनर्थप्राप्तिसंभवा
त्तत्परिहाराय विचारो ऽवश्यं न्याय्यनिक्रियमाणे सर्वेषु विशेषविक्तिताया अत्र व्यनिर्धारादिशेषा
णां अनिर्धारानिषेधानिर्धाराणां चानुगतत्वात्तन्मात्रमेव सत्यं तद्देतद्रूपो विशेषाकार इति नि
र्धारे सिद्धत्वातीति भावः भारप्रवत्वे वं विचारान्यथानुपपत्त्या सहस्तु सिद्धिस्तदर्थं जिज्ञासा करोति

नवाऽऽधेयक्षणिकत्वापत्तिरित्यभिप्रेत्य द्वितीये तस्य न रश्रृंगादेरविशेष इति वैधर्म्यं शंकते ॥ असत्स
मनित्ति ॥ असत्त्वमं चेवसदित्यपीति चेदनर्थवत्त्वात्खरश्रृंगतुल्यतः ॥ अनर्थवत्त्वं च सति खकारणं
नैयेवतस्मान्नविपर्ययेन्यथा ॥ १६ ॥ अनर्थवत्त्वादर्थक्रियारहितत्वादित्यर्थः । अतं सदसत्समर्थ
क्रिया अन्यत्वात्खरश्रृंगवदित्यनुमानमप्रयोजकत्वेन दूषयति । अनर्थवित्वामिति । अनर्थवत्त्वं
सति असत्त्वे साध्येन कारणं प्रयोजकं न नवति ॥ इत्यर्थः ॥ अनर्थक्रियाकारित्वस्यासत्त्वव्याप्तौ सं
दिग्धानेकांततामुक्त्वार्थक्रियाकारित्वस्य सत्त्वव्याप्तावनैकांततामाह । न चेवसस्मादिति । तस्मादर्थक्रि
याकारित्वाभेवसत्त्वं परस्यासाध्यर्थक्रियाकारणीकं टकाद्यभावे सत्त्वव्यभिचारादित्यर्थः । हेतु
निरसनमुपसंहरति । न विपर्ययेन्यथेति । विपर्ययेऽर्थक्रियाकारित्वाभावेनान्यथाऽसत्त्वं न
संभवति क्रियोत्पत्तेः प्रवर्मुद्रासिनवस्तुदर्शनादन्यथासत्त्वार्थक्रिययोरन्योन्याश्रयापातादित्यर्थः ।
२२२ पर१६॥ असिद्धश्चायं स्खुरित्यादेः ॥ असिद्धस्तव्यापीति ॥ असिद्धत्वस्यापि विचारकारणाद्वयं तत्समा २२२
६२ श्रयतिं च मायया ॥ श्रुतेः स्मृतेश्चायित्त्याद्युक्तितः प्रसिध्यती च्छंमत्तमुज्यतेन्यथा ॥ १७ ॥ ६२

नकेवलमनेकांतिकत्वादेरेवानुमानमप्रमाणमपित्वसमहत्ति मतआत्मनि यद्धेतोरसिद्धेरप्यर्थः ॥
अर्थक्रियाकारित्वाभीनामात्रं हेतुयरमार्थविशेषितं तदभावो वाऽऽश्रयासिद्धिमाह ॥ विचा
रकारणादित्यादिना । कूटस्थस्यापि सत्तो धर्मित्वेन विचारप्रवृत्तिकारणत्वात्तन्मायया द्वय
शब्दवाच्यत्वे द्वयं च प्रसरणहेतुत्वाच्छेत्यर्थः । माययाजाग्रद्धेतुत्वं साधयति । श्रुतेरिति । मा
यां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुतिः । मयाध्यक्षेण प्रकृतिः सूयते सचराचरमि
त्यादिस्मृतिः कार्यस्य वाचारंभणत्वश्रुतियुक्तिसाधकत्वन्यायोयुक्तिः ॥ इच्छं कूटस्थस्याप्यर्थक्रिया
कारित्वं प्रसिध्यत्यतो हेत्वसिद्धिरित्यर्थः । द्वितीयं दृष्टांतासिध्या दूषयति । नेति । अन्यथा पर
मार्थतोऽर्थक्रियाकारित्वं स्थिरस्य हि केस्यचानयुज्यते ॥ अक्रियस्याकारकत्वात्क्रियाकार्थंप्र
स्यापि क्रियावत्त्वायत्तावनवस्थाप्रसंगादिति हि अ ॥ १८ ॥ ननु सर्वविकल्पहेतुत्वाद्वयस्य सर्व
विकल्पयुक्तत्वमित्याशंक्याह ॥ विकल्पनाश्चापीति ॥ विकल्पनाश्चापि विध्यमेकं श्रुतेः स्तुरामसि
द्धश्च विकल्पतोऽद्वयं ॥ न चेति नेतीतियथा विकल्पितं निषिध्यतेऽत्राप्यवरायसिद्धये ॥ १९ ॥

विधर्मकं विरुद्धस्वभावमित्यर्थः। निष्कलं निष्क्रियमित्यादिश्रुतेः। विकल्पस्य तन्तु रज्ज्वसिद्धेरिति युक्तेश्चेत्यर्थः।
अद्वयमिति छेदः। नेदं यदिदमुपासते। नेति नेति च निषिध्यमानचेतनाचेतनविकल्पावसाने सिद्धये
ऽज्ञायि निषिद्धवाक्येष्वपि विकल्पस्य विधर्मकमद्वयं निर्विशेषं सिद्धमित्याह। नेचेतीति। यथा विकल्पितं नेति
तिनेतीति निषिध्यते। न तथाद्वयमात्मतत्त्वं निषिध्यत इति योजना। अन्यथा त्वेऽश्रुत्यर्थे विकल्पयन्ति। पं५
तेऽनर्थं प्राप्नुवन्तीत्याह। अकल्पितइति। अकल्पितं पृथमजेऽद्वये हरे विकल्पैतैः सदसत्त्वं जन्मादि
स्वचित्तमायाप्रजनं च तेन वं जरां च मृत्युं च नियान्ति संततं। २९ कूटस्थे नेदविकारसंसर्गशून्येश
ति सिद्धे इति यावत् सदसत्त्वैश्चकारात् कर्त्रासि विज्ञेयो निर्विशेष इत्यादिप्रकारैः स्वचित्तमायाप्र
जनं यथा स्यात्तथा विकल्पयन्तः पुनः तेन जन्मादिस्थितिमनुष्यजातिं च मृत्युं जरां मृत्युं मरणं च सं
ततं निरन्तरं नियान्ति नितरां गच्छन्तीति योजना। स्वचित्तमायाप्रजनमिति नवविशेषणं वा बुद्धि
२२४ कल्पितमित्यर्थः। २९ सदसत्त्वं नः कूटस्थाद्वयत्वं श्रुत्यादिप्रमाणसिद्धं तदन्यथा विकल्पनं २२४
६२ पुरुषापराधनिबंधनमित्यभिप्रायो [illegible] इदानीं तदेव युक्तितो दृढयितुमुपक्रमते। नवानवत्वमिति। ६२

प्प१

नवानवत्वं तु न चेदवस्थितिर्न चास्य चान्यस्थितिजन्मनान्यथा। मतोऽपि सत्ता दसतत्त्वयस्य
त्वे तौ न च क्रियाकारकमित्यतो ह्यजं॥३० ततु स्पार्थः किं चेत्यद्वैतमुत्पद्यमानस्वभावमनुत्पद्य
मानस्वभावमुतनयस्वभावं अनुनयस्वभावं वा। नाद्यस्तदा सायेति त्वेनशुक्तिरजतादिवन्मिथ्या
त्वापातात्। न द्वितीयः सहातत्त्वापत्तौ तदन्ताव्यवहारानुदयप्रसंगात्। न तृतीयः एकस्य वि
रुद्धोऽनयस्वभावत्वायोगादित्यभिप्रेत्याचतुर्थमनूद्य दूषयति। नवानवत्वमिति। नवत्वानवत्व
नवानवीतयोर्भावः नवानवत्वं अस्याद्वैतस्य नवानवत्वं चेद्विरोधान्नेष्यते सहावस्थितिरवस्था
नं सत्त्वं न चस्यादिति शेषः। नह्यनयस्वभावविलक्षणं कश्चित्सद्भूयस्त [illegible] मस्तीत्यर्थः। च अयं
यदि द्वैतस्य जन्मेष्यते तदा स्वतः एवजन्मासंभवादन्यस्मात्तदवलंब्यं तदद्वैसत्त्व [illegible] भावमसत्त्व
भावं वा यतोऽद्वैतस्य जन्मेत्याकांक्षायां सर्वथापि नोपपद्यत इत्याह। अन्यस्थितिजन्मनान्यथेति।
अन्यस्मिन्स्थितो सति न जन्म सतो न जन्मेत्यर्थः। अन्यथा अस्थितो जन्म न [illegible] परज्यते। अस
तोऽपि न जन्मेत्यर्थः। पद्यद्वयेपि इष्टमाहृ। सत्तइति। सत्तया ज्ञानत्वे विकल्पितायताः विना[illegible]

दसत्वप्रसंगादसतश्चोपादानत्वे सत्वतः सत्वापत्तेर्न हि शून्यमुपादानं स्यात्तस्य कार्येष्वननुग
मादित्यर्थः॥ तथा च वस्तुनः स्वभावे यशीसायोगान्न सत्कार्यं दिष्टात्मना जायते नाप्यसदित्युक्तेति
पक्षोपि दुर्निरूपः इति भावः॥ एवमुत्पाद्योत्पादकयोः स्वभावानिरूपणे सत्कार्यतिरत्कारकत्वविष
ययोः सुतरामनिरूपिताकारसासिद्धेरसादानव क्रियाकारकमिति॥ उपसंहरति॥ अतोप्यजामि
त्तिन्यायेन युक्तितोऽप्यजं निर्विशेषमद्वयमात्मतत्वमित्यर्थः॥ स्वयं न च क्रियाकारकमनिरूप्य तमेव वस्तु
स्वयं तत्वं वस्तुनः साधयति॥ अकुर्वदिति॥ अकुर्वद्धि इदं यदि वा सत्कारकं न किंचिदन्य
न्नेनुनास्यकारकं॥ सतोऽविशेषादसतश्च सत्वतो तुल्यो तयोर्यद्भेदनिश्चयान्नहि॥ अ
स्य द्वैतजन्मनः कारकमकुर्वद्धि इष्टं निर्व्यापारं कारकमिष्टं चेदित्यर्थः॥ अन्यदिति॥ द्वितीय
याद्दस्तु पदमाहाथ यदि वान्यत्कुर्वदिष्टं चेत्यर्थः॥ तत्राद्येऽतिप्रसंगं दोषमाह॥ न किंचिदननुनास्ती
२२५ ति॥ न हि निष्क्रियं किंचिदपि कारकं नास्तीति न अपितु सर्वं सर्वस्य सर्वदा कारकं स्यादित्यर्थः॥ २२५
६२ द्वितीये कारकत्वानुपपत्तिदायमाहा॥ अकारकमिति॥ अक्रियस्य कुर्वत्वायोगात्क्रियावत्त्व ६२

नित्ये सदाकार्यप्रसंगादनित्ये च क्रियावदंतरापेक्षायामनवस्थाप्रसंगादनपेक्षायामा
त्माश्रयापत्तेः कुर्वत्वपक्षे कारकत्वादिति हि इत्यर्थः॥ अथवा प्रथमे विकल्पे न किंचित्कारक
मिति निराकरणपदान्वयः सर्वमेव कारकं स्यादित्यर्थः॥ द्वितीयदूषणं ननु नास्तीति कुर्वत्तः
कारकत्वानिरूपणादित्यर्थः॥ कथमनिरूपणमिति चेत्तत्र वक्तव्यं किं सद्वस्तु कुर्वदसद्वस्तु ६
वा नेति यथापीत्याह॥ सतोऽविशेषादसतश्चेति॥ असतश्चाविशेषादिति संबध्यते विशेष
वत्वेनैरूप्यापत्तेरविशेषे च सदाकार्यं स्यान्नवा स्यादित्यर्थः॥ अथ सतोऽसतो वा पूर्वसत्वासत्व
पक्षस्यावस्थायां कार्यस्यादिति नवेत्कारकत्वमिति मतं तत्रावस्थाप्रच्युतिकार्ययोर्योगपद्य
मतिमतं क्रमो वा नाद्य इत्याह॥ स अत्तावितिप्य वस्थायां कार्ये इति॥ उपलक्षणमसच्चोतो च इ
त्तायाद्यं तयोः कोशोर्यद्वन्नमन्योन्नमननुनवृत्तेः कार्यकारणभावो न निश्चीयते तथा कार्य
कारणस्वरूपनिर्णने दि निश्चीयत इत्यर्थः॥ द्वितीयेऽनवस्थाप्रसंगोऽवस्थाप्रच्युतेरपि कार्य
त्वात्तस्या अपि तथाविधपूर्वकत्वापेक्षणादिति दृष्टव्यं॥ २२ वस्तुनोऽवस्थांतरापत्तिमन्य

पगम्येतद्द्वयोर्वामवस्तुत्वस्तु सतोऽसतो वाऽवस्थांतरं नोपपद्यत इति न कस्यापि कार्यत्वं कारणत्वं
वा विद्यत इत्याह॥ न चेति॥ न चेत्सदृष्टः सदसद्विपर्ययः कथं नवः स्यात्सदसद्व्यवस्थितौ वि
न कमेतद्द्वयमप्यवस्थितं न जन्मात्तस्मान्न मनो हि कस्यचित्॥२२॥ नन्वस्तु कदोषापरिहारात्सदसद्वि
पर्ययश्चेन्नेष्टस्तत्सदसतोः स्वरूपव्यवस्थितौ नवः कथं स्यात्तु तो यत एतद्द्वयमपि सच्चासच्च
विनैकं परस्परं संसर्गशून्यं व्यवस्थितं न पूर्वापरीभावोऽनयोर्मिथो वान्यापेक्षया वेत्यर्थः हि मनो
हि यस्मादेवं तस्मान्न कस्यचिदपि जन्म विद्यत इत्यवधारयेत्यर्थः॥२२॥ ननु वाजन्म यस्य कस्यापि
तथापि न मेऽस्तु तत्तस्य कस्यचिद् इति दृष्टिर्वेत्याह॥ अथाप्यकस्मायीति॥ अथाप्यकयेत्यपि भवेत
वेत्तो ब्रवीमि नार्थस्तत्र वचेष्टितेन मे॥ न हान्नहेदी न यतः स्वतोऽसतो न वाऽन्यतो वा यदि हेवास्ति
तानयो॥२३॥ मनसश्चेष्टितेनात्मनो नार्थस्तीत्यत्र पंचयति॥ न हानहेई इति॥ नस्त इति
२२८ योज्या कुतः इत्यत आह॥ न यत इति॥ यतो यस्मादसत आत्मन्यविद्यमानस्य हानस्य कर्दवीन २२९
वनद्भवः स्वतोऽन्यतो वा हेत्वंतराद्वा न संभवतीति योजना यदि वात यो हानिहृप्यार्थयात्मन्यस्ति
६४ ६४

ता सर्वथापि तत्र चेष्टितेन मे नार्थ इति संबंधः स्थिरहर्थत्वचेष्टाया अर्थकिंचित्करत्वाद्धि सर्वथा
प्रतीयमानो व्यवधीयमानयोरात्मनि बंधाभिरूपणाच्च न हानहेदी स्त इत्याह॥ आत्मेति॥ आत्मत्व
नित्याच्च न चान्ययोगिनो मिथश्च कार्यं न चैतयुज्यते॥ अतो न कस्यापि हि किंचिदिष्यते स्वयं
च तत्त्वं न निरुक्तिगोचरं॥२४॥ आ वाः स्थिराः कूटस्थाश्च नित्या हरिणाकाश्यपशयां हि नित्यं तमन्य
योगिनो न नैवर्त्तिस्थिराणामविकारित्वाद्धिणिकानामन्यसंबंधकालपर्यंतमवस्थाना संभवा
दित्यर्थः॥ मिथश्चान्योन्यमपि स्थिरास्थिरयोर्न संबंधि विना संभवति संबंधस्य संबंधिसंबंध
त्वविकल्पासहत्वादित्यर्थः॥ अत एवैतन्न कार्यं किमपि युज्यते घटते विकारनेदसत्त्वानि
राकरणमुपसंहरत्यत इति॥ न किमपि कस्यापि संबंधि परमार्थत इष्यत इत्यर्थः॥ ननु कथमा
त्मनोऽन्यसंबंधाभावो वेदांतवाक्यप्रमाणप्रवृत्तिप्रमेयत्वोपगमादित्यत आह॥ स्वयं चेति॥
तत्त्वमात्मस्वरूपं निरस्तसाक्षिकं न निरुक्तेर्वाक्यस्य मुख्यया वृत्त्या गोचरो विषयः शब्दप्रवृत्ति
निमित्तधर्माभावात् किं तु लक्षणया शब्दस्य तत्र पर्यवसानमपेक्ष्य वेदांतप्रमेयत्वं तस्योपगी

सत्तमित्वि न विरोध इत्यर्थः॥ रथान्त दैवं निरूपयेत्तसाक्षिणोऽसंगाद्यानंदस्वरूपस्य स्वप्रकाश
तया प्रकाशमानं स्वरूपं अस्ति मुक्तिस्थां निश्चित्य मुमुक्षुः संततं योगवर्ती त्ति मे तन्मात्रं निरीक्षय
स्य सुखसंहारमाजेनाहं॥ समं त्वि ति॥ समं तु तस्मात् संततं विभात वद्धृ यादिमुक्तं सदसद्विकल्पि
तानां निरीक्षमस्त स्वा श्रुतिनस्तु बुद्धिमानशेष निर्वाणमुपेत्ति दीयवत्॥ स्वस्वात्मस्वात्म्यां विक
ल्पिसा द्वृयाद्वैतावला सास्संततं विमुक्तमिति संबंधः॥ संततं समं विनातवत्प्रकाशमानमिति वा
उत्ना दीपवत्सहसे वाशेषस्य बंधस्य निर्वाणं परिसमाप्तिमुपैति निरीहेण निर्वाणयोर्न मवधा
नं किमप्यस्तीत्यर्थः॥ स्वस्वरूपसहहणस्यात्मतत्त्वस्य निरीक्षणं किं विषयत्वेनाविषयत्वेन चेति
जिज्ञासायामविषयत्वेनैवेत्याह॥ अवेद्यमिति॥ अवेद्यमेकं यदमन्यवेदिनां कुत्ता किंकाणं
सुवेद्यमन्यथा॥ निरीक्षचेत्र्वं चगुणग्रहोऽगुणानुयाति मोहं ग्रहदोषमुक्तिं ननु रदसवेद्य
२२७ हि वस्तु गात्मनोऽन्यन्न भवत्स दयं श्रुतिर्वेदि न स्त्तैषा मननन्य वेदिनामवेद्यं॥ अन्यथा नेदन २२७
विषयतया वेदिनां कुतार्किकाणां सुवेद्यं परिच्छिन्नात्तया सुज्ञेयं॥ शास्त्रयुक्ति विचारजन्यासं

विनास्वमत्यनुसारेण सुखबोधमित्यर्थः॥ गुणे गुणसत्त्वादिकं विकारं कुग्रहोऽस्तीति वेशो
यस्य स गुणग्रहो न गुणाग्रहोऽगुणाग्रहः गुणमानग्रहो यस्मिन्मान होनइति यावत्॥ अगुणं निर्वि
शेषं तत्त्वं इत्थमवेद्यमितीदृशं रूपं निरीक्षमाणो व्यवहार दृष्टि रोधं तथानुभूयमोहं नय
ति तन्न हेतुमोहायग्रहदोषमुक्तिं तइति॥ ग्रहरूपाद्दोषान्मुक्तितो मुक्ते मोहहेतु ज्ञानतत्का
र्यबाधादित्यर्थः॥ रद्रकस्मादेवं मदतां अयन्नेनाविषयत्तया ब्रह्मात्मनो वेदं मिथ्यतेत्त त्राह
अतोन्यथेति॥ अतोन्यथा न ग्रहनोऽस्ति इष्यत्त विमोहकं दुर्ग्रहएककारणं॥ ग्रहो यस्स्तु तस्य
नत्वेतस्य निबंधनो यथा प्रशांतिं परमां तथाब्रजेत्॥ रज्ञाअनवे विधात्मज्ञानाहन्यथाऽन्य
स्मात्प्रेत्यं तरात्मकारांतराद्यान्यग्रहनाशो मिथ्याज्ञाननिवृत्तिरेष्यते॥ नान्यः पंथा विद्यतेऽयना
येति श्रुते॥ मास्तु तर्हि ग्रहनाश इत्यत आह॥ विमोहहेतोः ग्रहस्य कारणेसति चित्तमोहकं दु
हग्रहाद्याग्रहं मनसाद्य निवेशयितिः सर्वानर्थबीजभूतस्याः अनिवृत्तिः स्यादिति सोनिमोक्ष
प्रसंग इत्यर्थः॥ ननु भवतु ग्रहनाशो मोहनाशोग्रहनाशश्च एको ब्रह्मात्मज्ञानादितिचेन्न

ज्ञानादज्ञानस्येव निवृत्तिसंभवाद् निवृत्तिकारणमन्यदेष्टव्यमित्याशंक्याज्ञानकार्यत्वादद्र
ष्टृत्वान्निवृत्तौ स्वयमेव निवर्त्तत इति सदृष्टांतमाह दाह्यदाहीति ॥ अहं तु निरुपादानत्वा
न्निवृत्तौ पुनः अरोदहनभावात्परमो निरतिशयां शांतिमुपगतोऽस्मीति मोक्षलक्षणां ब्रजेदित्यर्थः ॥
२७ प्रकरणसमाप्तौ गुरुनमस्कारलक्षणं मंगलमाचरति ॥ विमथ्येति ॥ विमथ्य वेदोदधितः स
मुद्धृतं सुरैर्महाब्धेस्तु यथा महात्मभिः ॥ तथामृतं ज्ञानमिदं हि यैः कृतं नमो गुरुभ्यः परमी
क्षितं च यैः ॥ २८ ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदभगवत्पादशिष्य
स्य श्रीशंकरभगवतः कृतिः सकलवेदोपनिषत्सारोपदेशसहस्रीसमाप्ता ॥ ॥ या
यथा सुरैर्देवैर्महात्मभिर्महाब्धेः क्षीरसागरादमृतं समुद्धृतं ॥ तथा यैर्महात्मभिर्गुरुभिर्वेदरूपादु
दधितो विमथ्यालोड्य प्रकरणरूपेण मया प्रकाशितं ज्ञानामृतं ज्ञानरूपममृतं समुद्धृतं उप रा
२२८ शूर्वं तथा यैः परं परमात्मतत्त्वं च क्षितं मया परोक्षीकृतं तेभ्यो गुरुभ्यो नम इति योजना ॥ अथवा यै २२८
र्गुरुभिर्विमितं तत्त्वं मया परं च क्षितमिति योजना ॥ तस्मादात्मज्ञं ह्यर्चयेद्भूतिकाम इत्यादिश्रुतेः

निरयेऽहं मुनिं शांतं निर्वैरं समदर्शनं ॥ अनुव्रजाम्यहं नित्यं पूयेयमंघ्रिरेणुभिरिति भगव
द्वचनाच्च युक्तमत्र गुरुशुश्रूषणमित्यर्थः ॥ उपदेशसहस्रीयं विवृता हि महात्मभिः ॥ अ
ज्ञानेन मयाप्यस्यां पदयोजनिका कृता ॥ १ ॥ समस्तवेदार्थरहस्यगद्यपद्यप्रबंधार्थितयावबो
धः ॥ कथं नु मादृग्मतिबिंबितः स्यात्तथापि नत्वाहमिहास्मि रूढः ॥ २ ॥ रूढं तरां विश्रुतरामरू
ढैस्तथा गुरूणां विपुलप्रसादात् ॥ यथा कथंचिद्विवृतेन विस्फुरन्नेन तुष्यत्वखिलांतरात्मा
॥ ३ ॥ ॥ इति श्रीशंकराचार्यकृतोपदेशसहस्र्याः पदयोजनिकानामटीका रामतीर्थवि
रचिता समाप्ता ॥ ॥ सहस्रोपदेशेन हार्दं तमो यः स्वचिन्मात्रभासा निवा
र्य स्वनंदात्मरूपं समस्तार्थदीपं गुरुं काशिराजं निजं तं नमामि ॥ १ ॥ परादेः स्फुरत्ता
नदीयाच सज्ज्ञानदानं ददत्ता मत्तरेणोपयाता ॥ त्रयं तत्त्वदं ज्ञानमिच्छं प्रसादाद्गुरोर्यस्य तं का
शिराजं नमामि ॥ २ ॥ ॥ संवत् १७६५ वर्षे शाके १६३० प्रवर्त्तमाने । पौषमासे कृष्णपक्षे त्रयो

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तिथौ ७ मे महिने। राजपुर मध्ये राकात्तलीआ निवासी उदीच्य टोलकीआ ज्ञातीय व्यास॥
दामोदर रामजी व्यास विष्णुजी [illegible] वेन लिखितं॥ यादृशं पुस्तके दृष्ट्वा तादृशं लिखि
तं मया॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥ लेखक पाठकयोः शुभं भवतु॥ ॥श्री
रस्तु॥ ॥श्रीलक्ष्मायनुभ्यं नमः॥ ॥श्रीरस्तु॥ ॥श्रीरस्तु॥ ॥श्रीरस्तु॥ ॥श्री॥
श्री॥॥ श्री॥॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥

२२८ ६७

DR BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक